## राष्ट्रियसङ्गोष्ठ्याः कानिचन चित्राणि









लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः
(केन्द्रीयसंस्कृतविश्वविद्यालयस्यान्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठद्वारा $B^+$ श्रेण्यां प्रत्यायितम्)
[भारतसर्वकाराधीनः, केन्द्रीयसंस्कृतविश्वविद्यालयेन सह सम्बद्धः]
हरिःशरणं कुटीरः, कालीराखा, बि. देवघरः
झारखण्डः – 814112
2025

ISBN:978-81-930770-3-0

संस्कृतादर्शः - 2025

लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयप्रकाशनम् – 1 ISBN:978-81-930770-3-0

# संस्कृतादर्शः

(भारतीयज्ञानपरम्पराश्रितानां शोधपत्राणां सङ्ग्रहरूपः)

*[Collection of research papers based on Indian Knowledge Tradition]*

प्रधानसम्पादकः
**डॉ. गङ्गाधरझा**
प्र. प्राचार्यः

सम्पादकः
**डॉ. बसन्तकुमारमुद्रा**

लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः
(केन्द्रीयसंस्कृतविश्वविद्यालयस्यान्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठद्वारा $B^+$ श्रेण्यां प्रत्यायितम्)
[भारतसर्वकाराधीनः, केन्द्रीयसंस्कृतविश्वविद्यालयेन सह सम्बद्धः]
हरिःशरणं कुटीरः, कालीराखा, बि. देवघरः
झारखण्डः – 814112
2025

## महाविद्यालयस्य प्रत्यायनाय समागतानां नवदेहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य IQAC सदस्यानां कानिचन चित्राणि










## IQAC सदस्यैस्सह महाविद्यालयीयाध्यापकानां छात्राणाञ्च कानिचन चित्राणि










*लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयप्रकाशनम् – 1* *ISBN:978-81-930770-3-0*

# संस्कृतादर्शः

## (भारतीयज्ञानपरम्पराश्रितानां शोधपत्राणां सङ्ग्रहरूपः)

***[Collection of research papers based on Indian Knowledge Tradition]***

मार्गदर्शकः

**प्रो. श्रीनिवासवरखेडी**

कुलपतिः

संरक्षकः

**प्रो. रामपूजनपाण्डेयः**

अध्यक्षः, प्रबन्धनसमितिः

प्रधानसम्पादकः

**डॉ. गङ्गाधरझा**

प्र. प्राचार्यः

सम्पादकः

**डॉ. बसन्तकुमारमुद्रा**

सहसम्पादकौ

**डॉ. नितेशकुमारद्विवेदी**

**डॉ. राहुलपोखरियालः**

**लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः**

(केन्द्रीयसंस्कृतविश्वविद्यालयस्यान्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठद्वारा *B*+ श्रेण्यां प्रत्यायितम्)

[भारतसर्वकाराधीनः, केन्द्रीयसंस्कृतविश्वविद्यालयेन सह सम्बद्धः]

**हरिःशरणं कुटीरः, कालीराखा, बि. देवघरः, झारखण्डः – 814112**

**2025**

*L.D.S.A.S.College Publication – 1* *ISBN:978-81-930770-3-0*

# SAMSKRUTAADARSH

*[Collection of research papers based on Indian Knowledge Tradition]*

Guide
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

Patron
**Prof. Rampoojan Pandey**
Chairman, Managing Committee

Chief-Editor
**Dr. Gangadhar Jha**
Principal I/C

Editor
**Dr. Basanta Kumar Mudra**

Co-Editors
**Dr. Nitesh Kumar Dwivedi**
**Dr. Rahul Pokhriyal**

**Lakshmi Devi Shroff Adarsh Sanskrit College**
*(Accredited With B+ Grade by IQAC of CSU, New Delhi)*
**[Under Government of India& Affiliated to Central Sanskrit University, New Delhi]**
**Harisharnam Kutir, Kalirakha, Deoghar**
**Jharkhand – 814112**
**2025**

**प्रकाशकः**

**लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः**

हरिःशरणं कुटीरः, कालीराखा, बि. देवघरः, झारखण्डः –814112

ई मेल : ldsasmahavidyalaya@gmail.com

वेबसाईट : www.ldsasmahavidyalaya.com

© सर्वाधिकारः : लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयाधीनः

प्रकाशनवर्षम् 2025 (वामनजयन्ति)

प्रथमसंस्करणम् 100 (शतम्)

*ISBN :**978-81-930770-3-0***

मूल्यम् : ₹250.00

**मुद्रकः**

एस्. एस्. प्रिंटर, श्रीक्षेत्र कलोनी, पुरी - 2, ओडिशा –752002

**Publisher**

**Lakshmi Devi Shroff Adarsh Sanskrit College**

Harisharnam Kutir, Kalirakha, Deoghar, Jharkhand- 814112

Email: ldsasmahavidyalaya@gmail.com

Website: www.ldsasmahavidyalaya.com

© Lakshmi Devi Shroff Adarsh Sanskrit College

Publishing Year – 2025 (Vaamana Jayanti)

*ISBN:**978-81-930770-3-0***

Price: ₹250.00

**Printer**

S.S. Printer, Srikhetra Colony, Water Works Road

Puri - 2, Odisha – 752002

Phone : 9439047752, Email: nalinisarangi1977@gmail.com

## समीक्षा समितिः

**प्रो. सुकान्तकुमारसेनापतिः,** कुलपतिः,श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्-362265 (गुजरातम्)
**प्रो. प्रह्लाद आर्. जोशी,** कुलपतिः, कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नालबरिः – 781337 (असामः)
**प्रो. आर्.जी. मुरलीकृष्णः,** कुलसचिवः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली - 110058
**प्रो. भागीरथिनन्दः,** शैक्षणिकाधिष्ठाता, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली – 110016
**प्रो. सत्यनारायणआचार्यः,** शैक्षणिकाधिष्ठाता, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः– 517507 (आन्ध्रप्रदेशः)
**प्रो. शैलेशकुमारतिवारी,** आचार्यः, व्याकरणविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी – 221005 (उत्तरप्रदेशः)

## परामर्शदात्री समितिः

**प्रो. एस्.भी. रमणमूर्तिः,** आचार्यः,केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली - 110058
**प्रो. कुलदीपशर्मा,** आदर्श अधिकारी,केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली - 110058
**प्रो. हीरालालदाशः,** आचार्यः संस्कृतविभागाध्यक्षश्च, श्रीरामचन्द्रभञ्जदेवविश्वविद्यालयः, बारिपदा, ओडिशा
**डॉ. प्रियव्रतमिश्रः,** सहाचार्यः, व्याकरणविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी – 221005 (उत्तरप्रदेशः)
**डॉ. मधुसूदनमिश्रः,** सहायकाचार्यः, ज्योतिषविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, (उत्तरप्रदेशः)
**डॉ. राकेशदासः,** विभागाध्यक्षः, संस्कृत एवं दर्शनविभागः, रामकृष्णमिशनविवेकानन्दशैक्षणिकशोधसंस्थानम्

## सम्पादनमण्डली

**डॉ. नवनीतशर्मा,** सहायकाचार्यः, ज्योतिषविभागः, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः, झारखण्डः
**डॉ. जयदेवदिण्डा,** सहायकाचार्यः, व्याकरणविभागः, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः, झारखण्डः
**डॉ. राकेशकुमारपाण्डेयः,** प्रवक्ता, आँग्लभाषा, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः, झारखण्डः
**डॉ. किसलयकुमारझा,** अतिथि-अध्यापकः, ज्योतिषविभागः, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः
**डॉ.रघुवरचौधरी,** अतिथि-अध्यापकः, हिन्दीभाषा, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः
**अभिषेककुमारसिंहः,** अतिथि-अध्यापकः, संगणकविज्ञान, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः
**देवोपममुखोपाध्यायः,** अतिथि-अध्यापकः, पर्यावरणविज्ञान, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः
**चन्देश्वरयादवः,** पुस्तकालयसहायकः, लक्ष्मीदेवीशराफआदर्शसंस्कृतविश्वविद्यालयः, देवघरः



**सम्पादकीयसम्पर्कः**

E-mail : samskrutaadarsh2025ldsasm@gmail.com
दूरभाषा : 9178907081



मूल्यम् : रू.250/-

**प्रकाशकः**

**लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः**

(केन्द्रीयसंस्कृतविश्वविद्यालयस्यान्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठद्वारा $B^+$ श्रेण्यां प्रत्यायितम्)

[भारतसर्वकाराधीनः, केन्द्रीयसंस्कृतविश्वविद्यालयेन सह सम्बद्धः]

हरिःशरणं कुटीरः, कालीराखा, बि. देवघरः, झारखण्डः – 814112

## ***Review Committee***

**Prof. Sukanta Kumar Senapati,** Vice-Chancllor, Shree Somanath Sanskrit University,(Gujarat)

**Prof. Pralhad R. Joshi,** Vice-Chancllor, K.B.V.S.& Ancient Studies University, (Asam)

**Prof. R. G. Murali Krishna**, Registrar I/c, Central Sanskrit University, Jankpuri, New Delhi

**Prof. Bhagirathi Nanda**, Dean of Academic Affairs, S.L.B.S.N.S.University, New Delhi

**Prof. Satyanarayana Acharya,** Dean of Academic Affairs, National Sanskrit University, (Tirupati)

**Prof. Shailesh Kumar Tiwari, Professor**, Dept. of Vyakaranam, S.V.D.V., BHU, Varanasi

## ***Advisory Committee***

**Prof. S.V. Raman Murty,** Professor of Enghish, Central Sanskrit University, Jankpuri, New Delhi

**Prof. Kuldeep Sharma**, Officer-in-charge (Adarsh), Central Sanskrit University, Jankpuri, New Delhi

**Prof. Hiralal Dash**, HoD Sanskrit, Maharaja Sriram Chandra Bhanja Deo University, Baripada, Odisha

**Dr. Priyabrata Mishra**, Associate Professor of Vyakarana, Banaras Hindu University, Varanasi

**Dr. Madhusoodan Mishra,** Assistant Professorof Jyotish, Sampurnanand Sanskrit University, Varanasi

**Dr. Rakesh Das,** HoD, Sanskrit & Philosophy, RMVE and Research Institute, Belur Math, West Bengal

## ***Editorial Board***

**Dr. Navneet Sharma,** Assistant Professor, Dept. of Jyotish, LDSAS Mahavidyalaya, Deoghar

**Dr. Joydeb Dinda,** Assistant Professor, Dept. of Vyakarana, LDSAS Mahavidyalaya, Deoghar

**Dr. Rakesh Kumar Pandey,** PGT in English, LDSAS Mahavidyalaya, Deoghar

**Dr. Kishlay Kumar Jha,** Guest Faculty of Jyotish, LDSAS Mahavidyalaya, Deoghar

**Dr. Raghuvar Chaudhari,** Guest Faculty of Hindi, LDSAS Mahavidyalaya, Deoghar

**Abhishek Kumar Singh,** Computer Instructor, LDSAS Mahavidyalaya, Deoghar

**Debopam Mukhopadhyay,** Guest Faculty of Environmental Studies, LDSAS Mahavidyalaya, Deoghar

**Chandeshwar Yadav,** Library Assistant, LDSAS Mahavidyalaya, Deoghar



**Editorial Contact**

E-mail : samskrutaadarsh2025ldsasm@gmail.com

Mob. : 9178907081

Price : Rs.250/-

**Publisher**

**Lakshmi Devi Shroff Adarsh Sanskrit College**

*(Accredited With B+ Grade by IQAC of CSU, New Delhi)*

[Under Government of India & Affiliated to Central Sanskrit University, New Delhi]

Harisharnam Kutir, Kalirakha, Deoghar

Jharkhand – 814112

# ABOUT OUR COLLEGE

Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya, the only Sanskrit college of Jharkhand offering Acharya (Masters) Degree in Sanskrit, is situated at B. Deoghar, a sacred place of Vaidyanath, one of the twelve Jyotirlingas (Manokamanalinga). It was established in the year 1979 and was included in ASM of the Ministry of Education & Culture, Government of India in the year 1984. It is affiliated to Central Sanskrit University, New Delhi.

As per NEP, The Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya provides education that is –

1. **Prak-shastri (equivalent to Intermediate, Two-year course).**
2. **Shastri Pratistha (B.A. Hons., equivalent to Bachelor Degree, Four-year course).**
3. **Shastri (B.A. Pass, equivalent to Bachelor Degree but Three-year Course) &**
4. **Acharya (equivalent to Master Degree, One-year course)**

in the subjects of **Sahitya** (Literature), **Vyakarana** (Grammar), **Jyotish** (Astrology) & **Veda-Karmakand-Paurohitya**. To cope with the modern situation not only traditional subjects but also modern subjects like **English, Hindi, Political Science, Computer Science & Environment Science, Sociology, Psychology, Yoga (Practical), Language Skill etc.** are also taught here.

It has hostel facility for the poor students and the students coming from remote area.

## Vision

All round development of Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya which is committed to promote and expand Sanskrit language, to preserve Vaidik Shastra etc. and to establish the pride of Jharkhand in all over India.

## Mission

- Promotion and expansion of Sanskrit in public for the development of Sanskrit Language.
- Creation of means for innovative knowledge based on traditional Sanskrit.
- Inclusion of IKS in related fields.
- Using Sanskrit Language in education system.
- Preservation, promotion and expansion of traditional shastras with the help of modern system.
- Teaching learning system of Vyakarana, Sahitya, Jyotish and Veda-Karmakand-Paurohitya shastras using *Saralamanak Sanskrit*.

## Objective

- To Promote ancient literature available in Sanskrit with new technology and to make effort for the promotion of Sanskrit Language with Indian and Western Languages.
- Welcoming and honouring Sanskrit intellectuals and the intellectuals of other languages.
- Organizing seminar/Conference/Lecture Series etc. for the development of Indian knowledge tradition.
- Making arrangement for the research facilities for the research in Sanskrit Language.
- Regular publication of Article in Research Journal of our Institution.

# Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya

*(Accredited With B+ Grade by IQAC of CSU, New Delhi)*

*Under Government of India, Affiliated to Central Sanskrit University, New Delhi*

**Harisharnam Kutir, Kalirakha, B. Deoghar – 814112, (Jharkhand)**

## *Incumbency List of* Chairman

| Sl. No. | Name of the Chairman | From | To |
|---|---|---|---|
| 1. | Sri Chandra Mauleshwar Prasad Singh | 1984 | 1986 |
| 2. | Dr. Jaymant Mishra | 1986 | 1994 |
| 3. | Prof. Umashankar Sharma (Risi) | 1994 | 1999 |
| 4. | Sri Durga Shankar Mukhopadhyay (IAS) | 1999 | 2002 |
| 5. | Prof. Nirmal Kumar Chaterjee | 2002 | 2005 |
| 6. | Dr. Muraree Mohan Jha | 2005 | 2008 |
| 7. | Dr. Radhakant Yadav | 2008 | 2011 |
| 8. | Prof. Kamala Bharadwaj | 2011 | 2015 |
| 9. | Prof. Prabha Kiran | 2015 | 2018 |
| 10. | Prof. Taraknath Adhikari | 2018 | 2021 |
| 11. | Prof. Bhagirathi Nanda | 16.04.2021 | 15.04.2024 |
| 12. | Prof. Rampoojan Pandey | 27.04.2024 | Till Date |

# Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya

*(Accredited With $B^+$ Grade by IQAC of CSU, New Delhi)*

*Under Government of India, Affiliated to Central Sanskrit University, New Delhi*

**Harisharnam Kutir, Kalirakha, B. Deoghar – 814112, (Jharkhand)**

## *Incumbency List of Principal*

| Sl. No. | Name of the Principals | Designation | From | To |
|---|---|---|---|---|
| 1. | Pt. Sri Lakshanlal Jha | Principal | 13.02.1984 | 21.10.1986 |
| 2. | Dr. Radhakant Thakur | I/C Principal | 22.10.1986 | 08.09.1987 |
| 3. | Dr. Keshav Kumar Roy | I/C Principal | 09.09.1987 | 03.01.1988 |
| 4. | Dr. Radha Raman Thakur | I/C Principal | 04.01.1988 | 10.07.1988 |
| 5. | Dr. Radha Raman Thakur | Principal | 11.07.1988 | 04.08.2009 |
| 6. | Dr. Keshav Kumar Roy | I/C Principal | 05.08.2009 | 01.09.2011 |
| 7. | Dr. Radha Raman Thakur | Principal | 02.09.2011 | 31.10.2011 |
| 8. | Dr. Aravind Sharma | I/C Principal | 01.11.2011 | 23.04.2012 |
| 9. | Dr. Radha Raman Thakur | Principal | 24.04.2012 | 10.07.2013 |
| 10. | Dr. Keshav Kumar Roy | I/C Principal | 10.07.2013 | 30.06.2022 |
| 11. | Dr. Gangadhar Jha | I/C Principal | 01.07.2022 | Till Date |

प्रो. श्रीनिवासः वरखेडी
कुलपतिः
Prof. Shrinivasa Varakhedi
Vice-Chancellor

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
Central Sanskrit University
Established by an Act of Parliament

के.सं.वि./कुलपति-101/2025-26/113

दिनाङ्कः –22.07.2025
श्रा. कृ. द्वादशी/त्रयोदशी, वि.सं. 2082



## वाक्प्रसूनम्

शास्त्रनवाचारसंवलितपत्रिकां कामप्यपूर्वचिन्तनधाराजनितकोशात्मिकां प्राचीनार्वाचीनगूढ-तत्त्वज्ञानपरम्परासमन्वितां संस्कृताङ्ग्लहिन्दीत्रिभाषासूत्रमालाग्रथितां नवनवोन्मेषविद्याविभूषित-धवलकान्तिविद्वज्जनवाग्व्यापारेण लब्धज्ञानविज्ञानरसात्मिकां सुरभारतीसेवकानां **"संस्कृतादर्शः"** इति नामधेयया मन्मानसप्रीतिप्रदां पत्रिकां वीक्ष्यामन्दानन्दानुभूतिमनुभवामि नितराम्।

एवमेवास्माकं सनातनशास्त्रगङ्गेयमवच्छिन्नरूपेण प्रवहमाना सकललोकान्तःकरणध्वान्ता-ज्ञानध्वंसं विधाय निर्मलभावाचारविचारचरित्रचित्रणं संरचय्य च सहृदयहृदयं पुनीयात्। महाविद्यालयोऽयं भगवतो भूतभावनस्य श्रीश्रीरावणेश्वरस्य वैद्यनाथस्य पद्मपादतले दिवानिशं स्वाचार्यनवीनप्रतिभाभाभिः प्रशस्तविकासपथं प्रयातीति तन्मत्कृते सन्तोषप्रदम्।

अत एतादृशाय महते कृतसङ्कल्पाय "संस्कृतादर्शः" इति चारुपत्रिकायै लक्ष्मी-देवी-शरॉफ-आदर्श-संस्कृत-महाविद्यालयस्य प्रधानसम्पादकाय प्राचार्यवर्याय मनीषिणे गंगाधरझावर्याय, सम्पादकाय नवविदुषे डॉ. बसन्तकुमारमुद्रावर्याय तथा चान्येभ्यः कृतभूरिपरिश्रमेभ्यः सम्पादनमण्डलिभ्यो मदीया मङ्गलकामनाः विलसन्तुतराम्।

**धरासर्वदिग्भ्यः सुधीचारुवाग्भ्यः**
**सुलब्धाधिविज्ञानकोशो गरिष्ठः।**
**प्रकाश्याशया संस्कृतादर्शनाम्ना**
**धयेयुः सुधाशास्त्रधारा रसज्ञाः॥**

(प्रो. श्रीनिवासः वरखेडी)
कुलपतिः

56-57, सांस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली-110058 (भारत)
56-57, Institutional Area, Janakpuri, New Delhi-110058 (INDIA)
(O) 011-28523949 www.sanskrit.nic.in
vc@sanskrit.ac.in/ vicechancellor@csu.co.in

**प्रो. सुकान्तकुमार सेनापति, कुलपतिः**
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'A+' श्रेण्या प्रत्यायितः)
**Prof. Sukanta Kumar Senapati,** Vice-Chancellor
Shree Somnath Sanskrit University, Veraval
(Accredited by NAAC with 'A+' Grade)

ससयु/कुलपतिः/ ७० /२०२५ दिनांक २५-०७-२०२५



## शिवसङ्कल्पमस्तु

भगवत आशुतोषस्य द्वादशज्योतिर्लिङ्गेष्वन्यतमं प्रीत्यास्पदं स्थानं **वैद्यनाथधाम** इति संज्ञया चकास्ति लोके । तत्र पुण्यप्रदेशप्रतिष्ठितप्रथितेन लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालयेन **"संस्कृतादर्शः"** इत्यभिधया प्रप्रथमं पत्रिकाप्रकाशनं समनुष्ठितमिति नितरां तोतोष्टि मे चेतः ।

**"धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति ।**
**धर्मेण पापमुपनुदति धर्मे सर्वं प्रतिष्ठितम् ॥"**

इति तैत्तिरीयवचनानुसारं नानाशास्त्रमन्थनोद्भूतविचारनवनीतसम्पन्ना व्यवहारप्रचारविचारा-त्मिका हिन्दी-आङ्ग्ल-संस्कृतेति त्रिवेणीमाहात्म्यसमलङ्कृता भारतीयज्ञानप्रणाल्याश्रिता पत्रिकेयं सामाजिकान् शोधच्छात्रान् संस्कृतरसिकान् संस्कृतसंरक्षणतत्परान् शास्त्रज्ञान् नूतनपथं प्रदर्शयिष्यतीति दृढमाशासे ।

महनीयेऽस्मिन् कर्मणि सम्पन्नसंकल्पाय लक्ष्मी-देवी-शराफ-आदर्श-संस्कृतमहाविद्यालयस्य प्रधानसम्पादकाय संस्कृतज्ञानगङ्गासंरक्षणतत्पराय प्राचार्याय डा. गङ्गाधरझावर्याय, सम्पादकाय प्रीतिभाजिने कर्मठयुवप्राज्ञाय डा. बसन्तकुमारमुद्रावर्याय तथा सर्वेभ्यः प्रकाशनकर्मसहयोगिभ्यश्च परश्शतैर्धन्यवादानभिनन्दामि । इति शम् ।

भवदीयः
सुकान्तकुमार सेनापतिः
(प्रो. सुकान्त कुमार सेनापतिः)
कुलपतिः

02876-244531, M. + 91-94997 75250
vc@sssu.ac.in
www.sssu.ac.in
Rajendra Bhuvan Road, Veraval-362265. Dist.: Gir-Somnath (Gujarat)
राजेन्द्रभुवनमार्गः, वेरावलम्-३६२२६५ गीर-सोमनाथजनपदः (गुजरातम्)

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

কুমাৰ ভাস্কৰ বৰ্মা সংস্কৃত আৰু পুৰাতন অধ্যয়ন বিশ্ববিদ্যালয়

*Kumar Bhaskar Varma Sanskrit & Ancient Studies University*

Namati, Nalbari-781337

Website:www.kbvsasun.ac.in :: Email Id:registrarkbvasasu@gmail.com

**आचार्य प्रह्लाद रा. जोशी**
कुलपतिः
**Prof. Pralhad R. Joshi**
Vice Chancellor


Ref: KBVS&ASU/VC/2012/226 Date: 30/07/2025



## अभिनन्दनपत्रम्

श्रीवैद्यनाथधाम इत्यस्मिन् पुण्यस्थले, यत्र नटराजराजः ताण्डवनृत्येन मनांसि मोदयति, तत्रैव स्थितः लक्ष्मीदेवीशराफ-आदर्श-संस्कृत-महाविद्यालयः संस्कृतशास्त्रप्रसाराय "संस्कृतादर्श" इत्यस्याः नव्यपत्रिकायाः प्रथमं प्रकाशनं कृतवान्।

एषा पत्रिका संस्कृताङ्ग्लहिन्दीभाषासमलङ्कृता, विद्वद्भिः प्रणीतैर्निबन्धैः पुष्पिताभिः, समग्रं संस्कृतरसिकसङ्घं आकर्षयिष्यति। संस्कृतवाङ्मयस्य सुधारसस्य आस्वादनाय उत्सुकानां पाठकानां हिताय चायं यत्नः प्रशंसनीयः।

एतस्मिन्नभियोगे प्रधानसम्पादकः प्राचार्यः डॉ. गङ्गाधरझावरः, सम्पादकः डॉ. बसन्तकुमारमुद्रामहोदयः च समर्पणभावेन कार्यं निष्पादयन्तः प्रशंसास्पदं कर्म समारब्धवन्तः।

विश्वासः अयं यत् – शीघ्रमेव एषा पत्रिका, श्रीवैद्यनाथकृपया, विश्रुतिं लभेत्, चिरस्थायिनीं ख्यातिं च अर्जयेत्।

इति शुभम्।

आचार्य प्रह्लाद रा. जोशी
कुलपतिः

प्रो. रा. गा. मुरली कृष्ण
कुलसचिव (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान,
शिक्षा मंत्रालय, भारत सरकार के अधीन)

Prof. R. G. Murali Krishna
Registrar (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)



## MESSAGE

A journal serves as a vibrant medium for the dissemination of knowledge and scholarly insight. “SAMSKRUTAADARSH”, the inaugural journal of Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya — a distinguished Adarsh institution situated in the divine land of Baba Baidyanath, one of the twelve revered Jyotirlingas (Manokamana Linga) — marks a commendable step toward fostering academic excellence and research.

Though this is the first publication of the Mahavidyalaya, it reflects great promise and creative potential. The initiative stands as a testament to the dedication, sincerity, and vision of the Chief Editor and the Editorial Board. I extend my heartfelt congratulations to them for this remarkable effort.

This scholarly collaboration of learned minds will undoubtedly enrich the intellectual atmosphere of the institution and inspire further academic contributions. I look forward to many such meaningful endeavors from the Mahavidyalaya in the time to come.

Wishing this journal and its team continued success and impactful reach.

**(Prof. R. G. Murali Krishna)**
Registrar I/C
Central Sanskrit University, New Delhi

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली-110058 (भारत)
56-57, Institutional Area, Janakpuri, New Delhi-110058 (INDIA)
**Ph. No.: (O)** 011-28520979, **EPABX :** 28524993, 28521994, 28524995
EMAIL : registrar@csu.co.in, pa2registrar@csu.co.in **WEBSITE :** www.sanskrit.nic.in

पत्र संख्या
Ref. No.

दिनाँक 30-07-2025
Date



## लभतां प्रतिष्ठाम्

अस्ति श्रीज्योतिर्लिङ्गेश्वरवैद्यनाथपदकमलकोमलतलतल्पतनुः श्रीलक्ष्मीदेवीसर्राफादर्शसंस्कृत-महाविद्यालयो झाडखण्डराज्यान्तर्गते नानादेवायतनायमाने देवगृहाभिधाने निधाने, यत्र नानादिग्भ्यो देशदेशान्तराणां वटवः समागत्य कण्ठस्थीकुर्वन्ति शब्दशास्त्रसूत्राणि, अधिगच्छन्ति च तन्मर्माणि; अनुसन्दधति कालगणनयाऽन्तरिक्षेऽपि ग्रहनक्षत्रादिसञ्चलनानि, फलानि चोपदिशन्ति भुवि भूतभव्यवर्तमानानाम्; काव्यालापादीँश्चाधीत्य काव्यबोधबोधनप्रणयनादिभिरास्वादयन्ति सद्यः स्वपरान्तःसुखम्; अभ्यस्य साङ्गाँश्चतुरो वेदान् मुखरीकुर्वन्ति प्रातरेव परिवेशं पावयन्त इव, भक्तान् शब्दापयन्त इव च द्विजकुललालिताः कीरा इव। प्राचार्यसमेतस्य महाविद्यालयस्यास्याचार्यकुलं सदैव शास्त्रविलाससमुन्मुखं पालयदन्तेवासिसमवायं स्वार्भकनिचयमिव सुतरां राजते प्रफुल्लकदम्बकदम्बकमिव भारतप्राचीदिग्भागे। इदं मे महते गौरवायास्ति यदत्र मादृशे पूर्वं कतिपयवर्षाणामाध्यक्ष्यभारो भारतसर्वकारेणारोपितः। इदानीमस्य महाविद्यालयस्याचार्यैः 'संस्कृतादर्शः' इति भारतीयज्ञानपरम्परा-संस्कृतिवाहिनी पत्रिका प्रकाशपदं नीयत इति निशम्य नितरां मुदितोऽस्मि। कामये च, श्रीवैद्यनाथनिरन्तकरुणया पत्रिकेयं भूयांसं प्रसारमश्नुयात्, सपरिवारो महाविद्यालयोऽयं च लभतां प्रतिष्ठामिति।

विद्यां गुणं च वितनोतु स वैद्यनाथः।

भागीरथिनन्दः

प्रो. भागीरथिनन्दः
शैक्षणिकपीठाध्यक्षः वरिष्ठाचार्यश्च
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,
नवदेहली-१६

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
NATIONAL SANSKRIT UNIVERSITY, TIRUPATI
(A Central University established by an Act of Parliament)

**Prof. Satyanarayan Acharya**
Dean, School of Sahitya & Samskrit
Chief Vigilance Officer (Part-Time)

**Email-** acharyasatyanarayan@gmail.com
Mob. No.- 7013096821

दि. 07-08-2025



## तनोतु मङ्गलं हरिः

**लौकिकानां हि साधूनामर्थं वागनुवर्तते ।**
**ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।।** -उ.रा.1.10

आसीदशेषशेमुषीभाजामृषीणां चिरसंसेवितपवित्रसुरम्यावनिः स्वच्छन्दाच्छपूतनीलोर्मिमालया प्रवहमाना गङ्गेव केतकीवनमिति । तद्वनाधिराजराजेश्वरः वैद्यमिव समस्तार्त्तानामन्तःस्थपीडामप-नोदयन् मनोकामनालिङ्गरूपेण ख्यातिमाप्नोत् । साम्प्रतं तस्यैव क्रीडाक्षेत्रं "श्रीवैद्यनाथधाम" नाम्ना चकास्ति भूतले । अस्यां पुण्यभूमौ समवस्थितो लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालयः संस्कृतशास्त्रसम्बद्धानां तथ्यानां प्रचाराय प्रसाराय च "**संस्कृतादर्श**" इत्यन्वर्थसंज्ञारूपां चिरप्रतीक्षितां पत्रिकामिमां प्रथमवारं प्रकाश्य संस्कृतशास्त्रस्थितविचारान् सर्वान् समानेतुं प्रयत्नमकरोत् ।

विद्वत्प्रणीतनिबन्धकुसुमग्रथितेयं पत्रिका विविधभाषासमलङ्कृता सती समेषां संस्कृतशास्त्र-निस्सृतपीयूषपिपासूनां महते उपकाराय कल्पयिष्यत इति प्रधानसम्पादकाय डा. गङ्गाधरझावर्याय, सम्पादकाय आयुष्मते डा. बसन्तकुमारमुद्रावर्याय तथा सर्वानपि प्रकाशनसमितिसदस्यान् स्वात्माशंसां प्रकटय्य अचिरादियं **संस्कृतादर्शपत्रिका** श्रीवैद्यनाथकृपया लोकातिकप्रतिष्ठालाभात्मकं पीयूषलाभं सुलभं कारयिष्यतीत्याशासे । इति शम् ।

सत्यनारायण आचार्यः

**( प्रो. सत्यनारायण आचार्यः)**
साहित्यसंस्कृतिसङ्कायाध्यक्षः

केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय
शिक्षा मंत्रालय, भारत सरकार के अधीन)
56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली-110058

**Central Sanskrit University**
**Established by an Act of Parliament**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University
Under Ministry of Education, Govt. of India)
56-57, Institutional Area, Janakpuri, New Delhi-110058

F.No-16/CSU/DSW/Misc/2025-26/156 दिनांकः18.07.2025



## शुभकामना सन्देश

मुझे यह जानकर अत्यन्त प्रसन्नता हो रही है कि देवभूमि श्री वैद्यनाथ बाबा के चरण कमल में प्रतिष्ठित लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालय, देवघर, झारखण्ड द्वारा अपनी शोधपत्रिका **"संस्कृतादर्शः"** का प्रथम प्रकाशन किया जा रहा है, जो कि त्रिभाषिक है। इस पत्रिका के माध्यम से महाविद्यालय में भारतीय ज्ञान परम्परा पर आधारित राष्ट्रिय सङ्गोष्ठी में प्राप्त उत्कृष्ट शोधपत्रों का प्रकाशन किया जाएगा। इस सन्दर्भ में मैथिलीशरण गुप्त की निम्न पंक्तियाँ याद आती हैं –

**यह पुण्य भूमि प्रसिद्ध है इसके निवासी आर्य हैं,**
**विद्या कला-कौशल्य सबके जो प्रथम आचार्य हैं।**
**आदर्श जन संसार में इतने कहाँ पर हैं हुए ?**
**सत्कार्य भूषण, आर्य-गण जितने यहाँ पर हैं हुए।**

उम्मीद करता हूँ कि पत्रिका के माध्यम से पाठकों को उच्च शिक्षा विषयक शैक्षणिक संस्थानों की आन्तरिक अभिवृद्धि तथा विभिन्न विषयों पर महत्वपूर्ण जानकारियां प्राप्त होंगी, जो कि उनके उज्ज्वल भविष्य हेतु सहायक सिद्ध होगी।

विशेष रूप से संस्कृतादर्श पत्रिका के प्रधान सम्पादक तथा समस्त सम्पादन मण्डली को बधाई देते हुए इस पत्रिका के उद्देश्यपूर्ण सफल प्रकाशन के लिए शुभकामनाएं प्रेषित करता हूँ।

**(प्रो. मदनमोहनझा)**
अधिष्ठाता शैक्षिकवृत्त तथा छात्र कल्याण प्रकोष्ठ
केन्द्रीय संस्कृत विश्वविद्यालयः, नई दिल्ली

**केन्द्रीय संस्कृत विश्वविद्यालय**
**संसद के अधिनियम द्वारा स्थापित**
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
शिक्षा मन्त्रालय, भारत सरकार के अधीन
56–57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली – 110058

**Central Sanskrit University**
**Established by an Act of Parliament**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110058



## शुभकामना

**आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरितास उद्भिदः ।**
**देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ।।**

पवित्र देवघर नगरी “बाबाधाम” के नाम से सर्वप्रसिद्ध है। इस देवभूमि में श्री वैद्यनाथ बाबा के चरण कमल में स्थापित लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालय अपना प्रथम प्रकाशन **"संस्कृतादर्शः"** के नाम से शोधपत्रिका के रूप में प्रकाशित करने जा रहा है, यह जानकर मुझे हार्दिक प्रसन्नता हो रही है।

इस त्रिभाषिक शोध पत्रिका में भारतीय ज्ञान परम्परा पर आधारित राष्ट्रिय सङ्गोष्ठी में प्राप्त विभिन्न विषय विशेषज्ञों एवं शोधार्थियों के शोधपत्रों का प्रकाशन किया जाएगा।

मैं महाविद्यालय परिवार के समस्त सदस्यों व विशेष रूप से **"संस्कृतादर्शः"** पत्रिका के प्रधान सम्पादक एवं समस्त सम्पादन मण्डली को बधाई देता हूँ। इस श्रेष्ठ प्रकाशन के प्रति मेरी हार्दिक शुभकामनाएं !

**प्रो. कुलदीपशर्मा**
प्रभारी अधिकारी (आदर्श)
केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली

**GENERAL ENQUIRY** : 011-28520977, 25521994, 28524993, 28524995, 28525963
**VC** : 28523949, **REGISTRAR** : 28520979, **ACD** : 28521948, **ADMIN** : 28524532, **EXAM** : 28521258, **N.F.S.E.** : 28524387, **MSP** : 28523611, **SCHEMES** : 28520966, **EMAIL** : admin@csu.co.in, **WEBSITE** : www.sanskrit.nic.in

**Prof. Shailesh Kumar Tiwari**
Professor, Dept. of Vyakaranam
S.V.D.V., BHU, Varanasi
Email: sktbwn@gmail.com
Phone: +91-9450533067

**प्रो. शैलेश कुमार तिवारी**
आचार्य, व्याकरणविभाग
संस्कृत विद्याधर्म विज्ञान सङ्काय
काशी हिन्दू विश्वविद्यालय,
वाराणसी



## अभिनन्दनम्

परमपुरुषार्थप्राप्त्युपायराजपद्धतौ सनातनपुराणपरम्परासंवाहकाः समर्पितजीवना विषयविश्लेषण-विश्रुतपण्डितप्रवरा विद्याविधानोपादानचारुचन्द्रास्यवत्याः कलोद्भवोद्भासितजनन्या रसवत्याः सरस्वत्याः सदोपासनायां निरताः प्रेयोभाजनानि कोमलप्रौढमतिमन्तः शब्दार्थशास्त्रपारदृश्वानः "रसो वै सः" इति समासाद्य तन्निःस्यन्दितस्वादुरसास्वादनोन्मुखा मधुव्रतवच्छास्त्रनिर्मलसरसपावनगवेषणात्मकतत्त्वप्रसूनप्रचयात्मिकायां व्याकरणसाहित्यदर्शनादिसारकलापरिकल्पनायामकल्पितपरिश्रमेण श्रमेण साध्यायां पत्रिकायां विविधगभीर-ग्रन्थग्रन्थिस्फोरकभावमञ्जूषायां प्ररंस्यन्त इत्यधुनानुमन्ये।

महतः प्रमोदस्यायमवसरः यत्संस्कृतमातुः प्रचारेण प्रसारेण सह महाविद्यालयोऽयं स्वकीयप्रकाशनेन ख्यातिमाप्तुमीहत इति । तदर्थं विविधशास्त्रतत्त्वसम्भारग्रथितायाः **"संस्कृतादर्श"** इति शोधपत्रिकायाः प्रकाशनाय श्रीरावणार्चितरावणेश्वरस्य भगवच्छ्रीवैद्यनाथस्य पावनावनौ स्थितस्य लक्ष्मी-देवी-शराफ-आदर्श-संस्कृत-महाविद्यालयस्य प्रधानसम्पादकाः साहित्यकोविदाः श्रीमन्तः प्राचार्यवर्या डॉ. गंगाधरझावर्याः, आचार्याः सम्पादकाः कुशाग्रमतयो डॉ. बसन्तकुमारमुद्रावर्याः ससमिति चाभिनन्द्यन्ते नितरां प्रशंस्यन्त इति शम्।

**प्रो. शैलेशकुमारतिवारी**

e-mail : ldsasmahavidyalaya@gmail.com
website : www.ldsasmahavidyalaya.com

लक्ष्मी देवी शराफ आदर्श संस्कृत महाविद्यालय

[भारत सरकार द्वारा संचालित]

केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली से सम्बद्ध

हरिःशरणम् कुटीर, कालीराखा, बी० देवघर - 814112 (झारखण्ड)

LAKSHMI DEVI SHROFF ADARSH SANSKRIT COLLEGE

(Under Government of India)

Affiliated to Central Sanskrit University, New Delhi

Harisharnam Kutir, Kalirakha, B. Deoghar - 814112 (Jharkhand)

**पत्राङ्क:** *151/1/प्रकाशन/2025-26/02* **दिनाङ्क:** *03.09.2025*



## ***Greeting Message***

I am extremely happy to know that Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya, Deoghar, Jharkhand, established at the lotus feet of Shree Baidyanath Baba in Devbhomi, is publishing its Research Journal ***"SAMSKRUTAADARSH"*** for the first time, which is trilingual. Through this journal, excellent research papers received in the national seminars based on Indian Knowledge Tradition will be published by the college. In this context, I hope that through the research journal, readers will get important information on internal growth of educational institutions related to higher education and various subjects which will prove helpful their bright future.

I especially congratulate the Editor-in-Chief of the ***"Samskrutaadarsh"*** Research Journal and the entire Editorial Board and send my best wishes for the successful publication of this journal.

रम्याणि वीक्ष्य मधुराणि मनोहराणि
पत्राणि शोधपरकाणि सुशिक्षकाणाम् ।
वेदाङ्गदर्शनकलाप्रतिमण्डिताऽऽशु
देदीप्यतां भुवितले नवपत्रिकेयम् ।।

***Prof. Rampoojan Pandey***
**Chairman, Managing Committee**
**L.D.S.A.S. Mahavidyalaya**
**Deoghar, Jharkhand**

e-mail : ldsasmahavidyalaya@gmail.com
website : www.ldsasmahavidyalaya.com

# लक्ष्मी देवी शराफ आदर्श संस्कृत महाविद्यालय

[भारत सरकार द्वारा संचालित]
केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली से सम्बद्ध
हरिःशरणम् कुटीर, कालीराखा, बी० देवघर - 814112 (झारखण्ड)

## LAKSHMI DEVI SHROFF ADARSH SANSKRIT COLLEGE

(Under Government of India)
Affiliated to Central Sanskrit University, New Delhi
Harisharnam Kutir, Kalirakha, B. Deoghar - 814112 (Jharkhand)

**पत्राङ्कः** *151/1/प्रकाशन/2025-26/03* **दिनाङ्कः** *03.09.2025*



## शुभाशंसा

**न कर्मणा लभ्यते चिन्तया वा नाप्यस्ति दाता पुरुषस्य कश्चित् ।**
**पर्याययोगाद् विहितं विधात्रा कालेन सर्वं लभते मनुष्यः ।। -** शान्तिपर्व, 25.5

सम्प्रति सोऽयं कालः समुपागतः । द्वादशज्योतिर्लिङ्गेष्वन्यतमस्य भगवतः श्रीवैद्यनाथस्य असीमानुकम्पया द्वाचत्वारिंशवयसि समुपस्थितस्यास्य महाविद्यालयस्य प्रथमाकृतिः **“संस्कृतादर्शः”** इत्यभिधाना शोधपत्रिका प्राकाश्यमानीयत इति हर्षमनुभवामि । समग्रे विश्वे भारतं भारतीयसंस्कृतिश्चात्युन्नतपदं बिभ्राणा चकास्ति । भारतीयसंस्कृतेः बीजरूपा भवति संस्कृतभाषा । अस्यां भाषायां समग्रविश्वस्यातिप्राचीनसाहित्यानि अष्टादशविद्यास्थानानि च विलसन्ति । एतेषां समस्तशास्त्राणां परमं लक्ष्यं विद्यते मानवेषु विवेकसम्पादनम्। विवेको हि कर्तव्याकर्तव्यकर्मसम्पादनमनीषां जनयति । अत एवम्भूतानां समस्तशास्त्राणां रक्षणम्, प्रसारः प्रचारश्च अस्माकं परमं कर्तव्यं भवति । अनया प्रतिज्ञया झारखण्डप्रदेशस्य देवघरनगरे सुप्रतिष्ठितोऽयं महाविद्यालयः संस्कृतमातुः तच्छास्त्राणां च प्रचारे प्रसारे कटिबद्धः स्वप्रातिभं प्रदर्शयति । केवलं संस्कृतस्य प्रचारे प्रसारे प्रतिभां प्रदर्शयतीति न, अपितु अध्ययनम्, अध्यापनम्, अनुशासम्, प्रकाशनमित्यादीनि अङ्गानि आदाय अग्रे प्रयतते असौ महाविद्यालयः । अतः तेष्वङ्गेषु प्रकाशनरूपस्य प्रमुखाङ्गस्य सुन्दरं रूपं दातुं महाविद्यालयः प्रथमं प्रयासं विदधाति । भारतीयज्ञानपरम्परामाश्रित्य समायोजितायां राष्ट्रियशोधसङ्गोष्ठ्यांविदुषां शोधपत्राणि आकलय्य **“संस्कृतादर्शः”** इति नामिका शोधपत्रिका महाविद्यालयस्य चिराभिलसिता मनोज्ञा प्रपूरयेदिति सम्पादकाय कार्तज्ञ्यं वितनोमि ।

एवमेव प्रतिवर्षं निरवच्छिन्नभावेन संस्कृतादर्शः स्वसौरभेण समस्तपाठकान् आह्लादयिष्यतीति आशासे ।

**। इति शम् ।**

गङ्गाधर झा

**डा. गङ्गाधरझा**
प्र. प्राचार्यः
लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयः

# सम्पादकीयम्



**"विद्ययाऽमृतमश्नुते"** इति श्रुतिचोदितपन्थानमनुसृत्य भारतीयज्ञानपरम्परायाः प्रचारे प्रसारे च कटिबद्धस्य झारखण्डराज्यस्य पवित्रदेवघरनगरे द्वादशज्योतिर्लिङ्गेष्वन्यतमस्य कामनालिङ्गरूपेण सुप्रतिष्ठितस्य भगवतः श्रीवैद्यनाथमहाप्रभोः चरणनलिनयोः विद्यमानस्य कालिराखायां हरि:शरणं कुटीर इत्याख्यायां सुशोभितस्य लक्ष्मीदेवीशराफआदर्शसंस्कृतमहाविद्यालयस्य प्रथमा अनन्या च **"संस्कृतादर्शः"** इति नामिकेयं कृतिः सुमनोमानसान्तःकरणं परामर्ष्टुं समुद्गतेति मोमुद्यते मे मनः।

महाविद्यालयस्यास्य राष्ट्रियशोधसङ्गोष्ठीनिमित्तं समाहूतानां भारतदेशस्य विभिन्नेषु विश्वविद्यालयेषु समुपागतानां विदुषां करकमलप्लाविता, श्रुतिस्मृतिव्याकरणज्योतिषन्यायमीमांसादिशास्त्रोन्मथिता, ज्ञानविज्ञानशेमुषीभ्राजिता, संस्कृत-हिन्दी-आंग्ल-पर्यावरण-इतिहास-सङ्गणकादिविषयोपबृंहिता, नाना शोधप्रबन्धसङ्ग्रहात्मिका **"संस्कृतादर्शः"** इत्यभिधाना शोधपत्रिका साम्प्रतं सुमनसां मनांसि मोदयितुं करपल्लवस्पर्शसुखं चाप्तुं प्राकाश्यमानीयत इति विजानीमो वयम् ।

अत एतादृशमहनीयकर्मसम्पादनाय महाविद्यालयस्यास्य सर्वगुणगणमण्डितानां प्राचार्याणामाज्ञया समीक्षासमिति-परामर्शदात्रीसमिति-सम्पादनसमितिसदस्यानां निरन्तरमार्गदर्शनेन च प्रकाशनकार्यमिदं सफलतामगादिति सर्वान् विद्वत्तल्लजानहं कार्तज्ञ्यमभिव्यनज्मि । किञ्च पत्रिकेयं समेषां विदुषाम्, पाठकानाम्, शोधार्थिनां महते उपकाराय बोभविष्यतीति विश्वसिमि । एतदर्थं काचिद् सुधामयी भणितिः निस्ससार -

**सौभाग्यात्समुपागतोद्य समयो गङ्गाधरानुग्रहात्**
**स्निग्धैर्बन्धुजनैर्चिराभिलसिता सौख्यप्रदा मानदा ।**
**शास्त्रज्ञानपरम्परादिमथिता विज्ञानदिग्दर्शिका**
**राज्यात्संस्कृतपत्रिका भुवितले आदर्शरूपैव सा ।।**
**संस्कृतादर्श इत्यभिधाना सुपत्रिकेयं चिरं जयतु ।**
**किञ्च कुलानि सुमनसां निसर्गसम्यञ्चि रञ्जयतु ।।**

अद्यप्रभृतिः लोके भगवतः श्रीवैद्यनाथस्यानुकम्पया "संस्कृतादर्शः" इत्यभिधाना शोधपत्रिका भारतीयज्ञानपरम्पराश्रितानां शोधपत्राणां सङ्ग्रहात्मकरूपेत्यगाधिष्यतेति शम् ।

विदुषां वशंवदः
**बसन्तकुमारमुद्रा**
सम्पादकः

samskrutaadarsh2025ldsasm@gmail.com
www.ldsasmahavidyalaya.com
dr.bkmudra@gmail.com
+91-9178907081

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

(संसदः अधिनियमेन स्थापितः)

# CENTRAL SANSKRIT UNIVERSITY, NEW DELHI

(Established by an Act of Parliament)

## आन्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठः

## INTERNAL QUALITY ASSURANCE CELL

# श्रेणीकरणप्रमाणपत्त्रम्

# Certificate of Gradation

नवदेहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कार्यपरिषद्
लक्ष्मीदेवीशराफ-आदर्शसंस्कृतमहाविद्यालयाय
(हरिःशरणम् कुटीरः, कालीराखा, बी. देवघरः, झारखण्डः-814112)
सांस्थानिकप्रत्यायनपूर्वकं चतुरङ्कमानदण्डेषु 2.60 CGPA अङ्कैः
"B+" इत्येतां श्रेणीं सहर्षं समुद्घोषयति।

**The Executive Council of**
**Central Sanskrit University, New Delhi**
**is pleased to declare the gradation of**
**Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya**
**(Harisharnam Kutir, Kalirakha, B. Deoghar, Jharkhand-814112)**
**with CGPA score of 2.60 on four point scale**
**at "B+" institutional grade.**

निर्गमनदिनाङ्कः | issued on : 26/11/2024

"प्रमाणपत्त्रमिदं निर्गमनदिनाङ्कात् वर्षत्रयं यावत् वैधतां भजते।"
"Valid for three years from the date of issue of this certificate"

निदेशकः, आ.गु.प्र.प्र. | Director, IQAC

कुलपतिः | Vice-Chancellor

सत्यमेव जयते

# केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली

(संसदः अधिनियमेन स्थापितः)

# CENTRAL SANSKRIT UNIVERSITY, NEW DELHI

(Established by an Act of Parliament)

## आन्तरिकगुणवत्ताप्रत्यायनप्रकोष्ठ:

## INTERNAL QUALITY ASSURANCE CELL

### IQAC Grade Sheet

Name of ASM : Lakshmi Devi Shroff Adarsh Sanskrit Mahavidyalaya

Address : Harisharnam Kutir, Kalirakha, B.Deoghar, Jharkhand-814112

| Attribute | Weightage | Marks Obtained |
|---|---|---|
| Attrib.1 – Curriculum | 70 | 43.37 |
| Attrib.2 – Research & Innovation Outcomes | 50 | 23.87 |
| Attrib.3 – Co-curricular, Extra-curricular and Sustainability Engagements | 80 | 40.27 |
| Attrib.4 – Sustainability Outcomes including Green Initiatives | 100 | 51.17 |
| Attrib.5 – Teaching & Learning | 100 | 64.67 |
| Attrib.6 – Governance and Administration | 150 | 95.87 |
| Attrib.7 – Student Outcomes | 100 | 59.53 |
| Attrib.8 – Faculty Resources | 100 | 76.57 |
| Attrib.9 – Infrastructure | 100 | 69.47 |
| Attrib.10 – Financial Resources | 150 | 124.63 |
| Total | 1000 | 649.42 |

Institutional Grade = B+ CGPA Score = 2.60

Issued on : November 26, 2024

Director, IQAC

Vice Chancellor

# विषयसूची


| क्रमः | विषयः | पृष्ठसंख्या |
|---|---|---|
| 1. | कालिदाससाहित्ये स्त्रीमहत्ता<br>**डॉ. गंगाधरझा (प्र. प्राचार्यः)** | 1-8 |
| 2. | संस्कृतव्याकरणे प्रक्रियाक्रम-अष्टाध्यायीक्रमयोः विमर्शः<br>**डॉ. शशिभूषणमिश्रः** | 9-32 |
| 3. | शैक्षणिकसंस्थानामान्तरिकगुणवत्ताऽभिवृद्धये भारतीयज्ञानप्रणाल्या उपादेयता<br>**डॉ. चिरञ्जीवी अधिकारी** | 33-40 |
| 4. | आन्तरिकगुणवत्ताविकासे काव्यशास्त्राणामुपादेयता<br>**डॉ. बसन्तकुमारमुद्रा** | 41-50 |
| 5. | आधुनिकयुगे विविधदर्शनानां प्रायोगिकदृष्ट्या अध्ययनम्<br>**डॉ. नन्दिघोषमहापात्रः** | 51-56 |
| 6. | संस्कृतमधीयानानां छात्राणां विकासाय शब्दशास्त्रस्योपयोगिता<br>**डॉ. नितेशकुमारद्विवेदी** | 57-60 |
| 7. | कालसमीक्षणम्<br>**डॉ. नवनीतशर्मा** | 61-74 |
| 8. | शैक्षणिकसंस्थानामान्तरिकगुणवत्ताऽभिवृद्धये विविधदर्शनानामुपादेयता<br>**डॉ. नीरजकुमारभार्गवः** | 75-78 |
| 9. | शैक्षिकान्तरिकगुणवत्तावृद्धये प्राचीनाधुनिकशिक्षाव्यवस्थयोरुल्लिखितानि तत्त्वानि<br>**डॉ. महेशकुमारपाणिग्राही** | 79-87 |
| 10. | पारम्परिकसंस्कृतच्छात्राणामान्तरिकविकासाय शाङ्करदर्शनस्य महत्त्वम्<br>**डॉ. विभुदत्तमिश्रः** | 88-93 |
| 11. | शिक्षाया आन्तरिकगुणवत्तापरिशोधनाय व्याकरणशास्त्रे त्रिमुनिचिन्तनम्<br>**डॉ. राहुलपोखरियालः** | 94-98 |
| 12. | शिक्षार्थीनामभिवृद्धये विवेकविलासस्य योगदानम्<br>**डॉ. जयदेवदिण्डा** | 99-112 |
| 13. | वास्तुशास्त्रस्य लोकोपयोगिता महत्ता च<br>**डॉ. किसलयकुमारझा** | 113-120 |
| 14. | न्यायशास्त्रोक्तदृष्ट्या गुणवत्ताऽभिवर्धनोपायः<br>**डॉ. पीताम्बरमिश्रः** | 121-125 |

15. भारतजनकीयकाव्ये विद्यार्थिनां गुणवत्ताऽभिवर्द्धनोपायाः 126-130

**श्रीमती कृष्णानन्दः**

16. प्राचीन भारतीय इतिहास का भारतीय ज्ञानप्रणाली में योगदान 131-138

**डॉ. शिव शंकर यादव**

17. शैक्षणिक संस्थाओं की आन्तरिक गुणवत्ता अभिवृद्धि में आयुर्वेद की उपादेयता 139-145

**डॉ. गौतम कुमार राजहंस**

18. आंतरिक शैक्षणिक गुणवत्ता के संदर्भ में हजारी प्रसाद द्विवेदी का मन्तव्य 146-150

**डॉ. रघुवर चौधरी**

19. The Nyaya Shastra: The Logical Back bone of The Indian Knowledge System. 151-155

**Dr. G. Jayamanikya Shastri**

20. Quality Education and Sustainable Development in the context of Indian Knowledge System: A futuristic Approach. 156-158

**Dr. Sanjay Agnihotri**

21. The Importance of English in Quality Development of IQAC in Present Era 159-166

**Dr. Rakesh Kumar Pandey**

22. The Significance of IKS in the Environmental Quality Enrichment of Academic Institutions 167-174

**Debopam Mukhopadhyay**

23. The Importance of Computer Science in Quality Development of IQAC in Present Era 175-185

**Abhishek Kumar Singh**

24. The Role of ICT In Preserving Traditional Knowlwdge 186-194

**Chandeshwar Yadav**

25. Reclaiming Our Roots: The Enduring Legacy of Indian Knowledge System 195-203

**Ms. Priya**

ISBN: 978-81-930770-3-0

# कालिदाससाहित्ये स्त्रीमहत्ता

डॉ. गंगाधर झा*

**पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ।।**

कालिदासस्य साहित्ये नारी इति विषयमवलम्ब्य प्रथमं तावदभिज्ञानशाकुन्तलमेव उदाहरामि । कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलमिति विदितचरमेव विदुषाम् । अत्रापि शकुन्तला राज्ञोदुष्यन्तस्य चरित्रमपेक्षया कामपि अनिर्वचनीयामभिख्यामभिव्यनक्ति। आखेटार्थं कण्वाश्रमे राज्ञः प्रवेशो भवति। तत्र गान्धर्वविधिना शकुन्तलामुद्वाह्य तया सह किञ्चित् कालं व्यतीत्य दुष्यन्तः स्व भुवनं प्रतिगच्छति। स्वपुरे स्थितः राजा दैवदुर्विपाकात्कण्वशापप्रभावाच्च सकुन्तलां विस्मरति[1] तथापि कण्वाज्ञया शकुन्तला राजकुलं प्रतिगच्छति । तत्र राजसभायां कण्वान्तेवासिनौ कण्वसमन्देशं निवेदयामासतुः[2] । इत्थं कण्वान्तेवासिनोः निवेदनं श्रुत्वाऽपि कण्वान्तेवासीभ्यां साधिक्षेपपुरस्सरं[3] दुष्यन्तः शकुन्तलां नांगीकरोति। किञ्चाभिज्ञानेन शकुन्तलां स्वीकरिष्यतीति दुष्यन्तः वदति । तथापि तत्र शकुन्तला धैर्यमवलम्ब्य शोकसंविग्नमनसा “पतिकुले तव दास्यमपि क्षमम्”[4] इति विचिन्त्य तिष्ठति। अथ च शकुन्तला भगवति बसुन्धरे ! देहि मे विवरम्[5] इत्यादि बहुधोक्त्वा रुदन्ती स्वानि भागधेयानि निन्दन्ती तत्रैव तिरोबभूव[6]। तथापि शकुन्तला पातिव्रत्यधर्मं न परित्यजति।

एवमेव कुमारसम्भवे तपश्चरन्त्या पार्वत्या सह ब्रह्मचारिणः शिवस्य वार्तालापप्रसङ्गः कमपि रामणीयकं विशिनष्टि। यथा -

**अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः।**
**ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ।।**[7]

पुनश्च- **निवार्यतामालि किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**
**न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ।।**[8]

किम्बहुना मेघदूतनामके खण्डकाव्येऽपि मम मत्या यक्षापेक्षया यक्षिण्याः चरित्रमेव देदीप्यतेतराम्। प्रवासगतस्य यक्षस्य विरहे वर्षं यावद् विरहमनुभूयापि सा पातिव्रत्यं न जहाति। शास्त्रोचितविधिना सर्वाण्यप्यलंकरणसाधनानि हित्वा पत्युः प्रतिक्षायां तिष्ठति। अत्र स्वयमेव यक्षः वदति यथा – **सा सन्यस्ताभरणमवला पेशलं धारयन्ती**
**शय्योत्संगे निहितमसकृद् दुःखदुःखेन गात्रम् ।**[9]

रघुवंशेऽपि सुदक्षिणायाः वैशिष्ट्यमवलोक्यते । यदा सुदक्षिणा गर्भावस्थायां किमपि दोहदलक्षणं वस्तुजातं पति शंसति तदा –

**न मे ह्रिया शंसति किञ्चिदीप्सितं स्पृहावती वस्तुषु केषु मागधी।**
**इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ।।**[10]

*प्र. प्राचार्यः, ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

एवमेव मालविकाग्निमित्र-विक्रमोर्वशीयनाटकयोरपि नायिकयोः मालविकायाः उर्वश्याश्च चरित्रमेव विशिष्यते। उर्वशी रूपवती गुणवती च विद्यते। तत्र मानुषीदैवीप्रकृत्याः सम्मिश्रणं विद्यते। प्रथमं राजानमुपकरोति पश्चात् प्रेमासक्ता भवति । राजानं प्रति तस्याः प्रेम अतीव निर्दुष्टं ईर्ष्याशून्यञ्च विद्यते । अत एव नवजातमपि पुत्रं दूरे स्थापयति येन पत्युः प्रेम्णि कश्चनान्तरायो न स्यात् । इत्थं निश्चप्रचं वक्तुं शक्यते यत् कालिदासस्य साहित्ये नारी सर्वत्र कुलवधूरूपैव प्रतिभाति ।

अथ च शाकुन्तले यस्याः नारीरूपायाः शकुन्तलायाः वर्णनं विद्यते सा मूलतः विश्वामित्रस्य मेनकायाश्चाप्सरस औरसपुत्री विद्यते । तथाप्येनां प्रति कण्वस्य औरसनिर्विशेषस्नेह अवलोक्यते । “सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्”[11] । पुनश्च अस्याः रूपलावण्य-मत्यन्तं चित्ताह्लादकरं विद्यते । अत एव स्वयं दुष्यन्तः कथयति यत् “मधुरमासां दर्शनम्” । यथोक्तम् –

**शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।**
**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ।।**[12]

पुनश्चेयं मेनकायाः कन्या विद्यत इति ज्ञात्वा साश्चर्यं वदित यत्-

**मानुषीषु कथं वा स्यादस्य रूपस्य सभवः ।**
**न प्रभातरलं ज्योतिरुदेति वसुधातलादिति ।।**[13]

एतावदेव न तस्य मनसि संतुष्टिः संजाता । स कथयति चीरवल्कलधारिण्या अप्यस्याः सौन्दर्यं रामणीयकं प्रतिभाति । किञ्च -

**सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मघुराणां मण्डनं नाकृतीनाम् ।।**[14]

अन्यत्रापि प्रियंवदा शकुन्तलायाः तुलनां विकसितलतया सह करोति । यथा-

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।**
**कुसुममिव लोभनीयं यौवनमंगेषु सन्नद्धम् ।।**[15]

इत्थं दृढं वक्तुं शक्यते यत् कालिदासस्य नारी सौन्दर्यस्य पराकाष्टा विद्यते । लज्जाशीलतायामपि नान्या कापि नारी अस्याः तुलनामधिगच्छति । राज्ञो दुष्यन्तस्य दर्शनानन्तरं यदा तस्यां कामवासना जागृता भवति तदा सा चिन्तयति यत् मम मनसि तपोवनविरोधिभावः कथमुत्पन्नः । लज्जावशात् सा स्वकीयं मनोगतभावं सखीनपि न कथयति । राज्ञा दुष्यन्तेन प्रणयानुरोधेऽपि आत्मसमर्पणं कर्तुं नेच्छति । अत एव सा कथयति पौरव! रक्ष विनयन् । मदनसन्तप्तापि न खल्वात्मनः प्रभवामि । अथ च आत्मसमर्पणानन्तरं लज्जावशादन्योन्यमाश्रम-वासिनमपि न किमपि वृत्तान्तं कथयति । आकाशवाणीद्वारा कण्वः सर्वं वृत्तान्तमवगच्छति । अनन्तरं कण्वाज्ञया सा राजकुलं गच्छति तत्रापि यदा राजा तां न स्वीकरोति तदा सा धैर्यमवलम्ब्य परिमिताक्षरेण राजानं स्मारयति । अन्ते च दुष्यन्तं प्राप्यानन्दमनुभवति तथा च राज्ञा सह गुरुजनसमीपं गन्तुं लज्जामनुभवति ।

शकुन्तला अतीव पतिपरायणा नारी विद्यते । यदा राजा गांधर्वविधिना तामुद्वाह्य स्वभवनं जगाम तदा सा रात्रिन्दिवा तद् वियोगाच्च कर्षिता संजाता । अस्मिन्प्रसंगे तस्याः सखी कथयति

 ISBN: 978-81-930770-3-0

भर्तृगतया चिन्तयाऽऽत्मानमपि नैषा विभावयति, किं पुनरागन्तुकम् । पुनश्च पंचमांके स्वकीयं प्रत्याख्यानं श्रुत्वा मृत्युं चिन्तयति परन्तु नान्यं जनं पतिरूपेण वरयितुमिच्छति । ईदृशी अस्ति अस्याः पतिपरायणता । अथ च पातिव्रत्यप्रभावेण शापावसाने सति राजा दुष्यन्तोऽपि आतुरो भूत्वा शकुन्तलां प्राप्तुमिच्छति तथा च तस्याः दुरवस्थां दृष्ट्वा दुःखमनुभवति । अनन्तरं पूर्वकृतप्रत्याख्यानविषये क्षमायाचनां करोति । तत्रापि सरलहृदया शकुन्तला दुष्यन्तोपरि दोषारोपणं न करोति अपितु स्वकीयं भाग्यमेव क्रोशति । यथा नूनं मे सुचरितप्रतिबंधकपुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीद येन सानुक्रोशोऽप्यार्यपुत्रो मयि वीररसः संवृत्तः। कलाचातुर्य-विषयेऽपि न काप्यन्या नारी अस्याः तुलनामधिगच्छति, सा अतीव गृहकार्यदक्षा विद्यते । वृक्षसेचनं, पशुपक्षिणा सह स्नेहप्रदर्शनं विशिष्टातिथिसत्कारादिकलास्वपि सा निपुणा विधते। अत एव कुलपतिः कण्वोऽपि शकुन्तलामेवाश्रमभारं दत्वा तीर्थयात्रां गच्छति । काव्यनिर्माणेऽपि सा निपुणा दृश्यते यतोहि स्वकीयविरहवेदनामार्यावृत्ते लिखित्वा दुष्यन्तं प्रेषयति । यथा-

**तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि ।**
**निघृण ! तपति वलीयस्त्वयि वृत्तमनोरथान्यंगानि ।।**[16]

अस्मिन् पद्ये स्वकीयं मनोभावं प्रदर्शयन् कलाप्रवीणताञ्च प्रदर्शयति । इयं प्रकृतिप्रियापि वर्तते । यद्यपि सा सुकोमला, तथापि वृक्षसेचनं न परित्यजति । अलंकारप्रियाऽपि सा वृक्षस्य नूतनकिसलयं न त्रोटयति । पुष्पं दृष्ट्वा उत्सवमनुभवति । यथा -

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।**[17]

अथ च कालिदासस्य नारी छलछद्मरहिता विद्यते यथा यदा शकुन्तला गच्छति तत्र अङ्गुलीयकमलभमाना सा विषण्णा भवति । तां दृष्ट्वा राजा उपहासं करोति यत् स्त्रीषु छल-कपटस्य सहजनिवासः भवति । तदा गौतमी शकुन्तलाविषये कथयति यत् महाभाग । नार्हस्येवं मन्त्रयितुम् । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य । अस्या अन्तःमनसः सहजता विद्यते । यथा- **दर्भाकुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा ।**
**आसीद्विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणान् ।।**[18]

अनेन शकुन्तलायाः नितान्तं मुग्धत्वं सिद्ध्यति। पुनश्च शकुन्तला सती साध्वी नारी विद्यते। सा निरन्तरं तपस्विनीव चारित्र्यरक्षणे निमग्नाऽस्ति । यथा -

**वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।**
**अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ।।**[19]

पुनश्च शकुनालायां सर्वे गुणाः समरूपेण विराजमानाः सन्ति । यथा-

**भावो हावश्च हेला च त्रयस्तत्र शरीरजाः ।**
**शोभाकान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता ।।**

 ISBN: 978-81-930770-3-0

**औदार्यं धैर्यमित्येते सप्तभावाः अयत्नजाः।**

समीक्षणानन्तरं शाकुन्तले शकुन्तलायाः चरित्रंवैशिष्ट्यञ्च देदीप्यतेतरामिति दृढं वक्तुं शक्यते। एवमेव कुमारसम्भवेऽपि नारीरूपायाः पार्वत्याः चरित्रमेव सर्वत्र विशिष्यते । स्वकीयं समक्षमेव शिवेन दहता मनोभावं दृष्ट्वा भग्नमनोरथा सा स्वकीयं सौन्दर्यं हृदयेन निनिन्द। यतोहि **"प्रियेषु सौभाग्यफला हि चारुता"**[20] पुनश्च सा पतिरूपं शिवं प्राप्तुं समाधिमास्थाय तपः कर्तुमियेष। तथा च नातिदीर्घकालेन उग्रतपसा तपोवनमपि पावनं चकार। यथा- **"तपोवनं तच्च बभूव पावनम्"**[21] । पुनश्च तपस्यमानायाः पार्वत्याः वटुकब्रह्मचारिणा शिवेन सह साक्षात्कारो भवति तत्रापि सा स्ववंशपरम्परानुसारं तस्य अतिथिसत्कारं करोति। शिवोऽपि प्रसन्नो भूत्वा तां कुशलं पृच्छति। यथा- **"अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्"**[22] । अनन्तरं सः पार्वत्या अभीष्ट सखीमुखेन ज्ञात्वा शिवस्य निन्दां करोति। यथा-

**वपुर्विरूपाक्षमलक्ष्यजन्मना दिगम्बरत्वेन निवेदितं वसु।**
**वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ।।**[23]

परन्तु दृढ़प्रतिज्ञा सा कोपभावेन तं ब्रह्मचारिणं कथयति यत् त्वं शिवस्य पारमार्थिकां स्वरूपं न जानासि अत एव एवं वदसि। यतोहि -"द्विषन्ति मन्दाश्चरितं महात्मनाम्"[24] । पुनश्च निरुत्तरयन् सा कथयति यत्-

**अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः ।**
**स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः ।।**[25]

अग्रे सा शिवस्य निन्दामसहमाना विवादेनालमिति उक्त्वा स्वसखीन् पुनः स्फुरितोत्तराधरं वटुं निवारयितुमादिशति । यतोहि – **गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ।।** इति मत्या यदा सा अन्यत्र गन्तुमैच्छत् तदा स स्वकीयं रूपं दर्शयामास। अथ च हस्तावलम्बं कृत्वा उवाच-

**अद्य प्रभृत्यवनतांगि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।**
**अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ।।**[26]

इत्थं पार्वत्याः चारित्र्यं विशिष्यतेतराम। किम्बहुना एवमेव रघुवंशेऽपि नार्याः सुदक्षिणायाः पातिव्रत्यप्रसंगे स्वयमेव कालिदासः कथयति यत् नन्दिनीवनगमनसमये दिलीपस्य धर्मपत्नी तथा पतिव्रतासु अग्रगण्या सुदक्षिणा तथैव सुशुभे यथा श्रुतेरर्थमिव स्मृतिः गच्छति । यथा-

**तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।।**[27]

पुनः यदा सा गर्भवती भवति तदा सर्वानपि भोग्यपदार्थान् त्यक्त्वा सा उत्तमपुत्रप्राप्त्यर्थं मृत्तिकां भक्षयति। यथा -

**दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः।**
**अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्धान्यरसान्विलंघ्य सा ।।**[28]

ISBN: 978-81-930770-3-0

इत्थं सुदक्षिणाया अपि चारित्र्यं विशिष्यते। पनुश्च यदा इंदुमतीस्वयंवरप्रसंगे नानादिग्देशा-दागता राजानः इन्दुमतीमनवाप्य विवर्णभावं सम्प्राप्ताः तदातस्मिन् प्रसंगे स्वयमेव कविः कथयति यथा- **सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीताय पतिंवरा सा।**

**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।**[29]

अनेन सुस्पष्टं प्रतीयते यत् इन्दुमती प्रकृत्या सुन्दरी तथा गुणवती, विदग्धा चासीत्।

एवमेव सीताया अपि चारित्र्यं कालिदासस्य साहित्ये वैशिष्ट्यमावहति। यदा सा लक्ष्मणेन वने विसर्जिता तदा सा लक्ष्मणाय न क्रुध्यति अपितु स्वकीय भाग्यमेव क्रोशति। भर्तुराज्ञया इत्थं कृतमिति लक्ष्मणं पराधीनं ज्ञात्वा सा सप्रसन्ना कथयतियत-

**सीता तमुत्थाय जगाद वाक्यं प्रीताऽस्मि ते सौम्य चिराय जीव।**

**बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वम्।।**[30]

पुनः सा कथयति यत् इतो गत्वा श्वश्रूजनं मत्प्रणामः विज्ञापनीयः। अत्रापि यथा -

**श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः।**

**प्रजानिषेक मयि वर्तमानं सूनोरनुध्यायत चेतसेति ।।**[31]

पुनश्च स्वपतिं रामं प्रति तस्या इयमुक्तिः द्रष्टव्येति। यथा-

**वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धानपि यत्समक्षम्।**

**मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ।।**[32]

सीता सती साध्वी नारी वर्तते। नानादुःखमनुभूयापि सा "विपदि धैयम्" इति कृत्वा साहसपूर्वक धैर्यमवलम्ब्य स्वात्मानं पाति न तु आत्महत्यामिच्छति। सा गर्भस्थशिशुं प्रति शोचति तथा रामेण सह अन्यस्मिन् जन्मनि मम वियोगः न स्यात् एतदर्थं सागर्भस्थ शिशुं निष्क्रमणानन्तरं सूर्यनिविष्टदृष्टिं तपश्चरितुमिच्छति। यथा -

**किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन्।**

**स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ।।**[33]

अन्यच्च- **साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।**

**भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ।।**[34]

एतावदेव नहि यदा रामस्य समीपे वाल्मीकिः सीतां स्वचरितविषये स्ववृत्ते वा प्रजाजनं निःसंशयं कर्तुं कथयति तदा सा कथयति यत् – यांमनः कर्मभिः पतिविषये यदि नास्ति मे व्यभिचारः तर्हि हे विश्वंभरे देवि। मामन्तर्घातुमर्हसि। यथा –

**वाङ्मनः कर्मभिः पत्यौ व्यभिचारो यथा न मे।**

**तथा विश्वम्भरे देवि मामन्तर्धातुमर्हसि ।।**[35]

अनन्तरं पतिव्रतया सीतया एवमुक्ते सति भुवः रन्ध्रात् शातर्ह्रदं वैद्युतं ज्योतिरिव प्रभामण्डलमुद्ययौ। तत्र समुद्ररसना साक्षाद् वसुन्धरा प्रादुरासीत् तथा भर्तरि प्रणिहितेक्षणां दत्तदृष्टिं सीतामंकमारोप्य तस्मिन् भर्तरि रामे मा हरेति व्याहरन्तमनादृत्य पातालमभ्यगात् यथा -

**सा सीतामंकमारोप्य भर्तृप्रणिहितेक्षणाम्।**

 ISBN: 978-81-930770-3-0

**मा मेति व्यवहरत्येव तस्मिन् पातालमभ्यगात् ।।**[36]

किमिदं सीतायाः वैशिष्ट्यं चारित्र्यञ्च न सफलयति । नूनमेव कालिदासस्य साहित्ये आदर्शभूतायाः सीतायाः चरितं महत् इत्येवं वक्तुं शक्यते । एवमेव खण्डकाव्ये मेघदूतेऽपि यक्षिण्याः चरित्रं सौन्दर्यञ्च विशिष्यते। अस्याः सौन्दर्यविषये स्वयमेव यक्षः कथयति हे देवि ! क्वचिदपि तव सादृश्यं नास्ति। यथा-

**तन्वी श्यामा शिखरिदशना पक्वविम्बाधरोष्ठी**
**मध्ये क्षामा चकितहरिणी प्रेक्षणा निम्ननाभिः।**
**श्रोणीभारादलसगमना स्तोकनम्रा स्तानाभ्यां**
**या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ।।**[37]

पातिव्रत्यक्षमेऽपि तस्याः चरित्रं देदीप्यते यतोहि यक्षस्य विरहे वर्षं यावत् शोकसन्तप्तापि सा पातिव्रत्यं न त्यजति । स्वप्नेऽप्यन्यज्जनं नेच्छति । अस्याः सतीत्वविषये स्वयमेव यक्षः कथयति-

**भूयश्चाहं त्वमपि शयने कण्ठलग्ना पुरा मे**
**निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा ।**
**सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे**
**दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ।।**[38]

एवमेव विक्रमोर्वशीयेऽपि उर्वश्याः चरित्रमेव विशिष्यते। प्रथमं राजानमुपकरोति अनन्तरं प्रेमासक्ता भवति। अस्याः रूपलावण्यविषये स्वयमेव राजा कथयति-

**अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः**
**श्रृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।**
**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो**
**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।।**[39]

सा पतिपरायणा विद्यते अतएव स्वकीयं पुत्रं अन्यत्र स्थापयति येन पत्युः प्रेम्णि कश्चन व्यवधानो न स्यात्। पुनश्च राज्ञा सह चिरवासं कृत्वा स्वभर्तुः इन्द्रस्य आज्ञां पालयितुं स्वकीयं पुत्रं राजानं समर्प्य तिरोवभूव। यथोक्तम् -

**न हि सुलभवियोगा कर्तुमात्मप्रियाणि प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।**
**अहमपि तव सूनावद्य विन्यस्य राज्यं विचरितमृगयूथान्याश्रयिष्ये वनानि ।।**[40]

एवमेव मालविकाग्निमित्रेऽपि मालविकायाः चरित्रमेव विशिष्यते । मालविका रूपवती गुणवती च विद्यते। तस्यां कलायाः ज्ञानंविशेषरूपेण वर्तते। अस्मिन् विषये स्वयं राजा कथयति यत् -

**भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।**
**द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम् ।।**[41]

अन्यच्च - **अव्याजसुन्दरीं तां विधानेन ललितेन योजयता ।**
**परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ।।**[42]

 ISBN: 978-81-930770-3-0

कलायाः प्रतिमूर्तीं मालविकां दृष्ट्वा राजा तां प्रति आकृष्टो भूत्वा प्रेमविह्वलो भवति। स कथयति - **सर्वान्तः पुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य।**

**सा वामलोचना मे स्नेहस्यैकायनीभूता॥**[43]

इत्थं दृढं वक्तुं शक्यते यत् कालिदासस्य साहित्ये नारी सर्वत्र सतीसाध्वीकुलवधूरूपा च प्रतिभाति इति शम्।

**संदर्भग्रंथाः**


1. स्मारिष्यति त्वां न स वोधितोऽपिसन्। (अभि.शा.च.अं.श्लो.-1)
2. अस्मान साधु विचिन्त्य संयमधनान्...। (अभि.शा.च.अं.श्लो.-19)
3. तदेषाभवतः पत्नी त्यज वेनां गृहाण वा..। (अभि.शा.च.अं.श्लो.-29)
4. पतिकुले तव दास्यमपिक्षमम्। (अभि.शा.च.अं.श्लो.-26)
5. (अभि.शा.च.अं.)
6. स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनांज्योतिरेकं जगाम (तत्रैव, श्लो.30)
7. कु.स.प.स.श्लो.82
8. तत्रैव, श्लो.83
9. उत्तरमेघे श्लोक.30
10. रघुवंशे. तृ.स.श्लो.5
11. अ.शा.
12. तत्रैव प्र. अ.17
13. तत्रैव (1/24)
14. तत्रैव (1/19)
15. तत्रैव (1/20)
16. तत्रैव (3/14)
17. तत्रैव (4/11)
18. तत्रैव (2/12)
19. तत्रैव (7/21)
20. कु.स. (1)
21. तत्रैव (5/17)
22. तत्रैव (5/33)
23. तत्रैव (5/72)
24. तत्रैव (5/75)
25. तत्रैव (5/77)
26. तत्रैव (5/86)
27. रघु.द्वि.स.2
28. तत्रैव (3/4)

29. तत्रैव (6/67)
30. तत्रैव (14/57)
31. तत्रैव (14/60)
32. तत्रैव (14/61)
33. तत्रैव (14/84)
34. तत्रैव (14/68)
35. तत्रैव (15/81)
36. तत्रैव (15/84)
37. उत्तरमेघ
38. उ.मे. (48)
39. वि.उ.प्र.अ. (10)
40. तत्रैव (5/17)
41. माल.2.11
42. तत्रैव (2/13)
43. तत्रैव (2/14)

❀❀❀

# संस्कृतव्याकरणे प्रक्रियाक्रम-अष्टाध्यायीक्रमयोः विमर्शः

डॉ. शशिभूषणमिश्रः*

**उपक्रमः -**

भारतवर्षे व्याकरणावतारः अतिप्राचीनः । पुराकाले बहूनि व्याकरणशास्त्राणि आसन् । अतः सर्वेषु व्याकरणेषु लोकवेदसाधारणतया मूर्धन्यतमं भवति पाणिनीय व्याकरणमिति । इदं चावधारितं यत्तु पाणिन्युपज्ञं व्याकरणं मानवप्रतिभायां महनीयं विचित्रं चाविष्करणमिति । पुनः पाणिनिव्याकरणस्य सर्वोत्कृष्टत्वहेतोः अन्येषां व्याकरणानां प्रचारो नाऽभवत् । किञ्च पाणिनि-सूत्राणामर्थं विशदीकर्तुं प्राचीनकालादेव व्याडिकुणिप्रभृतिभिराचार्यैर्गुम्फिता सुप्रसिद्धवृत्तयः वृत्तिकाराश्च प्रयत्नपरा अभूवन् । किन्तु ताः ते च सम्प्रति नोपलभ्यन्ते ।

पाणिनेरनन्तरं कात्यायनः अस्याः परम्परायाः प्रमाणभूताचार्यः । किञ्चित्कालानन्तरं पाणिनेः सूत्राणि कात्यायनस्य वार्तिकानि च व्याचिख्यासुः शेषावतारः प्रमाणभूताचार्यः भगवान्पतञ्जलिः महाभाष्याख्यं ग्रन्धरत्नं प्रणिनाय । महाभाष्यविरचनानन्तरं पाणिन्युपज्ञं व्याकरणं सर्वाङ्गपूर्णं समभवत् । पतञ्जलेरनन्तरं भर्तृहरि-जयादित्य-वामन-भट्टोजिदीक्षित-कौण्डभट्ट-हरिदीक्षित-नागेश-अन्नम्भट्ट-वरदराजादयः च अस्यां परम्परायां प्रसिद्धाः प्रमाणभूता-चार्याः भवन्ति । एतेषु शेषावतारः इव प्रमाणभूताचार्यत्वात् आचार्यः भर्तृहरिः चतुर्थमुनिरूपेण विद्वद्भिः स्वीकृतः भवति ।

एते पाणिन्याश्रिताः आचार्याः शब्दानुशासनाय प्रवासं कृतवन्तः। एवं नियन्त्रणमपि कृतम्। तदेवं सूत्रानुसारिव्याख्यानमनुसृत्य व्याकरणाध्ययनाध्यापनरीतिर्विद्वद्भिरनुमोदिता प्रख्यापिता च । परन्तु कालक्रमेण सूत्रानुसारिणी प्रक्रिया शनैः शनैः शैथिल्यमभजत तथा अनेकेषां शब्दानां नियन्त्रणम् एतैः न सञ्जातम् । एतदर्थं कारणत्रयं सम्भाव्यते ।

(क) समयस्य प्रवाहानुसारेण केषाञ्चित् शब्दानां परिवर्त्तनं जातं,

(ख) कतिचित् नूतनाः शब्दाः, नव्याः प्रयोगाः नवशैली च भाषायां संगृहीताः प्रयुक्ताश्च दृश्यन्ते तथा

(ग) जनाः संक्षेपरुचयः मन्दबुद्धयः श्रद्धारहिताः व्यस्तबहुलकार्ययुक्ताः च भवन्ति समयस्य प्रवाहानुसारेण ।

अतः शब्दविषये पाणिन्याश्रिताचार्यनियमाः शिथिलाः सञ्जाताः । भाषायाः परिवर्तनेन परिवर्द्धनेन च एतत्सर्वं स्वाभाविकं भवति। ततः उत्तरवर्तिनः वैयाकरणाः नूतनव्याकरणनियमेन प्रयोगेण च भाषायाः नियन्त्रणाय चेष्टितवन्तः । तेषां प्रयासोऽपि द्विविधः दृश्यते । यथा-

(अ) पाणिनीयव्याकरणमाधारीकृत्य कृतः प्रयासः तथा

(आ) नवीनव्याकरणपरम्परायाः प्रारम्भः ।

कालप्रभावादेव व्याकरणाध्यापने क्लेदमनुभवन्तो विद्वांसः कार्यकालपक्षाङ्गीकार एव छात्राणामभिरुचि पश्यन्तो लक्ष्यसाधनात्मिकां सरणिमनुसृत्य प्रक्रियादिग्रन्थान् व्यरचयन् ।

*राष्ट्रपतिपुरस्कृतः, सहाचार्यः, व्याकरणविभागः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, पश्चिमवङ्गः

नवीनप्रक्रियाग्रन्थकारेषु भट्टोजिदीक्षितः सर्वाग्रणीर्बभूव । अस्य प्रभावेन नूतनप्रक्रियादिग्रन्थाः समागताः । दीक्षितानन्तरं व्याकरणाध्यापनप्रणाली नवीनतामभजत, या खलु 'नव्यव्याकरणम्' इति नाम्ना इह जगति सुविदिता । तत्र नवीनत्वं पदपदार्थयोर्विचारो भाषाया वैशिष्ट्येन वैलक्षण्यं जनयति । तच्च नव्यन्यायानुप्राणितकलितायाः भाषायाः प्रभावेन संवृत्तम् । परिष्कारपद्धत्याः सुविदितेषु प्रौढप्राज्ञेषु विश्वेश्वर-हरिदीक्षित-नागेश-पायगुण्डे-बालशास्त्रि-रामभद्राचार्य-कालिका-प्रसादशुक्ल-भीमसेन-प्रभृतयोऽनेके विद्वांसः समभूवन् । सैषा पद्धतिरद्यत्वे शिथिलत्वं भजते, परिश्रमजन्यत्वात् । केवलं पारिभाषिकशब्दानां सिद्धान्तस्वरूपेणैव अध्येतारः परिष्काराणां पर्यवसानमेव भजन्ते । किञ्च पाणिनिव्याकरणमाधारीकृत्य गच्छन्तः वैयाकरणाः अष्टाध्याय्याः स्वरूपाक्षुण्णाय प्रयासं कृतवन्तः । अतः अत्र किञ्चित् परिवर्त्तनं कृत्वा नूतनशब्दानां साधुत्वप्रतिपादनं तैः कृतम् । येषां प्रयोगाणां साधुत्वं पाणिनिप्रणीतसूत्रैः न जातं, ये च तदुत्तरवर्तिकाले प्रचलिताः नासन्, तेषां साधुत्वप्रदर्शनाय परवर्त्तिवैयाकरणाः भाषाविशारदः च नियमान् प्रणयन्ति तथा उदाहरणमाध्यमेनापि व्याकरणस्य दुर्बोध्यत्वमालो-चयन्ति । अतः पाणिनीयपरम्परायामपि एतादृशविविधा व्यवस्था अस्मिन्भारतभूखण्डे कालान्तरे जाताः ।

**अष्टकपरम्परा**– अष्टकस्य मूलं भवति सूत्राणि । परिमितैरेव शब्दैराहोस्विद्वर्णैर्विवक्षितार्थ-प्रतिपादनाय महर्षयोऽनेके पूर्वाचार्याश्च विविधान् ग्रन्थान्सूत्रशैल्या प्रणीतवन्तः । व्याकरणशास्त्रे सूत्रशैलीमन्तरा नान्येन केनचिल्लघुभूतेनोपायान्तरेणाऽऽचार्यैः शब्दानामनुशासनं कर्तुं शक्यते । एतच्च व्याकरणाध्ययनस्य लाघवरूपमेकं प्रयोजनं प्रतिपादयति । संक्षिप्तता, लघुता, स्पष्टता च भवति सूत्रस्य वैशिष्ट्यम् । न केवलं व्याकरणे सूत्रपरम्परा प्राप्यते, अपितु अन्यत्रापि इयं परम्परा भूयो भूयः प्राप्यते । उदाहरणरूपेण कल्पसूत्रम्, शिक्षासूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्वसूत्रम्, श्रौतसूत्रम्, वैशेषिकसूत्रम्, न्यायसूत्रम्, मीमांसासूत्रम्, ब्रह्मसूत्रम्, सांख्यसूत्रम्, कामसूत्रम्, पाशुपतसूत्रम्, शिवसूत्रम् (दर्शनग्रन्थः वसुगुप्तस्य), योगसूत्रम्, तत्त्वार्थसूत्रम् (यापनीय (श्वेताम्बर दिगम्बरध्यां भिन्नः तृतीयसम्प्रदायः) जैनदर्शनग्रन्थ इत्यादयः ग्रन्थाः आयान्ति । पुनः वृत्तिभाष्यादिग्रन्थेष्वपि तदेव व्याख्यायते यत् सूत्रस्थशब्दैः सङ्केतितम् । कुमारिलभट्टः तन्त्रवार्त्तिके यथार्थेन प्रतिपादयति-

**सूत्रेष्वेव हि तत्सर्व यद् वृत्तौ यच्च वार्तिके ।**
**सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम् ।।** (त.वा.२/३/१६) इति ।

महर्षेः पाणिनेः प्रधानग्रन्थः भवति सूत्रात्मिका 'अष्टाध्यायी', 'अष्टकम्', 'शब्दानुशासनम्', 'वृत्तिसूत्रम्', 'अष्टिका' इत्यादिभिर्नामान्तरैरपि विदितायाः अष्टाध्याय्याः प्रारम्भः पाणिनिना "वृद्धिरादैच्" (पा.१/१/१) इति सूत्रेण कृतः । पाणिनिः स्वकीयाष्टाध्यायीग्रन्थे सूत्राणि एव पठति, ततः अयं ग्रन्थः सूत्रपाठः इति नाम्ना जगति विख्यातः । अस्य पाणिनीयसूत्रपाठस्य महत्त्वं सर्वजनविदितम् । इयमष्टाध्यायी मानवमस्तिष्कस्य सर्वोत्तमा सृष्टि इति विद्वांसः वदन्ति । अस्मिन्विषये वैज्ञानिकमूर्धन्याः राजारमन्ना महोदयाः वदन्ति– 'Sanskrit has a scientific base

 ISBN: 978-81-930770-3-0

which no other language in the world has including Greek, and Latin with whom it has close affinity both in vocabulary and grammar.... This is largely due to its grammatical organisation, particularly the Paninian tradition as formulated by Panini in his book, the Aṣṭādhyāyī written about 2500 years ago, and divided into eight books (अष्ट अध्याय) of four chapters (पाद) each Panini's book is one of the greatest exhibits of human intellect. It is the first attempt in the history of the human mind to make a sort of "chemical analysis" of a language of scientific lines (शब्दानुशासनम्). His grammar is not only considered a masterpiece of close reasoning and artistic arrangement, but remains till today unsurpassed in its economy of words to describe linguistic features.

There exists a close parallel between the grammar of Panini and the geometry of Euclid. Just as Euclid, in his Elements, starts with a few definitions, axioms and postulates and then goes on building theorems one after the other more or less tautological since without one the other cannot exist - in a very logical way, in an exactly similar manner, Panini has built up the Sanskrit language. (p.,2). Thesûtra method constitutes an alternative method of expressing scientific terminology, particularly mathematics and requires thorough examination because it seems to be simple, more compact than, and as accurate as the symbolic method that is currently in use." (p., 22) (Sanskrit and Science, Raja Ramanna, Bhartiya Vidya Bhavan, Bombay, First Edition 1984). पुनः इदं व्याकरणं तु संगणके व्यवहारार्थमुपयुक्तं भवति । NASA इति संस्थायाः गवेषणा प्रतिपादयति संस्कृतं खलु Artificial Intelligence (AI) इति विषये उपयुक्तं भवति । यथा- 'In the past twenty years, much time, effort, and money has been expended on designing an unambiguous representation of natural languages to make them accessible to computer processing. These efforts have centred around creating schemata designed to parallel logical relations with relations expressed by the syntax and semantics of natural languages, which are clearly cumbersome and ambiguous in their function as vehicles for the transmission of logical data. Understandably, there is a widespread belief that natural languages are unsuitable for the transmission of many ideas that artificial languages can render with great precision and mathematical rigor.

But this dichotomy, which has served as a premise underlying much work in the areas of linguistics and artificial intelligence, is a false one. There is at least one language, Sanskrit, which for the duration of almost 1000 years was a living spoken language with a considerable literature of its own. Besides works of literary value, there was a long philosophical and grammatical tradition that has continued to exist with undiminished Vigor until the present century. Among the accomplishments of the grammarians can be reckoned a method for paraphrasing Sanskrit in a manner that is identical not only in essence but in form with current work in Artificial Intelligence." (Sanskrit & Artificial Intelligence- NASA4, by Rick Briggs, Abstract, Al Magazine, V-6. 1-11-1985 p.1). पुनः अस्मिन् विषये

 ISBN: 978-81-930770-3-0

Science in Sanskrit इति ग्रन्थे उक्तमस्ति-The methodology of the grammar rules formulated by the Ancient grammarian Panini in his treatise Ashtaadhyaayi help the modern Linguistic Studies, Phonetics & Natural Language Processing (NLP) (Samskrita Bharati, New Delhi, Third Print, Dec. 2007, p.146.

अतः अनेन प्रकारेण अष्टाध्यायीग्रन्थस्य तथा पाणिनीयव्याकरणस्य महत्त्वं वैशिष्ट्यञ्च सर्वजनप्रसिद्धम् । एवं बहोः कालात् उद्गच्छन्ति निरन्तरं नैकानि भिन्नप्रकारकाणि व्याकरणानि, यानि सम्यगनुशील्य आचार्यः पाणिनिः आत्मनः समये तत्तत्प्रान्तेषु लब्धप्रचारां भाषां च निष्पक्षपातया वैज्ञानिकया च दृशा परीक्ष्य अष्टसु अध्यायेषु विभक्तं ३२ पादयुक्तम् अत्युत्तमं सर्वगुणसम्पन्नम् अनुपमं व्याकरणं प्रायशः सूत्राणां चतुःसाहस्रम् उपनिवद्धम् । अर्थात् अत्र अध्यायाः ८, पादानि ३२, सूत्राणि प्रायशः ४००० । तत्र अष्टाध्यायीस्थसूत्राणां संख्याविषये मतभेदाः सन्ति । कुत्रचित् कथ्यते हि पाणिनीयसंहितायां ३९९६ सूत्राणि (त्रीणि सूत्रसहस्राणि तथा नवशतानि च । षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम् ॥), कुत्रचित् ३९८३ (लोकमणिदाहलः, पृ.८२), कुत्रचित् ३९७७ (गुरुप्रसादशास्त्रिसम्पादिताष्टाध्यायीसूत्रपाठानु-सारेण), कुत्रचित् ३९७८ (हरियाणासाहित्यसंस्थानस्य महाभाष्यसंस्करणे, भा.१,१.३), कुत्रचित् ३९७३ (शङ्कररामशास्त्रिणा संशोधिताष्टाध्यायीसूत्रपाठसंस्करणे), कुत्रचित् ३९७५ (भवानीशंकरसुक्ठणकरसंशोधिताष्टाध्यायीसूत्रपाठसंस्करणे, बम्बई), कुत्रचित् इतोऽपि अधिकसूत्राणि तथा कुत्रचित् इतोऽपि न्यूनसूत्राणि सन्तीति वर्णना ग्रन्थान्तरेभ्यः प्राप्यन्ते । सूत्राणां योगविभागपद्धतिमाश्रित्य कदाचित् इयं संख्या वर्द्धते तथा कदाचित् न्यूना भवति इति । अतः प्रायशः ४००० सूत्राणि सन्ति इति वक्तुमुचितं भवति । 'सूचनात् सूत्रम्, सूचयति तांस्तानर्थविशेषानिति सूत्रम्, सौक्ष्म्यात् तद्रुपपत्तिरिति सूत्रम्' इति युक्तिदीपिका (ईश्वरकृष्णस्य सांख्यकारिकायाः प्रारम्भे) । तस्मात् शब्दानुशासने सूत्रपाठस्यैव प्राधान्यमन्येषां गणपाठादीनां च खिलपाठता परिशिष्टता वा ज्ञेया । अत्र अष्टाध्याय्यां सूत्राणि एवं सन्ति । इदं सूत्रं तु परमकल्याणकरं भवति । इदं तु अस्माभिः ज्ञातव्यं यत् भगवता पाणिनिना शब्दानुशासनं प्रवचता तस्य काचिद् वृत्तिरपि शिष्येभ्यः प्रतिपादिता इति । सूत्रपाठरूपपाणिनेरष्टाध्याय्याः पौर्वः पश्चिमोत्तरदेशीयो दाक्षिणात्यश्चेत्येवं त्रयः पाठा उपलभ्यन्ते । काश्यां भवा काशिकावृत्तिर्यं पाठमाश्रयति, स पूर्वदेशीयः । क्षीरस्वामी क्षीरतरङ्गिण्यां यं सूत्रपाठं निर्दिशति, स पश्चिमोत्तरदेशीयः । दाक्षिणात्यस्तत्र भवान् कात्यायनो यं सूत्रपाठमनुसृत्य वार्तिकपाठं प्रोवाच, स खलु दाक्षिणात्यः पाठः इति अभियुक्ताः वदन्ति । एषु पूर्वदेशीयो वृद्धपाठः, अपरपाठद्वयं तु लघुपाठरूपेण स्वीकृतौ। इमौ च प्रायेण समानौ । पुनः केचन वदन्ति अष्टाध्याय्या अपि द्विविधः पाठ उपलभ्यते । एको वार्त्तिकभाष्याश्रयभूतः, अपरः काशिकादिवृत्तिकाराश्रितः । तत्र वार्तिकभाष्याश्रयभूतोऽष्टाध्याय्या लघुपाठः काशिकाकाराश्रितो वृद्धपाठः च । यत्किमपि वा भवतु अत्र आष्टकीयसूत्रे एकस्यापि वर्णस्य आनर्थक्यं न विद्यते । वेदमन्त्राः इव अष्टकसूत्राणि भवन्ति । भाष्यकारः वदति-

 ISBN: 978-81-930770-3-0

(क) 'छन्दसीत्युच्यते, न वेदं छन्दः । छन्दोवत्सूत्राणि भवन्ति ।....... प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, कि पुनरियता सूत्रेण । किमतो यदशक्यम् ।' (महाभाष्यम्, पा.१/१/१) ।
(ख) 'सामर्थ्ययोगान्नहि किंचिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात् ।' (महाभाष्यम्,पा.६/१/७७)।
(ग) 'सामर्थ्ययोगादिति । शास्त्रसामर्थ्यात्सूत्रार्थव्यवस्थापनाच्च किञ्चित्पदमात्रमपीहानर्थक-मित्यर्थः ।' (प्रदीपः, महाभाष्यम्, पा.६/१/७७) ।
(घ) 'आचार्यो हि दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख आसीनो मङ्गलपूर्वक महता प्रणिधानेन सूत्राणि प्रणीतवान् । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, कि पुनरियता सूत्रेण ।' (पदमञ्जरी, पा.१/१/१) ।
(ङ) 'समधिगतज्ञानातिशयो ह्याचार्यः परहितप्रतिपत्रः समाहितचेताः शिष्याणां कृतरक्षासंविधानो मङ्गलपूर्वक महता प्रयत्नेन सूत्राणि प्रणीतवान् । तत्राशक्यमेकेन वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रप्रबन्धेन।' (न्यासः, पा.१/१/१) ।

परन्तु स्वतन्त्रेच्छस्य पाणिनिमुनेः ('स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वात् ।' बालमनोरमा, पा.१/१/१) सूत्राणां कदाचित् खण्डनं दृश्यते । उदाहरणरूपेण भाष्यकारः "भीत्रार्थानां भयहेतुः" (पा.१/४/२५) इति सूत्रं खण्डयति, यथा 'अयं योगः शक्योऽवक्तुम् ।... स बुद्ध्या संप्राप्य निवर्तते, तत्र "ध्रुवमपायेऽपादानम्" (पा.१/४/२४) इत्येव सिद्धम् ।.....स बुद्ध्या संप्राप्य निवर्तयति । तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम् ।' (महाभाष्यम्, पा.७१/४/२४) ।

परन्तु यत्र यत्र एतादृशखण्डनं तत्र तत्र पाणिनिशास्त्रस्य वैय्यर्थ्यं प्रतिपादितं न भवति दृष्टप्रयोजनाभावात् अदृष्टप्रयोजनलाभाच्च । अर्थात् खण्डनेन यद्यपि दृष्टप्रयोजनं न प्राप्यते तथापि अदृष्टप्रयोजनं प्राप्यते किल । पुनः अनर्थकं सूत्रमित्यनेन अनर्थक इत्यनेन बोध्यार्थराहित्यत्वमपि ज्ञायते । उक्तञ्च नागेशेन -

(क) 'ञमङणनम्' (मा.सू.७) इत्यत्र मकारप्रत्याख्यानपरं भाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम् । सर्वत्र प्रत्याख्यानमेवम्परमेव । अन्यथा अङ्गानामपि पारायणे धर्मश्रवणेन तत्र तत्र पाणिनिन्यासप्रत्याख्यानस्यापि असङ्गतिः स्यात् । तदुक्तम् "इको यणचि" (पा.६/१/७७) इति सूत्रे 'सामर्थ्ययोगात्र हि किञ्चिदत्र, पश्यामि शास्त्रे यदनर्थकं स्यादिति । किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथाऽनर्थकं न किञ्चिदिति तदर्थः । वृद्धिसूत्रस्थे 'वर्णेनाप्यनर्थकन न भवितव्यम्' इति भाष्यग्रन्थेऽनर्थकत्वं बोद्धार्थकत्वं बोद्ध्यार्थ-राहित्यरूपमिति न निष्प्रयोजनत्वरूपाऽऽनर्थक्येन तत्र तत्र प्रत्याख्यानपरभाष्याऽसङ्गतिः ।' (लघुशब्देन्दुशेखरः, संज्ञाप्रकरणस्य प्रारम्भे) ।
(ख) 'भाष्ये अनर्थकेनेति । बोध्यार्थरहितेनेत्यर्थः । तेन पारायणे सर्वेषामदृष्टार्थत्वेऽपि दृष्टप्रयोजन-राहित्यरूपमनर्थकत्वं वर्णपदसूत्राणामस्त्येवेति न वक्ष्यमाणसूत्रादिप्रत्याख्यानासङ्गतिः ।' (उद्योतः, पा.१/१/१) ।

पुनः येषां सूत्राणां प्रत्याख्यानं महाभाष्यकारेण स्वीयप्रतिभाबलेन कृतं तत्र स्पष्टप्रतिपत्तिरेव प्रयोजनमिति नागेशभट्टोक्तिः समादरणीया वर्त्तते । तद् यथा 'पदमात्रमपीति यत्र तु प्रत्याख्यायते तत्र स्पष्टप्रतिपत्त्याद्येव प्रयोजनम् । प्रत्याख्यानं तु तत्सामर्थ्याद्याश्रयणेन शुष्कतर्कैर्विरुद्धकल्पना-करणाभावायेति द्रष्टव्यम् । (उद्योतः, महाभाष्यम्, पा.६/१/७७) इति । कथ्यते 'न खलु बहुविदामस्ति निर्मूलवाक्यम् । एवं च सर्वैः शाब्दिकाचार्यैः सूत्रेषु प्रयुक्तानां शब्दानां सार्थक्यमसन्दिग्धत्वादिकं च सम्भाव्यते तथा अनेन तस्य तस्य समाधानं करणीयम् । पुनः अस्य सूत्रस्य कृते योग ( 'उञ इति योगविभागः कर्तव्यः । 'महाभाष्यम्, पा.१/१/१७) लक्षण ('शब्दो लक्ष्यः सूत्रं लक्षणम् ।' पस्पशा) आदिशब्दाः प्रयुक्ताः भवन्ति परम्परायाम् । परकालिकाचार्यैः कदाचित् स्वकीयेष्टसिद्ध्यर्थ्यं योगविभागपद्धतिः आश्रीयते । उक्तञ्च 'तत्र योगविभागादिष्ट-सिद्धिरिति ।' (मुखभूषणम्/रूपनिर्णयः, कारकविमर्शः, 1973, p.28) । यत्किमपि वा भवतु, अष्टाध्याय्याः षष्ठाध्यायस्य प्रथमपादे सर्वाधिकरूपेण २२३ सूत्राणि तथा द्वितीयाध्यायस्य द्वितीये पादे सर्वन्यून ३८ सूत्राणि विद्यन्ते । लघुकायेऽस्मिन् अष्टाध्यायीग्रन्थे संस्कृतसदृश्याः महत्या विस्तृतभाषायाः पूर्णतः विश्लेषणस्य प्रयासो विहितः । विवेचनं वैज्ञानिकम्, शैली संक्षिप्ता सांकेतिका संयता गाणितिकभावयुक्ता आधुनिकसंगणकोपयुक्ता चास्ति । ग्रन्थस्य क्रमोऽपि अद्भुतः । अत्र प्रथमाध्याये संज्ञापरिभाषाणां सूत्राणि सन्ति । द्वितीयाध्याये समासविभक्तिप्रकरणे स्तः। तृतीये कृदन्तप्रकरणं, चतुर्थपञ्चमयोः स्त्रीप्रत्ययाः तद्धितप्रत्ययाः, षष्ठसप्तमाष्टमाध्यायेषु च सन्धिः आदेशः स्वरप्रक्रियादीनि च विविधप्रकरणानि विद्यन्ते । सारभूतं वक्तुं शक्नुमो यत् पाणिन्यष्टाध्यायी संस्कृतभाषां परिष्कृतां परिमृष्टां च कृत्वा, यत्र भाषायाः स्वरूपं रक्षति, तत्रैव लोकप्रयोगप्रवाहेण भाषायाम् उत्पत्स्यमानान्दोषान्निराकरोति। तथा च पाणिनिः पूर्ववर्तिनां वैयाकरणानां मतानि समीक्ष्य व्यवस्थित वैज्ञानिकव्याकरणं निर्माति। सर्वसम्मतनियमैः साकमेव पूर्ववर्तिनामाचार्याणां विशिष्टमतानि अपि उल्लिखति । यथा "अवङ् स्फोटायनस्य" (पा.६/१/१२३), "लोपः शाकल्यस्य" (पा.८/३/१९), "ई चाक्रवर्मणस्य" (पा.६/ १/१३०), "ओतो गार्ग्यस्य" (पा.८/३/२०) इत्यादि । पाणिनीयमष्टकं संस्कृतभाषाया अमूल्यो निधिः इव राजते । अस्याः अद्भुतरचनाया उद्भवे व्याकरणान्तराणि लुप्तप्रायाणि जातानि इति विषये नास्ति सन्देहावकाशः ।

आचार्यः पाणिनिः न केवलं वैदिकीम्, अपितु स्वकालिकीं लौकिकीं च भाषां सम्यग् विविच्य, प्राक्तनव्याकरणग्रन्थगतान् सर्वानपि गूढविषयान् सम्यगाकलय्य, अतिविस्तृतामेतां संस्कृतभाषां संक्षिप्य, स्वरप्रक्रियादिसु सूक्ष्मानपि विषयान् अनुज्झित्वा, अतिवैज्ञानिकरीत्या रचितस्य अस्य अष्टकस्य समुद्रसमनन्तरमेव प्रायः सर्वाण्यपि प्राक्तनानि अर्वाचीनानि समकालिकानि च व्याकरणान्तराणि विस्मृतान्यासन् । आचार्यपाणिनेः अभिप्रायः सदैव लोकव्यवहारस्य बलीयत्वप्रतिपादने आसीत् । तस्य मनसि आसीत् व्यवहारः शक्तिग्राहक-शिरोमणिः इति । अतः एतदर्थ तस्य "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा.१/२/५३), "लुब्योगा-

प्रख्यानात्" (पा.१/२/५४), "योगप्रमाणे च तदभावेऽदर्शनं स्यात्" (पा.१/२/५५), "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" (पा.१/२/५६), "कालोपसर्जने च तुल्यम् (पा.१/२/५७) इत्यादीनि सूत्राणि आयान्ति । पुनः परम्परायामुक्तञ्च 'आचार्याचारात्संज्ञासिद्धिर्भविष्यति । किमिदम् आचार्याचारादिति । आचार्याणामुपचारात् ।' (महाभाष्यम्, पा.१/१/१) । 'आचार्याचारादिति । आचार्याणां व्यवहारादित्यर्थः।' (प्रदीपः, अत्रैव) । 'उपचारो नाम गौणी वृत्तिरिति भ्रमं व्युदस्यति व्यवहारादिति । अनेन व्यवहाराच्छक्तिग्रह उक्तः । स च शक्तिग्राहकशिरोमणिः।' (उद्योतः, अत्रैव)

एतत्तु सिद्धं यत् लोकप्रयुक्तानामेव शब्दानां साधुत्वं व्याकरणशास्त्रमन्वाचष्टे । लोकव्यवहारे च ये शब्दा अन्वाख्याताः, तेषां तु लोकेन सम्बन्धः सुनिश्चित एवेति प्रसङ्गतः व्याकरणे लोकप्रामाण्यस्य निदर्शनाय तस्य लोकप्रामाण्यस्य आश्रयणं क्रियते । पुनः जगति शब्देन कश्चिदपि व्यवहारः सरलतया सम्पद्यते। व्यवहाराच्च शब्दस्यार्थेन सह यो हानादिताया सम्बन्धः स स्पष्टं परिलक्ष्यते । अनादिसम्बन्धः शाब्दबोधस्य हेतुरुच्यते । व्यवहारगतानां शब्दानां साधुत्वस्य ज्ञापनार्थं प्रवृत्तं व्याकरणशास्त्रं लोकव्यवहारमतिक्रम्य न जातु वर्तते । साधारणतः लोकशब्देन शिष्टव्यवहारो गृह्यते । उच्यते चापि -

**लोक्येते चात्र शब्दार्थौ लोकस्तेन स उच्यते ।**
**व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा ।।**

आचारवन्तः कस्याश्चिद्विद्यायाः पारगा ये त एव शिष्टपदवाच्याः, तेषामेव विचाराः शब्दार्थनिर्णये प्रमाणपदमुपयान्ति । काव्यादौ शिष्टैः प्रयुक्तानामपि शब्दानां साधुत्वस्य नियामकं व्याकरणशास्त्रमेव स्मर्यते । यद्यपि लौकिकशब्दानां परिज्ञानस्योपायो व्याकरणमेवेति, तथापि सर्वे शब्दा एकस्मिन्नेव व्याकरणग्रन्थे सूत्रैर्न साधयितुं शक्यन्ते, शब्दव्यवहारस्यातिविस्तृतत्वात्। अतः शिष्टाः हि इतिहासपुराणादिषु यान् नानाविधान् शब्दान् प्रयुञ्जते, कदाचित् ते एव शिष्टप्रयोगप्रमाणरूपेण अथवा लोकन्यायसिद्धरूपेण अथवा प्रसिद्धव्यवहाररूपेण शास्त्रे निपातनादिसूत्रमुखेन स्वीक्रियन्ते । एवं हि दृश्यते- ये हि शब्दा महाकविभिः काव्यादिषु प्रयुज्यन्ते, तेऽपि प्रामाण्यं भजन्ते, महाकवीनामपि शिष्टान्तर्गतत्वात् । तैः प्रयुक्तानां शब्दानां व्याकरणशास्त्रेण साधुत्वमात्रं ज्ञाप्यते । अर्थस्य निर्धारणमपि तेषां वचनेन कर्तुं शक्यते प्रयोगेणैवार्थनिर्धारणस्य सम्भवात् । कथ्यते कैयटेन 'शास्त्रेऽनुपात्तोऽप्यर्थः प्रयोगादेव व्यवस्थाप्यते ।' (महाभाष्यम्, प्रदीपः,पा.१/४/२१) इति । अतः स च प्रयोगो लोके सम्भाव्यते । वस्तुतः लोकव्यवहारहेतुः शब्दो द्विविधः, यथा- शिष्टैः शास्त्रकाव्यादौ व्यवहरणीयः, देशव्यवहारविज्ञैर्लोके तत्तत्कार्येषु व्यवहरणीय च । अतो रूढिवशाद् ये शब्दाः लोके प्रसिद्धिमुपगतास्तेषामनुशासनस्य आनर्थक्यमेव बहुधा व्याचक्षन्ते शास्त्रकाराः विविधव्याख्याकाराः च । ते च शब्दा लक्षणमन्तरैवाऽऽचार्यैरपि व्यवह्रियन्त एव । तेनाभिधानाश्रयणं लोकोपचारपर्यवसायीति मन्यते । काव्यशास्त्रप्रयुक्तानां शब्दानां विषये काव्यशास्त्रकर्तारः शिष्टा एव प्रमाणमिति ।

 ISBN: 978-81-930770-3-0

पुनः महर्षिः पाणिनिः न केवलं स्वसमकालिकीभाषां, तत्र उपलब्धं सर्वमपि प्राक्तनं वाङ्मयं, भौगोलिकविषयान्, सामाजिकानाचारव्यवहारादीन् विषयान्, राज्यवाणिज्यादिसंबद्धान् विषयांश्च करतलामलकवदपश्यदिति अष्टकस्य परिशीलनेन स्पष्टरूपेण ज्ञायते अस्माभिः । पुनः पाणिनीयं व्याकरणं पुरातनव्याकरणापेक्षया संक्षिप्तरूपमिति विषये नास्ति सन्देहस्य लेशमात्रा-वकाशः । आचार्यः प्राचीनान्वैयाकरणान् अनुचकारेति तस्य प्रयुक्तशैलीतः एवं स्पष्टरूपेण प्रतीयते । अत्र सूत्रेषु प्रयुक्तः एको वर्णोऽपि न व्यर्थो भवेदिति भाष्यकारः गोनर्दीयः सादरमाह- 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम् । कि पुनरियता सूत्रेण । किमतो यदशक्यम् । (महाभाष्यम्, पा.,१/१/१) । अतः पाणिनेः विकल्पः भवति स्वयं पाणिनिः इति नेयमतिशयोक्तिः गर्वोक्तिर्वा । अस्य व्याकरणमधीत्य सर्वेऽपि प्राच्यपाश्चात्त्यवैयाकरणाः आश्चर्यभरितमानसा अभवन् । एतद्व्याकृतिसाहाय्येनैव तुलनात्मकभाषाशास्त्रस्य (Comparative Linguistics), सांगणिकभाषाशास्त्रस्य (Computational Linguistics) तथा सांगणिकव्याकरणशास्त्रस्य (Computational Grammar) सृष्टिः जाता । कालान्तरे विज्ञानसम्मतान्यशास्त्राणामपि भेदोपभेदैर्सह सृष्टिः भवितुं शक्यते । संस्कृतशब्दानां सिद्धरूपसौष्ठवज्ञानं पाणिनीयव्याकरणज्ञानं विना न संभवत्येवेति निश्प्रचम् । सुनिपुणवैयाकरणा अपि प्रयोगशरणाः । स्थितस्य गतिचिन्तन-मेव हि तादृशानामपि शास्वज्ञानस्यासाधारणं प्रयोजनम् । तस्मात् प्रयोगबाहुल्यपरिचयाद्वा सिद्धरूपमात्रबोधकव्याकरणग्रन्थपठनाद्वा परिश्रमानुरूपा सुशब्दाधिगतिर्भवत्येव । तथापि पाणिनीयव्याकरणज्ञानादृते प्रामाणिकशाब्दिकपदप्राप्तिर्न कस्यापि युज्यत इत्यस्मद्देशस्थानां पण्डितानां चिरपालितं मतम् । नवीनाः पाश्चात्यपण्डिता अपि पश्यन्तीदानीमेतन्मते सार्थक्यम् । तथा च दृश्यते विचारः 'यद्वा वदन्तु जनाः न कोऽपि जानाति संस्कृतं, यो न जानाति पाणिनिम्' । अन्यच्च संस्कृतकाव्यव्याख्यानेषु वा संस्कृतभाषासङ्कलितशास्त्रविचारेषु वा या या व्याकरणप्रक्रियाः दृश्यन्ते, ताः सर्वा अपि प्रायशः पाणिनिप्रमाणाः । तस्मात्संस्कृतविद्यार्थिषु यावदस्ति पाणिनीयल्याकरणज्ञानं, तावदेव तेषां प्रयोजनमेतैः प्रक्रियाप्रदर्शनैः । अपि च संरकृतविद्याविनयनप्रवृत्तानां सर्वेषामपि शिक्षकाणां स्यादेवानुभवावगतमेतत् पाणिनीयव्याक-रणाधिगमव्यवसायः स्मृतिशक्तिपरिपोषणे बुद्धिसमाधानसंसाधने चोपायः सुतरां समर्थ इति ।

पाणिनिर्हि कथं स्वशास्त्रोपदेशमकरोदिति विषये बुधाः स्वं स्वमनुमानमुच्चैरुद्घोषयन्ति सप्रमाणम् । केषाञ्चिन्मते आचार्येण प्रथममेव सूत्राणि पृथक्पृथगुपदिष्टानि । केषाञ्चिन्मते तु स चोपदेशः संहितारूपेणाऽऽसीत्, पश्चाच्च वृत्तिकारेण योगो विभक्त इति । अस्य हि नाम 'शब्दानुशासनम्' इत्याचार्यसम्मतम्, 'अष्टकम्' वा 'अष्टाध्यायी' इति तु पश्चानिर्दिष्टम् । फणिभाषितमहाभाष्येऽप्युक्तम् 'अथेति अयं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वैदितव्यम्' (पस्पशा.) इति । पाणिनीयग्रन्थो वृत्तिसूत्रपदेनाऽप्यभिधीयते । पाणिनीयसूत्राणां वृत्तिसद्भावात् वात्तिकानां तदभावाच्च तयोवैषम्यबोधनायेदमिति । भर्तृहरिर्हि

 ISBN: 978-81-930770-3-0

तदीयमहाभाष्यदीपिकायां वार्त्तिकानां कृते भाष्यसूत्रमिति पदं सादरं प्रयुङ्क्ते । वार्त्तिकोपरि भाष्यग्रन्थस्यैव भावात्कथनमिदमत्युक्तमेव । वृत्तिशब्दस्त्वेकतो व्याख्याऽर्थे प्रचलितोऽस्ति यथा- पाणिनीयसूत्राणां जयादित्यवामनकृता काशिकावृत्तिः इति । अपरतश्च, वृत्तिर्नाम वर्तनं यदधिकृत्य शास्त्रं प्रवर्तते । व्याकरणे हि पञ्चवृत्तयः ('कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः ।' सिद्धान्तकौमुदी, सर्वसमासशेषप्रकरणम्) । तेन वृत्तिसूत्रनाम शाखं प्रवृत्तिबोधकं सूत्रम् ।

श्रूयते हि पूर्वम् अष्टिकासूत्रपाठः संहिताबद्ध आसीदिति । सा च सूत्राणां संहिताशैली महर्षिपाणिनिनाऽपि समादृता । परञ्च परवर्तिभिः कैश्चिद् व्याख्याकारैः प्रकरणक्रमानुसारेण सूत्राण्युपस्थापितानि । पतञ्जलिरपि विषयेऽस्मिन्स्वकीयसङ्केतं प्रयच्छति । यथा-

(क) 'यथा पुनरियमन्तरतमनिवृत्तिः सा किं प्रकृतितो भवति स्थानिन्यन्तरतमे षष्ठीति । आहोस्विदादेशतः स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति । कुतः पुनरियं विचारणा ? उभयथा हि तुल्या संहिता । 'स्थानेन्तरतम उरण् रपर' इति ।' (महाभाष्यम्, पा.१/१/५०) ।
(ख) 'यदि भसंज्ञा, "वृद्धिरादैजदेङ्गुणः" इति जश्त्वमपि न प्राप्नोति ।' (महाभाष्यम्, पा.१/१/१) । 'भाष्ये जश्त्वमपीति । संहितया पाठे इत्यर्थः ।' (उद्योतः, अत्रैव) ।

ततः स हि बहुत्र योगविभागमप्रामाणिकं मत्वा स्वयमेव सूत्रविच्छेदमपि साधयति । एक-मुदाहरणं यथा- 'आपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थम् । आपत्यग्रहणं कर्तव्यं द्वीपाद्यञः प्रतिषेधार्थम् । इह मा भूत् द्वैप्येति। तत्तर्हि वक्तव्यम् ? न वक्तव्यम्। नैवं विज्ञायते कञ्क्वरषो यञश्चेति। कथं तर्हि ? कञ्क्वरपोऽयञश्चेति ।' (महाभाष्यम्, पा.४/१/१६) । अतः संहितापाठस्य स्वरूपं यथा 'वृद्धिरादैजदेङ्गुण इको गुणवृद्धी न धातुलोप आर्धधातुके क्ङिति च दीधीवेवीटां हलोऽनन्तरासंयोगो मुखनासिकावचनोऽनुनासिकस्तुल्यास्यप्रयत्नं सवर्णं नाज्झलावीदूदेद्द्विवचनं प्रगृह्यमदसोमाच्छे निपात एकाजनाङोत्सम्बुद्धौ शाकल्यस्येतावनार्षे, 'इत्यादिरूपेण । संहिता-बद्धेषु सूत्रेषु यथा शेष-विप्रतिषेध-अनुवृत्यादिरूपं कार्यं साधु संघटते न तथा प्रक्रियाक्रमेणा-नुस्यूतेषु सूत्रेषु । केचन संहितैव एकश्रुतिस्वर एव पठिताऽऽसीत् इति वदन्ति तथा केचन तत्र सस्वरसंहितापाठरासीदिति समर्थयन्ति । तत्र महाभाष्यकारो निश्चिनोति- 'ऐक्ष्वाकस्य स्वरभेदा-न्निपातनं पृथक्त्वेन ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन कर्तव्यम् । ऐक्ष्वाकः, ऐक्ष्वाकः । एकश्रुतिनिर्देशात्सिद्धम् ।' (महाभाष्यम्, पा.६/४/१७४) । कैयटस्य एवमभिमतं यथा अन्ये त्वाहुः एकश्रुत्या सूत्राणि पठतवन्त इति क्वचिदुदात्तोच्चारणं तद्विवक्षार्थमिति । '(प्रदीपः, महाभाष्यम्, पा.१/१/१) । हरदत्तः अपि सूत्रपाठे एकश्रुतिं स्वीकरोति, यथा- 'एकश्रुत्या सूत्रपाठे...'(पदमञ्जरी, पा.६/१/१२३) । केचित्क्वचित् स्वरविशेषसिद्ध्यर्थं विशिष्टस्वरयुक्तपाठमपि मन्यन्ते । नागेश-भट्टमते तु सम्पूर्णाष्टाध्यायी आचार्येण एकश्रुत्या न पठिता । यथा अन्ये तु इत्यरुचिबीजं तु निपातनं नामान्यादृशे प्रयोगप्राप्तेऽन्यादृशप्रयोगकरणं, तदूपाद्यन्तात्तत्र तत्रोदात्तादिविवक्षात्रिसूत्रम् इत्यत्रापि प्रयुक्तान्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थम् । सम्पूर्णाष्टाध्यायी आचार्येण एकश्रुत्या पठितेत्यत्र न मानम्। क्वचित्कस्यचित्पदस्य एकश्रुत्या पाठः। यथा दाण्डिनायनादिसूत्रे ऐक्ष्वाकेति।

 ISBN: 978-81-930770-3-0

एतावदेव भाष्याल्लभ्यते। यद्यप्यध्येतार एकश्रुत्यैवाङ्गानि पठन्ति ब्राह्मणवत्, तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः।' (उद्योतः, महाभाष्यम्, पा.१/१/१)।

पुनः प्राचीनकाले सूत्राणि विरामरहितभावेन कतिपयमातृकासु कदाचित् एवंविधलिखितानि आसन्यथा- 'वृद्धिरादैजदेङ्गुणरिकोगुणवृद्धी न धातुलोपार्धधातुके क्ङिति च दीधीवेवीटां हलोऽनन्तरासंयोग मुखनासिकावचनोऽनुनासिकर्तुल्यास्यप्रयत्नं सवर्णम्...। 'पाणिनेः चकारादिकौशलमाध्यमेन संहितापाठतः तथा अविरामपाठतः एतेषां सूत्राणां सूत्रपाठः विद्वद्भिः क्रियते कृतवान् च। इह 'अ इ उ ण् तः आरभ्य अष्टकसूत्रेषु क्रमेण एव एकवाक्यता स्वीकृता आसीत् प्राचीनैः। अतः क्रमस्य एवं शास्त्रे संज्ञाद्वारेण उपयोगित्वं दृश्यते। अत्र सूत्रक्रमे परिवर्त्तनं नापेक्षितमासीत् पारायणादिकार्याणां निर्विघ्नपरिसमाप्त्यर्थम्। अतः अष्टाध्याय्यां क्रमस्य एव महत्त्वमासीत्। अयं विषयः साङ्केतिकभावेन सर्वतन्त्रस्वतन्त्रेण नागेशेन यथार्थरूपेण उट्टङ्कितः दृश्यते, यथा "अइउण्' (मा.सू.१) एषां क्रमबोधकत्वेऽपि "आदिरन्त्येन.." (पा.१/१/ ७१) इत्यनेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वम्। क्रमस्य संज्ञाद्वारैवोपयोगात्। एकवाक्यता चादिरकारादिरन्त्येनेता तत्सदृशेन णकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां संज्ञेति। "स्वौजस." (पा.४/१/२) इत्यादीनामप्येतदेकवाक्यतया सुबादिसंज्ञासूत्रत्वं स्वादिविधायकत्वञ्चेति बोध्यम्।' (लघुशब्देन्दुशेखरः, संज्ञाप्रकरणस्य प्रारम्भे)। इह नागेशस्य अभिप्रायसारांशः भवति 'अइउण्' (मा.सू.१) इत्यादिमाहेश्वरसूत्राणां क्रमविशिष्टवर्णोपस्थापकत्वेऽपि नाम शाखे क्रमवैशिष्ट्येनोपस्थितानामेव वर्णानामुपयोगात् "आदिरन्त्येन." (पा.१/१/ ७१) इति सूत्रैः सह एकवाक्यता। परन्तु यदि 'अइउण्' (मा.सू.१) इत्यादिषु व्युत्क्रमः ज्ञायमानः स्यात्, तर्हि तत्र एकवाक्यता नायाति। अन्यथा "इको यणचि" (पा.६/१/७७) इत्यादी यथासंख्यसूत्रेण (पा.१/३/१०) निर्वाहः असम्भवः इति प्रतिभाति। अतः 'अइउण्' (मा.सू.१) इत्यादेः "इको यणचि" इत्यादिशास्त्रबोधधर्मिकाप्रामाण्यज्ञानानास्कन्दितत्वोपयोगिता क्रमवैशिष्ट्येन ज्ञायमानस्यैव, न तु 'उइअण्' इत्यादि: "इको यणचि" (पा.६/१/७७) व्युत्क्रमवैशिष्टये ज्ञायमानस्य। अन्यथा "इण्कोः" (पा.८/३/५७) इत्यादिसूत्रैः विहिते इणादिप्रत्याहारे उकारादीनामग्रहणमकारादीनां च ग्रहणं प्रसज्येत इति। तेनैव प्रकारेण यदि "वृद्धिरादैच्" (पा.१/१/१) "अदेङ्गुणः" (पा.१/१/२) इत्यादिषु 'आदैच् वृद्धिः', 'गुणः अदेङ्' इत्यादिरूपेण व्युत्क्रमेण ज्ञायमानत्वेऽपि नाम 'आदैच् वृद्धिः' आदिरूपेण विपरीतक्रमेण अपि यदि अर्थबोधः जायते, तथापि तत्र वाक्यार्थबोधोपयोगिता न सम्भवेत्। अतः तेषामपि व्युत्क्रमे नाम विपरीतक्रमे पारायणादावदृष्टह्यानिः भवेत् इति।

संस्कृतव्याकरणे सूत्रपाठस्य कृते 'वृत्तिसूत्र'शब्दः (न बूमो वृत्तिसूत्रवचनप्रामाण्यादिति। किं तर्हि ? वार्त्तिकवचनप्रामाण्यादिति। महाभाष्यम्, २/१/१: तथा पुनः पा.२/२/२४) वार्त्तिकानां च कृते महाभाष्यदीपिकायां "भाष्यसूत्रशब्दः प्रयुज्यते तथा काशिकायां वार्त्तिकसूत्रशब्दः (वार्तिकसूत्रिकः, पा.४/२/६०) यतो वृत्तिग्रन्थमन्तरा सूत्राणां लक्ष्यभूतेषु शब्देषु प्रवृत्तिः, वार्त्तिकसूत्राणि च

विना भाष्यरचना नैव सम्भाव्यते । फलतः सूत्रपाठमवलम्ब्य वृत्तिग्रन्थरचना वार्त्तिकसूत्राणि चाश्रित्य भाष्यग्रन्थरचना शाब्दिकाचार्यैः कृता ।

यद्यपि पाणिनेः पूर्वं काश्यप गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायन-शाकल्य-सेनक-स्फोटायनादयः तथा पाणिनेः अनन्तरं शर्ववर्मन्-चन्द्रगोमीन्-क्षपणक-देवनन्दीन्-भट्टोऽकलङ्क-पाल्यकीर्ति-हेमचन्द्र-मलयगिरि-क्रमदीश्वर-पद्मनाभदत्त-बोपदेव-पद्मनाभदत्तादयः व्याकरणस्य बहुविधनियमान् सूत्रात्मकरूपेण प्रणीतवन्तः, तथापि तेषु सूत्रात्मकग्रन्थेषु सूत्रात्मक-परम्परायां च पाणिनेः 'अष्टाध्यायी' मस्तकमणिरूपेण विराजते । अयं पाणिनिः शैवपरम्परायाः प्रमाणसिद्धाचार्यः भवति । परन्तु एतत्तु ज्ञेयं यत् सर्वेषु स्थलेषु पाणिनेः सूत्ररचनैव गरीयसीति न मन्तव्यम् । "अकः सवर्णे दीर्घः" (पा.६/१/१०१) इति सूत्रस्य व्याख्यानावसरे सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः चान्द्रव्याकरणस्य सूत्रं (चा.५/१/१०६) प्रदाय कथयति 'अकोऽकि दीर्घ इत्येव सुवचम्' इति । तस्य विचारे पूर्वोक्ताष्टकीयसूत्रे लाघवं नास्ति, अपित्वत्र चान्द्रसूत्रे लाघवं सिद्ध्यति । पाणिनीयपरम्परायाः मूलाचार्यः देवदेवमहादेवः । ढक्कावादनात् जातानि चतुर्दशसंख्यकानि महेश्वरप्रसादाल्लब्धानि सूत्राणि नीत्वा अयमाचार्यः स्वकीयव्याकरणं ग्रथितवान् । कथ्यते च नन्दिकेश्वरकाशिकायाम् -

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ।।** (श्लोकः,१)

सकलव्याकरणेषु रत्नायमानं साङ्गोपाङ्गं संस्कृतव्याकरणं पाणिनीयमेव समुपलभ्यते । पाणिनीयव्याकरणग्रन्थाः गीर्वाणवाण्याः प्राचीनेष्ववर्वाचीनेषु च वाङ्मयेषु सूर्य इव प्रकाशमानाः भूत्वा विराजन्ते । अस्य पाणिनीयव्याकरणस्य अत्यन्तं सुन्दरं सुसम्बन्धं सूक्ष्मतमं पदार्थावबोध-नसामर्थ्यं दृष्ट्वा प्राच्याः पाश्चात्याश्च सर्वे विद्वांसो मुक्तकण्ठेन व्याकरणमिदं प्रशंसन्ति । अत्र प्रत्याहारमुद्रया वैज्ञानिकी सूत्ररचनापद्धतिः पाणिनेराचार्यस्य प्रतिभाया अलौकिकशक्तिं प्रकाशयति । यदि विश्वभाषासु नेत्रे विस्फार्य दृष्टिर्दीयेत, तदा विश्वस्मिन् कस्यांचिदपि भाषाया-मेतादृशं व्याकरणं नोपलभ्यते, यादृशं संस्कृतवाङ्मयस्य गौरवाधायकं पाणिनीयव्याकरणं देववाण्यां विराजते । तत्र पाणिनीयापाणिनीययोः उभयविधव्याकरणयोः अधुना सर्वाधिकप्रचलितं व्याकरणं तु पाणिन्याश्रितमिति । इदं पाणिनीयव्याकरणं तु चतुष्प्रकारकं कार्यं करोति, यथा-

(१) वर्णकार्यम् (यथा- सन्ध्यादयः नियमाः),
(२) पदकार्यम् (समासादयः, तद्धितादयः नियमाः),
(३) अङ्गकार्यम् ("अङ्गस्य", पा.६/४/१ इत्याद्याधिकारे प्रयुक्ताः नियमाः, यथा "अल्लोपोऽनः", पा.६/४/१३४ इत्यादिसूत्राणि) तथा
(४) वाक्यकार्यम् ("वाक्यस्य टेः प्लुतोदात्तः", पा.८/२/८२ इत्याद्यधिकारे प्रयुक्तानि सूत्राणि) ।

प्रक्रियापरम्परा: संस्कृतवाणीनैपुणीमभिलषतां सर्वेषामपि पाणिनीयव्याकरणज्ञानमनुपेक्षणीयम-त्यन्तोपकारकं च । किन्तु तज्ज्ञानलाभः क्लेशसाध्यः समुचितसुललितप्रक्रियाग्रन्थसाध्याभावे ।

 ISBN: 978-81-930770-3-0

अष्टाध्यायीसूत्रानुसारिकाशिकावृत्त्यादिग्रन्थालोचनेन ज्ञायते यत्सामान्यशब्दरूपज्ञानायसमग्रमष्टाध्याय्याः काशिकावृत्तेर्वा ज्ञानमपेक्ष्यते। अपि च तदध्ययने महान् आयासः कर्त्तव्यो भवति। तथा च 'देवः' इति प्रयोगसाधने "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पा.१/२/४५), "खरवसानयोर्विसर्जनीयः (पा.८/३/१५)" इत्यादीनां पृथक्पृथगध्यायभाजामनेकेषां सूत्राणामुपस्थितिरपेक्ष्यते। येन सरलरीत्या स्वल्पेन कालेन च व्याकरणज्ञानमिच्छतां पाठकानामष्टाध्यायीक्रमेण व्याकरणाध्ययनं बहुक्लेशकरं भवति स्म। तेन अध्येतारः पाणिनीयव्याकरणाध्ययनात् पराङ्मुखाः आसन्। कथं पाणिनीयपरम्परा सुरक्षिता भवेत्, केन वा प्रकारेणास्मिन् शाखे प्रक्रियारचना कर्तव्या, कथं चाल्पेन यत्नेन महतो महतः शब्दौघस्य ज्ञानं भवेत्, केन प्रकारेण वा सूत्राणि सङ्घटनीयानि भवेयुः इत्यादिविषयेषु चिन्तां कृत्वा अनन्तरं सौकर्येणाध्ययनज्ञानाय परम्परागतपद्धतेः काठिन्यदूरीकरणाय एवं प्रक्रियापद्धतेः प्रारम्भः जातः यद्यपि सूत्रार्थसम्पादने महाभाष्याद्याकरप्राचीनग्रन्थेषु काशिकादिषु च पाणिन्यष्टकस्य सूत्रपौर्वापर्यक्रममनुसृत्य यथोद्देशपक्षं चानुमन्य सर्वत्र समानेन रूपेण पतञ्जलिप्रभृतिभिः आचार्यैः निर्वाहः कृतो दृश्यते, तथापि कालान्तरे प्रक्रियाग्रन्थेषु कार्यकालपक्षाग्रहेण सूत्राणि विभिन्नप्रकरणेषु यत्र तत्र विकीर्णानि सञ्जातानि। अतो विद्वांसः कार्यकालपक्षाङ्गीकार एवं छात्राणामभिरूचिं पश्यन्तो लक्ष्यसाधनात्मिकां सरणिमनुसृत्य प्रक्रियाग्रन्थान् व्यरचयन्। अग्रे बहुतिथे काले गते प्रमादात् अष्टाध्यायीक्रमसूत्रपाठः प्रायशो विलुप्तः सञ्जातः। केवलं प्रक्रियाग्रन्थानां पठनपाठनक्रम एव सर्वत्र प्रचलितोऽभूत्। तेन हेतुना विभिन्नप्रकरणेषु पठितानां सूत्राणां पारस्परिकज्ञानं काठिन्येन सञ्जायते। अष्टके तु सर्वाणि प्रकरणानि वैज्ञानिकविधिना सुसम्बद्धानि वर्तन्ते। परन्तु प्रक्रियासारल्येन विभिन्नस्थलेष्वपि पठितानि तदुपयुक्तानि सूत्राणि तत्र तत्रापकृष्य समायोजितानि। भाषायां प्रयुक्तानां शब्दानां केन प्रकारेण अध्येतॄणां मङ्गलार्थमेकत्र समावेशः साधनं च प्रक्रियानुसारेण स्यात्- एतदर्थं पण्डिताः प्रक्रियापरम्परां कल्पितवन्तः। प्रक्रियानुसारिकातन्त्रादिलघुव्याकरणानामुदय एव पाणिनीये व्याकरणेऽपि प्रक्रियाक्रमस्याभ्युदयाय प्रेरकोऽभूत् इति मे मतिः। "प्रारम्भात् करणं प्रक्रिया' इति अमरकोषोद्धाटनम्। प्रक्रियापरम्परायाः मूलोद्देश्यं भवति सारल्येन प्रक्रियानुसारेण च पाणिनीयसूत्राणां संयोजनम्। संस्कृतशब्दानां सिद्धरूपसौष्ठवज्ञानं पाणिनीयव्याकरणज्ञानं विना न संभवत्येवेति। सुनिपुणवैयाकरणा अपि प्रयोगशरणाः। स्थितस्य गतिचिन्तनमेव हि तादृशानामपि शास्त्रज्ञानस्यासाधारणं प्रयोजनम्। तस्मात् प्रयोगबाहुल्यपरिचयाद्वा सिद्धरूपमात्रबोधकव्याकरणग्रन्थपठनाद्वा परिश्रमानुरूपा सुशब्दाधिगतिर्भवत्येव। तथापि पाणिनीयव्याकरणज्ञानादृते प्रामाणिकशाब्दिकपदप्राप्तिर्न कस्यापि युज्यत इत्यस्मद्देशस्थपण्डितानां चिरपालितं मतम्। नवीनाः पाश्चात्यपण्डिता अपि पश्यन्तीदानीमेतन्मते सार्थक्यम्। तथाच दृश्यते 'यद्वा वदन्तु जना न कोऽपि जानाति संस्कृतं यो न जानाति पाणिनिम्'। अन्यच्च संस्कृतकाव्यव्याख्यानेषु वा संस्कृतभाषासङ्कलितशास्त्रविचारेषु वा या या व्याकरणप्रक्रिया दृश्यन्ते, ताः सर्वा अपि प्रायशः पाणिनिप्रमाणाः। तस्मात् संस्कृतविद्यार्थिषु यावदस्ति पाणिनीयव्याकरणज्ञानं तावदेव तेषां प्रयोजनमेतैः प्रक्रियाप्रदर्शनैः। अपि च संस्कृतविद्याविनयनप्रवृत्तानां सर्वेषामपि शिक्षकाणां

 ISBN: 978-81-930770-3-0

स्यादेवानुभवावगतमेतत्पाणिनीयव्याकरणाधिगमव्यवसायः स्मृतिशक्तिपरिपोषणे बुद्धिसमाधान-संसाधने चोपायः सुतरां समर्थ इति । अत एव संस्कृतवाणीनैपुणीमभिलषतां सर्वेषामपि पाणिनीयव्याकरणं ज्ञानमनुपेक्षणीयमत्यन्तोपकारकं च । किन्तु तज्ज्ञानलाभः क्लेशसाध्यः समुचितसुललितग्रन्थसहायाभावे । एष रूपावतारस्तावत् परिक्लृप्तो बालप्रबोधनार्थमेव कृक्तिकर्तृप्रतिज्ञातलाघवसुविभक्तत्वार्जवगुणप्रशस्यः पाणिनीयव्याकरणजिज्ञासूनां तादृशसहाया-पादने निरुपमो निरवद्यञ्च । सुविदितमेव किल संस्कृतव्याकरणव्यवसायिनां रूपावतार-प्रक्रियाकौमुदी-प्रक्रियासर्वस्व-सिद्धान्तकौमुद्यादयो नवा व्याकरणप्रबन्धाः शब्दरूपानयन-सौलभ्यमुद्दिश्य तैस्तैः कर्तृभिर्निर्मिताः नाद्रियन्ते पाणिनीयं सूत्रपाठक्रमं यथा हि तत्र काशिकावृत्तिराद्रियते।

वस्तुतो लोकोपयोगिप्रकियाग्रन्थानामवतारः बौद्धधर्मावलम्बिनः धर्मकीर्तेः 'रूपावताराद्' एव आदौ प्रारब्धः। अयं प्रक्रियास्वरूपस्य आदिमो ग्रन्थः। अस्मिन्नेव गोसाधनिकायाः प्रथमं स्वरूपं निर्दिष्टं वर्तते। परीक्षाप्रणाल्याः आधारभूता सरणिः धर्मकीर्तिना एवं प्रारम्भेण प्रवाहिता। अस्य रचनाकालः ख्रीष्टाब्दस्य त्रयोदशशतकं भवितुमर्हति। अष्टकस्य कतिपयसूत्राणि ग्रन्थेऽस्मिन् प्रक्रियया नाम प्रक्रियाक्रमेण विस्तारितानि सन्ति, न तु सर्वाणि सूत्राणि। रूपावतारो हि द्वाभ्यां भागाध्यां विभक्तः दृश्यते । तस्य पूर्वार्द्धे संज्ञावतारः, संहितावतारः, विभक्त्यवतारः, अव्ययावतारः, स्त्रीप्रत्ययावतारः, कारकावतारः, समासावतारः, तद्धितावतारश्चेति प्रकरणानि । तथा उत्तरार्द्धे तु केवलं तिङन्त-कृदन्त-प्रबन्धः । प्रक्रियाक्रमानुसारिणि अस्मिन् ग्रन्थे बहूनि वैशिष्ट्यानि वर्तन्ते। लकारादिक्रमेण सर्वेषां धातूनां रूपाणि एकत्रैवोपलभ्यन्ते। अतः धातुप्रत्यय-पञ्चिकायां लकारादिक्रम स्वीकृतः, तदधीनश्च गणक्रमः गृहीतः। तदन्ते चार्धधातुकसंज्ञकाः।

प्रक्रियाक्रमे द्वितीयग्रन्थः 'प्रक्रियारत्नम्' । सायणस्य धातुवृत्तौ दैवमिति ग्रन्थोपरि लीलाशुकमुनिभिर्विरचिते पुरुषकारव्याख्याने चास्य ग्रन्थस्योल्लेखो यद्यपि वर्तते, तथापि ग्रन्थोऽयं सम्प्रति नैव लभ्यते। केन कदा प्रणीत इति तु रामान्यपि तद् ज्ञानबाद्वाम्। पुरुषकार-व्याख्याने स्मृतत्वात् अस्य ग्रन्थस्य प्रणयनं वैक्रमत्रयोदशशतकपूर्वमित्येवानुमा शक्यते तदनन्तरं ख्रैष्टशब्दपञ्चदशशतके विमलसरस्वत्याः 'रूपमाला' नामकस्य पाणिनीयप्रक्रियाग्रन्थस्य रचना कृता।प्रक्रियाक्रमे 'रूपमाला' तृतीयपुष्परूपेण गुम्फिता दृश्यते। अत्र प्रत्याहार-संज्ञा-परिभाषा-सन्धि-सुबन्त-तिङन्त-स्त्री-कारक-कृत्-तद्धित-समासप्रकरणानि समावेशितानि । अनेन ज्ञायते यत्प्रक्रियापरम्परायां रूपावतार-प्रक्रियारत्न-रूपमालादिग्रन्थाः आदिप्रक्रियाग्रन्थत्वेन स्वीकृताः। इयमेव प्रक्रियापरम्परा उत्तरवर्त्तिनिकाले पञ्चदशख्रीस्तशताब्दस्य प्रथमे चरणे (१४५० ईतः १५०० यावत्) पाणिनीयव्याकरणोपासकेनाऽऽश्रेण कोण्डिन्यगोत्रेण श्रीमदनन्ताचार्यप्रपौत्रेण नृसिंहपौत्रेण श्रीकृष्णाचार्यपुत्रेण श्रीरामचन्द्राचार्येण पाणिनीयामष्टाध्यायीमाधारीकृत्य प्राक्तन-सकलप्रक्रियाग्रन्थातिशायी 'प्रक्रियाकौमुदी' इत्याख्यो विभावितः प्रक्रियाग्रन्थः । यद्यपि नेह सकलानि सूत्राणि व्याख्यातानि, कानिचिच्च ग्रन्थसंक्षेपधिया समुज्झितानि, तथापीयं कौमुदी

कौमुदीव चिररात्राय प्रतीक्षमाणानां जिज्ञासुजनानां प्रह्लादाय प्राकल्पत । अब्धिमन्थनोत्थचन्द्र-कौमुदीवदियं प्रक्रियाकौमुदी व्याकरणग्रन्थाब्धिमन्थनोद्भूता कमपि गवेषणाग्रन्थमप्यतिशेते । इह महाभाष्यकाशिकादिग्रन्थैः सह रूपावतार-रूपमाला-मुग्धबोधप्रभृतयोऽपि व्याकरणग्रन्थाः पर्यालोचिताः सन्ति । पुनः यद्यपि असौ हि प्रक्रियाकौमुदीग्रन्थः रूपावताररूपमालाभ्यां विस्तृततरः, अधिकं परिष्कृतं तथा प्रक्रियाकौशलं वर्धमाना अशोभत तथापि अष्टाध्याय्याः समस्तसूत्राणां संकलनमत्रापि न जातम् । अमुं विषयम् अधिकृत्य स्वयमाचार्यो ग्रन्थान्ते वैदिकप्रक्रियायाः समाप्तौ निवेदयति -

**आनन्त्यात्सर्वशब्दा हि न शक्यन्तेऽनुशासितुम् ।**
**बालव्युत्पत्तयेऽस्माभिस्संक्षिप्योक्ता यथामति ॥**

पाणिनीयव्याकरणप्रवेशकामानां छात्राणां कृते सरण्या सरलैः शब्दैश्च मध्यमो मार्गोऽवलम्बितः रामचन्द्रेण अनेन । अस्य ग्रन्थस्य मुख्यं प्रयोजनं संक्षेपतः पाणिनीयव्याकरणस्य प्रक्रियाज्ञानं विद्यते । पूर्वार्धरूप-उत्तरार्धरूपभागद्वयेन विभक्तोऽयं ग्रन्थः। तत्र पूर्वार्धे सुबन्तप्रक्रिया उत्तरार्धे तु तिङन्तप्रक्रिया । ग्रन्थकृतः पौत्रेण विठ्ठलाचार्येण प्रसादटीकाप्रसादेन विशदीकृतोऽयं ग्रन्थः । स्वकीयपितामहेन रचितायाः वैष्णवसिद्धान्तदीपिकायाः 'न्यायस्नेहप्रपूरणी' व्याख्याऽपि विठ्ठलाचार्येण व्यरचि । तदनन्तरं प्रक्रियाग्रन्थानां समग्रस्वरूपं काशीत एव प्राकाश्यत । तत्र सर्वप्रथमं शेषवंशोद्भवेन कृष्णमहोदयेन प्रक्रियाकौमुद्याः विस्तृतव्याख्यानभूतो ग्रन्थः 'प्रक्रियाप्रकाशो' विरचितः । प्रक्रियाकौमुद्युत्पत्तिकालश्च ख्रीष्टाब्दीयपञ्चदशशतकस्य मध्यभाग इति रामकृष्णभाण्डारकरविद्वद्वरैः सहेतुकं सुसाधितः स्थापितः च । ततः वरदराजस्य 'लघुसिद्धान्तकौमुदी' इत्यादिग्रन्थाः प्रक्रियापरम्परायां यद्यपि विद्यन्ते, तथापि सम्पूर्णपाणिनि-सूत्रानुसारेण पूर्णाङ्गप्रक्रियाग्रन्थः भवति भट्टोजिदीक्षितस्य 'वैयाकरणसिद्धान्तकौमुदी' । रूपसिद्धेश्चारुकथनार्थमुत्पन्नेषु पाणिनीयमतानुसारिषु प्रख्यातव्याकरणग्रन्थेषु 'प्रक्रियासर्वस्वं' 'सिद्धान्तकौमुदी' च समानकाले समभूते ख्रीष्टाब्दीयसप्तदशशतके । तत्र विंशत्या खण्डैः सम्पुटितस्य केरलाभिजनस्य निलानदीतीरपरिसरवर्तिनारायणक्षेत्रोत्तरचन्दनक्कावुसंज्ञितस्य देशस्य सुप्रसिद्धमेल्युत्तूर्भवनाभिजातस्य प्रौढमीमांसकपण्डितस्य मातृदत्तस्य पुत्रस्य महापण्डि-तस्य द्विजश्रीनारायणभट्टप्रणीतस्य पाणिनिसूत्रवृतेः 'प्रक्रियासर्वस्वम्' इति ग्रन्थस्य महत्त्वं सर्वजनप्रसिद्धम् । स्वयं नारायणः प्रक्रियासर्वस्वे संज्ञाखण्डे स्वग्रन्थविषये वदति नारायणक्षेत्रोत्तर चन्दनक्कावुसंज्ञितस्य देशस्य सुप्रसिद्धमेल्युत्तूर्भुवनाभिजातस्य प्रौढमीमांसकपण्डितस्य मातृदत्तस्य पुत्रस्य महापण्डितस्य द्विजश्रीनारायणभट्टप्रणीतस्य पाणिनिसूत्रवृतेः 'प्रक्रियासर्वस्वम्' इति ग्रन्थस्य महत्त्वं सर्वजनप्रसिद्धम् । स्वयं नारायणः प्रक्रियासर्वस्वे संज्ञाखण्डे स्वग्रन्थविषये वदति - **वृत्तौ चारु न रूपसिद्धिकथनं रूपावतारे पुनः,**
**कौमुद्यादिषु चात्र सूत्रमखिलं नास्त्येव तस्मात् त्वया ।**
**रूपाणीति समस्तसूत्रसहितं स्पष्टं मितं प्रक्रिया-,**

 ISBN: 978-81-930770-3-0

**सर्वस्वाभिहितं निबन्धनमिदं कार्यं मदुक्ताध्वना ।।**
**इह संज्ञा परिभाषा सन्धिः कृत्तद्धिताः समासाश्च ।**
**स्त्रीप्रत्ययाः सुबर्थाः सुपां विधिश्चात्मनेपदविभागः ।।**
**तिङपि च लार्थविशेषाः सनन्तयङ्यङ्लुकश्च सुब्धातुः ।**
**न्यायो धातुरूणादिश्छान्दसमिति सन्तु विंशतिः खण्डाः ।।** (५-७)

किञ्च पूर्णाङ्गप्रक्रियाग्रन्थानां समग्रस्वरूपं काशीत एव प्राकाश्यत । लौकिकवैदिकोभयशब्दानुशासनात्मकसमग्राष्टाध्यायी समावेशिता दीक्षितेनास्यां कौमुद्याम् । कौमुद्याः प्रकाशे पूर्वाचार्यनिबद्धाः सर्वेऽपि ग्रन्थतारका अभिभूताः । ग्रन्थनामविषये केचिदेवं वदन्ति यत् सिद्धान्तशुद्धिविबुभुत्सुजनानुरोधादिति प्रकाशव्याख्यायाः 'सिद्धान्त' शब्दोऽङ्गीकृतः अनेन विदुषा, प्रक्रियाकौमुद्या च 'कौमुदी'शब्द इति । पुनः इह नागेशः सिद्धान्तकौमुदी इति नामकरणस्य सार्थकतां प्रतिपादयन् लघुशब्देन्दुशेखरस्य प्रारम्भे वदति 'सिद्धान्तप्रकाशकत्वेनातिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य शामकत्वेन च कौमुदीसादृश्यम्' (लघुशब्देन्दुशेखरः, संज्ञाप्रकरणम्, प्रारम्भे)। अर्थात् 'सिद्धान्तस्य निर्णीतार्थस्य प्रकाशकत्वेन बोधकत्वेन अतिदुरूहाणि दुर्बोधानि यानि ग्रन्थान्तराणि अन्यपुस्तकानि महाभाष्यादीनि, तेभ्यो निर्णीतार्थबोधे सम्पादनीये जायमानस्य अनुभूयमानस्य क्लेशरूपसन्ता-पस्य दुःखस्य शामकत्वेन निरोधकत्वेन कौमुद्या चन्द्रिकया सह सिद्धान्तकौमुद्याः सादृश्यम् साम्यम् । तथा च कौमुदीसादृश्यविशिष्टे कौमुदीपदं लाक्षणिकमित्युपमालङ्कारो ध्वन्यते' । (राधिकाटीका, लघुशब्देन्दुशेखरः, टीकाकारः आचार्यः ब्रह्मदत्तद्विवेदी, सुशीलप्रकाशनम्, पटना, १९८८, अत्रैव, पृ.९-१०) । पुनः बालमनोरमाकारः प्रतिपादयति 'वैयाकरणसिद्धान्तकौमुदीत्यन्वर्थसंज्ञया वैयाकरणसिद्धान्ताः प्रतिपाद्यत्वेन विषयाः । अनायासेने तदवगमः प्रयोजनम् । तस्य ग्रन्थस्य च जन्यजनकभावः संबन्धः । वैयाकरणसिद्धान्तजिज्ञासुरधिकारीति सूचितम्' (सिद्धान्तकौमुद्याः प्रारम्भे) । कौमुद्यामस्यां प्रक्रियाप्रकरणस्य प्रभावः स्पष्टतया परिलक्ष्यते । स्वाभाविकः च एष एव। पुनः भट्टोजिदीक्षितस्यैव समकालिको प्रक्रियासर्वस्वकारः नारायणभट्टः प्रक्रियाविषये सर्वस्वं प्रतिपादितवान् । दीक्षितभट्टयोः परस्परं दर्शनं न जातम्, नानेन नारायणभट्टेन वैयाकरणसिद्धान्तकौमुदी स्वजीवने विलोकिता, न च भट्टोजिदीक्षितेन विंशखण्डात्मकं प्रक्रियासर्वस्वं विलोकितम् । एवं ह्यनुश्रूयते यत् श्रीनारायणभटः दीक्षितमहोदयस्य दर्शनार्थं स्वस्थानात् प्रस्थितोऽभवत्, किन्तु मार्गे एव दीक्षितस्य निधनं श्रुत्वा परावर्तितोऽभवत् । तेषु प्रकरणानुसारेण पूर्वेषां वैयाकरणानां वामन-जयादित्य-हरदत्तादीनां नामोल्लेखपूर्वक तेषां तेषां मतानां विचारः कृतोऽस्ति । प्रक्रियासर्वस्वस्य सर्वतोऽधिकं महत्त्वं यदत्र अपाणिनीयानां प्रयोगाणां युक्तायुक्तविचारः कृतोऽस्ति । अनेनैव महानुभावेन धातुकाव्ये पाणिनीयव्याकरणोदाहृतधातूनां क्रमशः प्रयोगः अक्रूरकथाप्रसङ्गेन उदाहृतः । पुनः सिद्धान्तकौमुद्या अनन्तरं तत्समानं ग्रन्थरत्नं विंशशतकीयेन नयपालदेशवास्तव्येन पंडितसोमनाथशर्मणा 'प्रतिसंस्कृता सिद्धान्तकौमुदी'

 ISBN: 978-81-930770-3-0

व्यलेखि। 'प्रतिसंस्कृता' इति पदमस्याः वैशिष्ट्यं सूचयति। सिद्धान्तकौमुद्याः मूलग्रन्थे ये विषयाः सङ्केतिताः किन्तु अनुल्लिखिताः अविद्यन्त, तेषां मूलग्रन्थे एव यत्रतत्रापेक्षितो भावः परिलक्षितः, स खलु मूलग्रन्थे एव नियोज्य दूरीकृतः । लौकिकशब्दानां सिद्धिप्रदर्शनमेवास्य ग्रन्थस्य उपयोगः। लोके अनपेक्षिता वैदिकप्रयोगा अत्र सर्वादौ परित्यक्ता इति लक्ष्यते। यत्किमपि वा भवतु, प्रक्रियापरम्परायां सिद्धान्तकौमुदी पताकायते। पुनः स्वरूपदृष्ट्या इयं प्रक्रियापरम्परा द्विप्रकारिका विद्यते। यथा -

(क) लघुप्रक्रियापरम्परा/संक्षिप्तप्रक्रियापरम्परा- अत्र प्रथमभागे कतिपयपाणिनीयसूत्राणां सारल्येन प्रक्रियानुसारेण च सवृत्तिकव्याख्यानं विद्यते । ततः इयं परम्परा लघुप्रक्रियापरम्परा संक्षिप्तप्रक्रियापरम्परा वा भवति । अस्योदाहरणरूपेण वरदराजस्य 'लघुसिद्धान्तकौमुदी', 'मध्यसिद्धान्तकौमुदी' 'सारसिद्धान्तकौमुदी', सुरेशझामहोदयस्य 'श्लोकसिद्धान्तकौमुदी', 'गोपालशास्त्रिदर्शनकेसरिविरचितः 'पाणिनीयप्रबोधः' इत्यादयः ग्रन्थाः आयान्ति।

(ख) पूर्णाङ्गप्रक्रियापरम्परा- अत्र द्वितीयभागे सम्पूर्णपाणिनीयसूत्राणां सारल्येन प्रक्रियानुसारेण च सवृत्तिकव्याख्यानं विद्यते। ततः इयं परम्परा पूर्णाङ्गप्रक्रिया परम्परा भवति। अस्योदाहरणरूपेण भट्टोजिदीक्षितस्य 'सिद्धान्तकौमुदी', पुष्पादीक्षितस्य 'पौष्पी नव्यसिद्धान्तकौमुदी' इत्यादयः ग्रन्थाः आयान्ति। अतः प्रक्रियापरम्परायामतिप्रसिद्धौ भट्टोजिदीक्षितवरदराजाचार्यौ। तयोः संक्षिप्तविवरणं यथा- तत्र संस्कृतव्याकरणस्य परम्परायां भट्टोजिदीक्षितस्य स्थानं स्वतन्त्रम् । अयमेकः स्वयं सम्पूर्णवैयाकरणः भवति। पाणिनीयव्याकरणस्य विविधपरम्परायामस्य अनायासप्रवेशः आसीत्। अयं महाराष्ट्रीयब्राह्मणः आसीत् । अस्य पितुः नाम 'लक्ष्मीधरभट्टः', पितामहस्य नाम 'हृदयधरभट्टः, अनुजस्य नाम 'रङ्गोजिभट्टः', पुत्रस्य नाम 'भानुजिदीक्षितः', भ्रातुः पुत्रस्य नाम 'कौण्डभट्टः', पौत्रस्य नाम 'हरिदीक्षितः' आसीत्। हरिदीक्षितस्य शिष्यस्य नाम 'नागेशः' तथा नागेशस्य शिष्यस्य नाम 'वैद्यनाथपायगुण्डे' आसीत् । भट्टोजिदीक्षितस्य पूर्वजाः विष्णुमन्दिरे पूजकाः आसन्, अतः एतदर्थं दीक्षितः इति उपाधिना एते भूषिताः आसन्। अयं भट्टोजिदीक्षितः जीवनस्य अन्तिमसमयं काश्याम् अतिवाहितवान् । अस्य आद्यगुरुः तस्य पिता आसीत् । कालान्तरे दीक्षितः भरद्वाजगोत्रोत्पन्नात् आचार्यदीक्षितस्य पौत्रात् रङ्गराजस्य पुत्रात् अप्पयदीक्षितात् वेदान्तादिशास्त्रम् अधीतवान् । पुनः शेषकृत्स्नात् स व्याकरणशास्त्रमपि अधीतवान् । अस्य भट्टोजिदीक्षितस्य शिष्यौ वरदराजाचार्यः नीलकण्ठशुक्लः च आस्ताम् । विविधमतानाम् अनुसरणेन एवं कथ्यते – अस्य महावैयाकरणस्य भट्टोजिदीक्षितस्य कालः १६३० ख्रीष्टाब्दः भवितुमर्हति । (Systems of Sanskrit Grammar, S. K. Belvalkar, Published by the Author, Poona, First Edition, 1915, p.47)।

भट्टोजिदीक्षितस्य नाम्ना विविधग्रन्थाः प्राप्यन्ते । परन्तु तेषु ग्रन्थेषु निर्विवादरूपेण स्वीकृतग्रन्थाः भवन्ति- (१) सिद्धान्तकौमुदी(प्रक्रियाग्रन्थः), (२) प्रौढमनोरमा (सिद्धान्तकौमुद्याः प्रथमटीकाग्रन्थः), (३) शब्दकौस्तुभः (अष्टाध्याय्याः व्याख्यानग्रन्थः), (४) वैयाकरणसिद्धान्त-

कारिका/वैयाकरणभूषणकारिका/वैयाकरणभूषणम् (अस्य ग्रन्थस्योपरि कौण्डभट्टेन वैयाकरण-भूषणसारः विरचितः), (५) धातुपाठनिर्णयः, (६) लिङ्गानुशासनवृत्तिः च । एतदतिरिक्ताः दीक्षितस्य अन्ये ग्रन्थाः अपि प्राप्यन्ते । निरन्तरं मेधाप्रतिभे ह्रासं प्राप्नुवतः अस्मिन्युगे यत्र पाणिनीयसिद्धान्तावगमः छात्राणां दुष्करः सञ्जातः, तत्र षोडशशताब्द्यां शेषश्रीकृष्णान्तेवासिना भट्टोजिदीक्षितेन भाष्याधिं प्रमथ्य विरचितः वैयाकरणसिद्धान्तकौमुदीग्रन्थः एकः सुगमः मार्गः पाणिनीयशास्त्रप्रवेशाय इति निःसन्देहेन सर्वैः स्वीक्रियते एव । पूर्वस्मिन्काले आचार्यस्य पाणिनेः अल्पाक्षरादिगुणयुक्तः अष्टाध्यायीक्रमः प्रचलित आसीत् । ततः कालेन छात्राणाम् अनुभूयमानं कष्टं परिजिहीर्षुणा कात्यायनेन सूत्राणां व्याख्यानरूपेण उक्तानुक्तदुरुक्तचिन्तायुक्तानि वार्तिकानि विरचितानि । तत्रापि कालेन छात्राणां काठिन्यनिवारणाय गोनर्दीयपतञ्जलिना सूत्रवार्त्तिक-व्याख्यानरूपं जगति ख्यातं महाभाष्यं रचितम् । कालान्तरे अस्य सूत्रवार्तिकभाष्यरूपक्रमस्योपरि जयादित्यवामनाभ्यां काशिका इति महती वृत्तिः प्रणीता। परन्तु अहो विचित्रमिदं कालमाहात्म्यम्। अत्रापि छात्राः महत् क्लेशम् अनुभूतवन्तः । ततः एतादृशस्य क्लेशस्य दूरीकरणाय अष्टाध्यायीसूत्रक्रमं परिवर्त्य प्रकरणक्रममाश्रित्य भट्टोजिदीक्षितेन अयं वैयाकरणसिद्धान्तकौमुदी-ग्रन्थः विरचितः । यद्यपि प्रक्रियाक्रमे अयं न नूतनः ग्रन्थः, तथापि पूर्वतनप्रक्रियाकौमुद्यादिग्रन्था-पेक्षया कृतिरियं सरला सम्पूर्णा सुस्पष्टा च वर्तते । सर्वाणि अष्टकगतपाणिनीयसूत्राणि सयुक्तिकं पूर्वापरसम्बन्धप्रदर्शनपुरःसरं इह सारल्येन तारल्येन च व्याख्यातानि । अत्र भट्टोजीदीक्षितः न केवलं पाणिनीयसूत्राणाम् अर्थं वर्णयति, अपि तु अपेक्षितेषु स्थलेषु पूर्वकाशिकाकारादीनां युक्तिग्राह्यमतमपि सम्यग्रूपेण उपस्थापयति । अतः सर्वथा पाणिनीयसिद्धान्तज्ञानाय अयं प्रक्रियाग्रन्थ उपकारीति नास्ति सन्देहस्य लेशमात्रावकाशः । किम्बहुना, तदानीं वाराणस्यां प्रत्यहं सभ्यसभासु, विद्वत्समवायेषु, जाह्नवीघट्टसोपानेषु, देवगृहेषु, विदुषां कथनोपकथनेषु, सहृदयानां गोष्ठीबन्धेषु च प्रतिरथ्यं, प्रतिमन्दिरं, प्रतिकुटीकोटरं च सिद्धान्तकौमुदी, तद्व्याख्यां प्रौढमनोरमा-ञ्चाधिकृत्यैव विचारविमर्शः, तर्कः, आक्षेपप्रतिसमाधानादिकञ्च जनसंमर्देन, श्रोतृजनकोला-हलेन, प्रेक्षकवृन्दसाधुवादकरताडनादिभिः साकं महता संरम्भेण तथा समुदित, यथा सर्वदिङ्-मण्डलमेव विक्षुब्धान्तरालमिवाऽभूत् । अतः एतदर्थ सङ्गच्छते अभियुक्तोक्तिः –

**कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ।**
**कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः ।।**
**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ।।**

एतत्प्रणीतव्याकरणग्रन्थानामन्यतमा वैयाकरणसिद्धान्तकौमुदी, सर्वसिद्धान्तसंग्रहात्मक-तया सौविध्याधिक्यादविरलप्रचाराभवत् । सैव वैयाकरणसिद्धान्तकौमुदी सम्प्रति आसेतु हिमालयं प्रायः अध्ययनाध्यापनादिक्रमेण विलसन्ती समयेन संवदन्ती स्वकीयं सरलत्वं पूर्णत्वमुपयोगित्वं स्वाविष्कारकस्य च महत्त्वं पुष्णाति । इयं भट्टोजिदीक्षितस्य चतुर्दिक्षु कीर्तिप्रसारिका अमरा

 ISBN: 978-81-930770-3-0

कृतिरद्यत्वे पाणिनीयव्याकरणज्ञानस्य मूलाधारभूता समग्रेऽपि भारते पठनपाठने प्रवर्तिता मुख्यरचनाऽस्ति । शब्दकौस्तुभस्य रचनायाः परमस्याः रचना कृता । स्वयमेव च दीक्षितः प्रौढमनोरमानाम्ना अस्याः प्रौढां विवृत्तिमपि चकार । प्रक्रियापद्धतेः सर्वोत्तमो ग्रन्थः सिद्धान्त-कौमुदी इति सर्वैः स्वीक्रियते । अस्या रचनायाः पूर्वं कृतेषु प्रक्रियाग्रन्थेषु पाणिनेः सर्वेषां सूत्राणां समावेशः नासीत् । किन्तु दीक्षितः अष्टाध्याय्याः सर्वाणि सूत्राणि विविधप्रकरणेषु संयोज्य व्याकरणप्रक्रियाज्ञानं नवीनपद्धत्या व्यवस्थापयामास । अत्रैव समस्तधातूनां रूपविवरणं प्रस्तुतं, तथा च लौकिकसंस्कृतव्याकरणस्य विश्लेषणं कृत्वा स्वरवैदिकीप्रक्रियाम् अन्ते विवेचयामास । सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः काशिकान्यासपदमञ्जरीत्यादिसूत्रक्रमानुसारिणीः व्याख्याः समीक्ष्य प्रक्रियापद्धतिमाध्यमेन पाणिनीयव्याकरणस्य सर्वतो भावेन समग्ररूपं प्रदर्शयामास इहाशेषजगति । सन्दर्भानुरूपाणां परिभाषाणां वार्तिकानां भाष्योक्तीनाञ्च यत्र तत्र उल्लेखः कृतवान् स्वरीत्या । मुनित्रयमते सामञ्जस्यं स्थापयन् महाभाष्यमाधारीकृत्य च स्वकीयानि मतान्यपि उपास्थापयत् । प्रसिद्धकविभिः प्रयुक्तानां विवादास्पदप्रयोगाणां साधुत्वविचारमप्य-करोत् तथा प्राचीनोक्तीः परिभावितवानपि इह । सिद्धान्तकौमुद्याः मङ्गलाचरणे एतत्सर्वमुद्भा-वयति दीक्षितः । यथा- **मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**

**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।।**

अस्मिन् युगे सिद्धान्तकौमुद्याः वैशिष्ट्यकारणात् तावान् प्रचारो जातः येन पाणिनीय-व्याकरणस्य प्राचीनपद्धतयः मुग्धबोधादिव्याकरणपद्धतयश्च क्रमशो विलीना अभूवन् । यद्यपि प्रक्रियापद्धतेः सिद्धान्तकौमुद्याश्च केचन दोषा अपि उद्भाविता विद्वद्भिस्तथापि गुणागारेऽस्याः ते न गणिता विद्याविचक्षणैः । 'न हि कस्तूरिकामोदः शपथेन विभाव्यते । 'तस्याः सन्ति बह्वयष्टीकाः प्रथिताः । किन्तु तासु वासुदेवदीक्षितप्रणीतान्वर्थनाम्नी बालमनोरमा स्वगौरवमहिम्ना किमपि विशिष्टं महत्त्वं बिभर्ति । यदीया हृद्या व्याख्यानशैली ग्रन्थरहस्यावतारकावतरणशोभिता व्युत्पत्तिप्रदर्शिका अधिगमितयाथातथ्येति शास्त्ररहस्यजिज्ञासूनां मनांसि हरति । पदानां विग्रही-करणं, प्रयोगाणां विवरणं, नियमानां लक्ष्ये सङ्गमनं, यत्र लक्षणप्रवृत्तिरनिष्टा तादृशप्रत्युदाहर-णस्य प्रदर्शनम्, अपेक्षितक्रियादीनामध्याहारः, ऊहः, सिद्धान्तनिश्चयनमित्यादिकं टीकान्तरेभ्यः तां व्यतिरेकयति । इयं टीका नागेशस्य लघुशब्देन्दुशेखरानुसारेण एव वलति । स्वक्लिष्टतायै प्रथितस्यास्य कौमुदीग्रन्थस्य विषयप्रतिपादनमीदृश्या सरलपद्धत्यात्र कृतं, न तथान्यत्र विलोक्यते इति । बालानां ग्रन्थार्थाधिगमस्य सर्वथोपयोगितेयं परिगण्यते मनीषिभिः । पुनः कौमुद्याः उपरि ज्ञानेन्द्रसरस्वत्याः तत्त्वबोधिनी टीका प्रौढमनोरमायाः भावं स्पष्टयति अनेकत्र । अर्थात् संक्षेपेण बालमनोरमा लघुशब्देन्दुशेखरमनुकरोति तथा च तत्त्वबोधिनी प्रौढमनोरमाम् । अनेन क्रमेण कौमुद्याः उपरि बहुटीका कालान्तरे रचिता । परन्त्वियमपि प्रायेण विदुषामेव मनः कुमुदमोदिनी समजनि, यतः फक्किकासम्पर्ककर्कशतया स्वभावतः सुकुमारमतीनां बालकानां चेतसे नातीवेयमरोचत । ततो बालानामपि बुद्धिर्व्याकरणविषये निवेशयितुमनसा भट्टोजिदीक्षितस्यैवा-

 ISBN: 978-81-930770-3-0

न्तेवासिना श्रीदुर्गातनयेन विद्वद्वरवरदराजाचार्येण सारसिद्धान्तकौमुदी-मध्यसिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदी-गीर्वाणपदमञ्जरीनामानो ग्रन्थाः विरचिताः । एतत्प्रणीतग्रन्थानामन्यतमा 'लघुसिद्धान्तकौमुदी'यं तत्रभवतां पाठकानां सम्मुखीना समुल्लसति। लघुकलेवराप्येषा समासतः सिद्धान्तकौमुदीसम्भवं समस्तं ज्ञानं समुद्भावयति। ननु सिद्धान्तकौमुद्या एवेदं संक्षिप्तं संस्करणम्। लघुसिद्धान्तकौमुद्याः प्रणयनानन्तरं वरदराजः स्वगुरोः भट्टोजिदीक्षितस्य सिद्धान्तकौमुदीं लघुरूपेण संकलनद्वारेण मध्यसिद्धान्तकौमुदीं प्रणीतवान्। मध्यसिद्धान्तकौमुद्या अन्ते वरदराजेन उक्तम्- **कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।**

**तस्याः संख्या तु विज्ञेया खबाणकरवह्निधिः (३२५०)।।**

वरदराजस्य इयं मध्यसिद्धान्तकौमुदी सारल्येन संस्कृतव्याकरणशास्त्रस्य त्वरितं पूर्णं च ज्ञानं कारयति इति विषये नास्ति सन्देहस्य लेशमात्रावकाशः। वरदराजस्य विषये उच्यते-

**धर्मकीर्तिसमारब्धा रामचन्द्रविकासिता।**
**भट्टोजि प्राप्य या विशं प्रक्रिया पूर्णतां गता।।**
**सा मध्यलघुरूपेण पूर्व सङ्का प्रयत्नतः।**
**कृता वरदराजेन सारसिद्धान्तकौमुदी।।**
**सैव व्याख्यायते छात्रज्ञानसौकर्यदृष्टितः।**
**अनेन प्रीयतामीशो देवः प्रथमशाब्दिकः।।**
**कृता वरदभट्टेन दुर्गातनयसूनुना।**
**वेदवेदप्रकाशाय सारसिद्धान्तकौमुदी।।**
**सर्वशास्त्रप्रवेशाय सार्द्धसप्तशती कृता।**
**सुखेन बालबोधाय तेन तुष्यतु शङ्करः।।**

**समन्वयः-** पाणिनिशब्दानुशासनेन कथं लघुना उपायेन स्वल्पकालेन च प्रयोगसिद्धिर्भवेत्, एतदर्थं शब्दशास्त्रप्रवृत्तिजिज्ञासवः विद्वांसः वैयाकरणाः सतत यत्नशीलाः सन्ति । अनेनैवाशयेन पतञ्जलिवचनं युक्तं प्रतिभाति 'अनभ्युपाय एषः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हि इमे शब्दाः प्रतिपत्तव्याः ? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान्प्रतिपद्येरन्' (पस्पशाह्निकम्, तृतीयाधिकरणम्) । इह पतञ्जलिः लघुना उपायेन स्वल्पकालेन शब्दानुशासने पारङ्गमार्थं सामान्यविशेषरूपोपायद्वयं सङ्केतयति । साधुशब्दान्व्युत्पादयितुं वामनजयादित्यादौ, रामचन्द्रभट्टोजिदीक्षितादौ च प्रमुखाः शाब्दिकाः शब्दानुशासनस्य कार्यकालयथोद्देशपद्धतिरूपौ द्वौ मार्गौ स्वीकृतौ । तथैव नागेशभट्टेन 'यथोद्देशं संज्ञापरिभाषम्' तथा 'कार्यकालं संज्ञा-परिभाषम्' इति द्वे पद्धती अस्मिन्नर्थे सङ्केतिते परिभाषेन्दुशेखरे परिभाषामुखेन। किञ्च पतञ्जलिनाऽपि पद्धतिद्वयं सङ्केतिता, यथा एवं तर्हि किं न एतेन यत्नेन कार्यकालं संज्ञापरिभाषमिति। यथोद्देशमेव संज्ञापरिभाषम्। तत्र चासावसिद्ध-

स्तस्यासिद्धत्वात्तत्काला एव भवन्ति (महाभाष्यम्, पा.१/१/११) । वस्तुतः व्याकरणस्य पठनपाठनयोः पद्धतिद्वयं दृग्गोचरी भवति। यथा यथोद्देशपद्धतिः, कार्यकालपद्धतिश्च। यथा-

(अ) यथोद्देशपद्धतिः- अष्टाध्यायीसूत्रपाठः, धातुपाठः, उणादिपाठः, गणपाठः, लिङ्गानुशासनं समुदितमेतत् 'पञ्चाङ्गव्याकरणम्' अथवा 'पञ्चपाठी'त्युच्यते। समुदितमेतत् पठित्वैव 'अधीता-ष्टाध्यायी' इति लोके दृश्यते मन्तव्यम् । यदि पञ्चाङ्गव्याकरणयुक्ता पाणिनीया अष्टाध्यायी सूत्रक्रमपद्धत्यानुसारेण पठ्यते पाठ्यते वा, तर्हि सा पद्धतिः 'यथोद्देशपद्धतिः' इत्युच्यते। उद्देशमन-तिक्रम्य यथोद्देशम्। अर्थात् अष्टाध्यायीसूत्रक्रममनतिक्रम्य प्रस्तुता पद्धतिः 'यथोद्देशपद्धतिः। यथा जयादित्यवामनयोः 'काशिकावृत्तिः' । जयादित्यवामनाभ्यां या काशिकावृत्ति नाम्नी व्याख्या विलिखिता, सा अष्टाध्यायीसूत्रक्रमेण अनुवर्तते। किमर्थं पाणिनिना अस्मिन्प्रकरणेऽस्मिनुद्देशे वा सूत्रं पठितम्, तत्सूत्रार्थज्ञानाय केषां शब्दानामनुवृत्तिरधिकारो वा अपेक्ष्यते एतत्सर्वं ज्ञातुं वृत्तिग्रन्थानां विश्लेषणात्मकयथोद्देशपद्धतिः उपयुक्ता भवति। तत्र विश्लेषणात्मक यथोद्देशपद्धतौ सूत्राणां वृत्तिः, तेषामुदाहरणानि, प्रत्युदाहरणानि, शङ्कासमाधानपुरस्सरं च प्रदर्शितानि । अस्मिन्पक्षे सूत्रपाठक्रम एव प्राधान्येनाश्रीयते। यथा "वृद्धिरादैच्" इति सूत्रमधीयानश्छात्रोऽस्य सूत्रस्य पदच्छेद-विभक्ति-समास-अर्थ-उदाहरणादिसर्वं पठन् तत्र शालीयः, भागः, नायकः, अचैषीत्, अलावीत्, माष्टि, इत्यादीनां चोदाहरणानां सिद्धि सर्वेस्सूत्रैरष्टाध्यायी पद्धत्या एव सम्पादयति। एवमष्टाध्यायीं धातुपाठञ्च सम्यगध्यस्य प्रथमावृत्तौ उदाहरणानां सिद्धि कुर्वन्त एव छात्राः सर्वां तिङन्तप्रक्रियां, सुबन्तप्रक्रियां, कृदन्तप्रक्रियां, तद्धितसमासादिप्रक्रियां च विनापि प्रक्रियाग्रन्थाश्रयेणावबुद्धयन्ते स्म । तत्र च सर्वेषां धातूनां सर्वलकारेषु सर्वप्रक्रियासु चैकैकशो रूपाणि अष्टकसूत्रपुरस्सरं संसाधयन्तः प्रक्रियाग्रन्थानामभावेऽपि यथोद्देशपद्धतिधरः ते छात्रा न कीदृशीमपि न्यूनतां तत्रानुभवन्ति स्म । अयं क्रमस्तदानीं सर्वसाधारणेषु आदरेण सह प्रचलित आसीत् । प्रक्रियाग्रन्थनिर्माणस्य प्रश्न एव नोतिष्ठत । परन्तु कालप्रभावात्, तत्कालफललाभे-च्छाबलात्, मेधाह्रासाच्च यदा हि अध्यापकास्तद्रीत्या छात्राणामध्यापने प्रमादाद् भूयांस क्लेशमनुभवन्तः शैथिल्यमाजगुस्तदा ते तामेव प्रयोगसाधनसमये छात्रैः लिपिकृतां प्रयोगसाधन-प्रक्रियां ग्रन्थरूपेण निर्मापयाञ्चक्रुः शनैः शनैरष्टाध्यायीक्रमेण प्रयोगसाधनप्रक्रिया तु शिथिलतामगात् । प्रक्रियाग्रन्थानामाश्रय ग्रहणमेवोत्तरोत्तरमवर्द्धत । ततः कार्यकालपक्षस्यैव आश्रयणं जातम्।

(आ) कार्यकालपद्धतिः- पक्षान्तरे अष्टाध्याय्यां विकीर्णानां बहूनां सूत्राणां प्रक्रियायाः कृते एकवाक्यता एकप्रदेशविषयता च आवश्यकीति निरूपयितुं ह्रासबुद्धिधराध्येतृणां कृते कार्यकालपक्षः उपादीयते। अतः यदि अष्टाध्यायीपठनप्रक्रियां सरलीकर्तुं पाणिनीयसूत्राणि भिन्नां शैलीमाश्रित्य व्यवस्थितरीत्या प्रकरणरूपेण विभज्य पठ्यन्ते पाठ्यन्ते च, तर्हि सा पद्धतिः 'कार्यकालपद्धतिः' इत्युच्यते। कार्यस्य कालः कार्यकालः, कार्यकालः कालः अस्याः पद्धत्याः इति कार्यकालपद्धतिः। अर्थाद्यदा सूत्राणां कार्यकारणस्य कालः भवति तदानीमेव तेषामुपस्थितिः

भवति व्यवस्थितरीत्या प्रकरणरूपेण । यथा रूपावतारसिद्धान्तकौमुदी-नव्यसिद्धान्तकौमुदी-त्यादयः । तदानीमप्येतत्त्वासीदेव यदष्टाध्यायीमध्यस्य तत्क्रमानुरूपं, सूत्रार्थं विज्ञायैव प्रक्रिया-ग्रन्थरूपेण परिणतानां सिद्धान्तकौमुदीपूर्ववर्तिनां रूपावतारप्रक्रियारत्न-रूपमाला-प्रक्रिया-कौमुद्यादीनां, प्रक्रियासर्वस्वप्रभृतीनां च अष्टाध्यायीकालिकच्छात्रकर्तृकप्रयोगसाधनलिपि-रूपाणामध्येतारो गृह्णन्ति स्म । अष्टाध्याय्याश्रयणन्तु तदानीमनिवार्यमेवासीत् । प्रक्रियाग्रन्थानां निर्मित्यनन्तरमपि यदष्टाध्यायीसूत्रपाठस्य त्यागो नाभविष्यत्, तदाप्यष्टाध्याय्या उपस्थित्या प्रक्रियाग्रन्थेभ्योऽपि साधारणबुद्धिभ्यश्छात्रेभ्यस्तत्र किञ्चित्सौकार्य्यमभविष्यत् यदि मूलं त्यक्त्वा शाखासु गमनं नाभविष्यत् । एवमष्टाध्यायीसूत्रक्रमपाठाश्रयेण प्रक्रियाग्रन्थाना-मध्यासो बहुकालाय प्राचलत् । अग्रे बहुतिथे काले गतेऽष्टाध्यायीसूत्रक्रमपाठः प्रमादात्सर्वथाऽपि विलुप्तः, केवलं प्रक्रियाग्रन्थानां पठनपाठनक्रम एव सर्वत्र प्रचलितोऽभूत् । तदारभ्यैवैतेषां प्रक्रियाकौमुदी-सिद्धान्तकौमुदीप्रभृतीनामुत्पत्तिपरम्परा तेषां व्यापकता च समजनि । एतत्कालमध्ये एवैकैक-स्योपर्यपरस्य प्रक्रियाग्रन्थस्य निर्माणप्रवाहः प्रवृत्तः ।

**निष्कर्षः -** अत्रोक्तपद्धतिद्वयस्य स्वस्वस्थाने गुणाः सन्ति दोषा अपि सन्ति । संक्षेपेण एवं कथ्यते संस्कृतव्याकरणस्य स्वरूपाक्षुण्णाय संरक्षणाय च 'यथोद्देशपद्धति' अपेक्षिता वर्त्तते । तेनैव प्रकारेण संस्कृतव्याकरणस्य प्रचाराय प्रसाराय च 'कार्यकालपद्धति' अपेक्षिता वर्त्तते ।

## सहायकग्रन्थसूची

१. अपाणिनीयप्रामाण्यसाधनम् नारायणभट्टः, सम्पादकः E. R. Shreekrishna Sarma, Sri Venkateswara University, Oriental Research Institute, Tirupati, 1968.

२. अमरकोशः (मणिप्रभाव्याख्योपेतः) व्याख्याकारः, पण्डितहरगोविन्दशास्त्री, चौखम्बासंस्कृत-सीरिजअफिस, वाराणसी, षष्ठसंस्करणम्, १९९४.

३. आहाध्यायी सम्पादकौ श्रीगोपालदत्तपाण्डेयः, स्वामीश्रीप्रह्लादगिरिः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, १९८११.

४. ऋक्तन्वम् - साकटायन, सम्पादकः, सूर्यकान्ताः मोरकर-लक्ष्मणदासः, दिल्ली, १९७०.

५. कातन्वव्याकरणविमर्शः जानकीप्रसादद्विवेदः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम्, २०१६.

६. काशिकावृतिः (न्यासपदमञ्जरीव्याख्योपेता), भागाः १-६, सम्पादकौ स्वामीद्वारिकादासशास्त्री तथा आचार्यकालिकाप्रसादशुक्लः, सुधिप्रकाशनम्, द्वितीयसंस्करणम्, क्रमेण १९८३, १९८३, १९८४, १९८४, १९८५,१९८५.

७. बान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्, डॉ. हर्षनाथमिश्रः, एल्, वि, पि. एस्, नवदेहली, २५.१०.१९७४

८. निरुक्तम्, सम्पादकः प्रो. उमाशङ्करशर्मा (ऋषि), चौखम्बा विद्याभवनम्, वाराणसी, पञ्यमसंस्करणम्, १९८९.

९. परमलघुमञ्जूषा संपादकः, जयशङ्करलाल त्रिपाठी, चौखम्बा-कृष्णदास-अकादमी, वाराणसी, तृतीयसंस्करणम्, विक्रमसंवत् २०६१.
१०. परिभाषेन्दुशेखरः मुख्यसम्पादकः, सि.आर्. स्वामीनाथन्, सफरशः डॉ हर्षनाथमिश्रः, लालबाहादूरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठम्,१९७८.
११. पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसंवलितम्) प्रथमः खण्डः भार्गवशास्त्री, चौखम्बा-संस्कृतप्रतिष्ठानम्, दिल्ली, १९८७१.
१२. पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसंवलितम्) द्वितीयः खण्डः शिवदत्तशर्मा, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, पुनर्मुद्रणम्, १९८८१.
१३. पाणिनीयव्याकरणमाभाष्यम् (भाष्यप्रदीपोद्योतसंवलितम्) तृतीयः खण्डः शिवदत्तशर्मा, चौखम्बा-संस्कृतप्रतिष्ठानम्, दिल्ली, पुनर्मुद्रणम्, १९८८१
१४. पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतकौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, पुनर्मुद्रणम्, १९८८
१५. पामिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसंवतम्) पका खण्डः चर्मती चौखम्बासंस्कृत-प्रतिष्ठानम्, दिल्ली, पुनर्मुद्रणम्, १९८८
१६. पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसंवलितम्) षष्ठः खण्डः दधिरामशर्मा, चौखम्बा-संस्कृतप्रतिष्ठानम्, दिल्ली, पुनर्मुद्रवम्, १९८८१
१७. पाणिनीयव्याकरणस्य भाषावैज्ञानिकम् अध्ययनम् दौ. शशिभूषणमिश्रः, वनारस मर्केष्टाइल-कोम्पानी, कोलकाता, प्रथमप्रकाशः, १.८.२०१२.
१८. प्रौढमनोरमा (लघुशब्दरत्न-भैरवी-भावप्रकाश-सरलाटीकाविभूषिता) अव्ययीभावान्तभागः संपादकः, गोपालशारखीनेने, वाराणसी, तृतीय-संस्करणम्, २००3.
१९. भगवत्पतञ्जलिप्रणीतं व्याकरणमहाभाष्यम्, नवाह्निकम्, ज्योत्स्नासमुद्भासितम् टीकाकारः सम्पादक डॉ. रिनारायणतिवारी, चौखम्बाविद्याभवनम्, वाराणसी, २००९.
२०. भाषाविज्ञान एवं भाषाशास्त्र कपिलेदेव द्विवेदी आचार्य, विश्वविद्यालयप्रकाशनम्, वाराणसी, चतुर्थसंस्करणम्, १९८४.
२१. मद्यभाष्यदीपिका - संपादकौ, प्रो. अभ्यंङ्करः के. भि. तथा लिमे भि.पि., भण्डारकर प्राच्यविद्या-अनुसन्धानकेन्द्रम्, पुना, १९७०.
२२. मुखभूषणम्/रूपनिर्णयः, सम्पादकः Dr. K. Kunjunni Raja, The Adyar Library and Research Centre, Madras, 1973.
२३. सुभातः संस्कृतं प्रति ग.बा. पळसुले, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०११.
२४. लघुशब्देन्दुशेखरः (सुबोधिनीव्याख्योपेतः, पञ्यसन्ध्यन्तभागः) आचार्यविश्वनाथमिश्रः, चौखम्बा-संस्कृतप्रतिष्ठवनम्, वाराणसी, प्रथमसंस्करणम्, १९९८.
२५. लघुसिद्धान्तकौमुदी, संपादकौ नारायणदतत्रिपाठी, श्रीरामनारायणदतपाण्डेयशास्त्री, गीताप्रेस, गोरखपुरम्, द्वितीयसंस्करणम्, २०५२ संवत्।
२६. बाक्यपदीयम् (स्वोपज्ञवृत्त्या अम्बाकर्तीव्याख्यया च सहितम्) भागाः १०३० सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, द्वितीयसंस्करणम्, वाराणसी, १९८८: १९८०, १९९१, १९९७, २०००.

 ISBN: 978-81-930770-3-0

२७.वाचस्पत्यम्, तारानाथतर्कवाचस्पतिभट्टाचार्यः, चौखम्बासंस्कृतसीरीजअफिस, वाराणसी, १९९२.
२८. वैयाकरणप्रबन्धमुक्तावली डाँ. अशोकौडशास्त्री, नावपब्लिशर्स, दिल्ली, प्रथमसंस्करणम्, २००५.
२९. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्वबोधिनीटीकाद्वयोपेता), भागाः १-४, संपादकौ, गिरिधरशर्मा, परमेश्वरानन्दशर्मा, मो. व. दासः,दिल्ली, पुनर्मुद्रणम्, २००४, २००६, २००५, २००२.
३०. व्याकरण दर्शनर इतिहास, मुलरसंस्कृतबुक्डिपो, कोलकाता, पुनर्मुद्रणम् जानुयारी २००६.
११. व्याकरण वार्तिक एक समीक्षात्मक अध्ययन, बेदपतिमित्रः, पृथिवीप्रकाशनम्, कराणसी, १९७०.
३२. व्याकरणशाखेतिहासः, लोकमणिदाहलः, भातरीयविद्याप्रकाशनम्, दिल्ली, २००७.
३३. शब्दकल्पद्रुमः (भा.. १०५) राजाराधाकान्तदेवरायपब्लिशर्स, दिल्ली, पुनर्मुद्रणम्, १९८८.
३४. शब्दकौस्तुभ (भा, १-३) संपादकौ प. गोपालशास्त्री नेने, प. मुकुन्दशास्त्रीयुतामकरश्च, चौखम्बा-संस्कृतसीरिजअफिस, वाराणसी, द्वितीयसंस्करणम्, वाराणसी, १९९१.
३५. शब्दशाखेर इतिहास, लेखक: बी.कालीजीवनदेवशर्मा (चक्रवर्ती), प्रकाशक: Ramakrishna Mission Institute of Culture, Gol Park, Kolkata, West Bengal, 700 029.
३६.श्रीमद्भगवत्पतञ्जलिविरचितं व्याकरणमाभाष्यम् (प्रदीपोद्योतराजलक्ष्मीटीकाभिः समलङ्कृतम्), प्रथमो भागः, सम्पादकः श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, पुनर्मुद्रितसंस्करणम्, २००६.
३७. श्रीहरिनामामृतव्याकरणविमर्शः, डॉ. सुनेली देई, प्रतिभाप्रकाशनम्, दिल्ली, प्रथमसंस्करणम्, २०१६.
३८. सुभाषितरत्नभाण्डागारम्, समुद्धारकः काशिनाथपाण्डुर-परब, Eastern Book Linkers, Delhi, 19911.
३९. संस्कृतभाषाशास्त्रम्, डॉ. शशिभूषणमित्रः, वनारसमर्केष्टाइलकोम्पानी, कोलकाता, प्रथमप्रकाशः, २०२२.
४०. संस्कृत वाङ्मय का बृहद् इतिहास, प्रधानसम्पादकः पद्मभूषण-आचार्यबलदेवउपाध्यायः, सम्पादक: प्रो. गोषालदत्तपाण्डेयः, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ, प्रथमसंस्करणम्, २००१.
४१. संस्कृतव्याकरण, डाँ. कपिलदेवद्विवेदी, विश्वविद्यालयप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, १९६७.
४२. संस्कृत व्याकरण ओ भाषा प्रसङ्ग, करुणासिन्धुदासः सदेश, कोलकाता, द्वितीयप्रकाशनम्, २०१२.
४३.संस्कृतव्याकरणशास्त्रेतिहासविमर्श अशोकडी, भारतीयविद्यासंस्थानम्, वाराणसी, प्रथमसंस्करणम्, विक्रमसंवत्, २०५५.
४४. संस्कृत व्याकरणशास्त्र का इतिहास (१-३ भागाः), बहादत्तजी-जिज्ञासु, रामलालकपुरदृष्ट, सोनिषत्, हरियाणा, संवत्, २०५१, २०३०, २०३०.
४५. A Dictionary of Sanskrit Grammar, K. V. Abhyankar, Oriental Institute Baroda, 1961.
46. Dictionary of Panini, S. M. Katre, D. C. P. R.L, Pune, 1968.

 ISBN: 978-81-930770-3-0

४७. How Many Grammars ? V. Raghavan, Charudev Shastri Felicitation Volume, Editors Dr. Suniti Kumar Chatterji & c., 1st Edition, January, 1974.

48. India as Known to Panini, VS. Agrawala, University of Lucknow, 1953.

49. India in the Time of Patanjali, Dr. H. N. Puri, Bharatiya Vidya Bhavan, Bombay, 1957. P11.

50. Patañjali's Vyakarana-Mahābhāsya (Vol. 1-3) F. Keilhon, Bombay Government Central Book Depot. 1880, 1983, 1984.

५१. Pänini as a Variationist, Paul Kiparsky, C.A.S.S, University of Poona, 1980.

५२. Systems of Sanskrit Grammar, S. K. Belvalkar, Published by the Author, Poona, First Edition, 1915.

५३. Technical Terms and Technique of Sanskrit Grammar, K. C. Chatterji, Sanskrit Book Depot., Kolkata

५४. The Astadhyayi of Panini, (Vol-1&2), S. C. Vasu, Low Price Publication, 1990.

५५. The Nighantu & Nirukta, Laxman Sarup, MLBD, Reprint, 1984.

५६. The Siddhantakaumudi of Bhattoji Diksita, S.C. Vasu, Vol. 1 & 2, MLBD, Reprint, 2003.

५७. Various Traditions in Sanskrit Grammar, Dr. Sashibhusan Mishra, Sanskrit Book Depot., Kolkata, 1". Print -2024

❀❀❀

# शैक्षणिकसंस्थानामान्तरिकगुणवत्ताऽभिवृद्धये भारतीयज्ञानप्रणाल्याः उपादेयता

**डॉ. चिरञ्जीवी अधिकारी***

## भारतीयज्ञानप्रणाली

भारतीयज्ञानप्रणालीति शब्दश्रवणेन केयं प्रणालीति जिज्ञासा समुदेति जनमानसे। प्राचीन-भारतीयैः महर्षिभिः ज्ञान-विज्ञान-जीवनदर्शनादिषु विषयेषु प्रतिपादिता ज्ञानधारा एव भारतीय-ज्ञानप्रणाली इति विद्वद्भिः स्वीकृता। अस्यां प्रणाल्यां विभिन्नानां प्राचीनानां महर्षीणां ज्ञान-विज्ञान-संस्कृति-भक्ति-कर्मेत्यादिसम्बद्धा भावना निहिता दरीदृश्यते। भारतीयज्ञानप्रणाल्यां वेदस्य स्थानं सर्वोपरि समागच्छत्येव। वेद एव भारतीयसमाजस्य संस्कृतेः ज्ञानस्य सभ्यतायाश्च मूलमिति। वेदेभ्य एव तकनीकि-विज्ञान-चिकित्सा-प्रबन्धन-न्यायप्रणाल्यादिविषयसम्बद्धानि ज्ञानानि भारतीयसमाजे समागतानि सन्ति।

अस्माकं प्राचीना ज्ञानप्रणाली सर्वोत्कृष्टेति नास्ति तत्र कश्चित्संशयलेशः। पुराकाले या शिक्षाव्यवस्था आसीत्, सा लुप्तप्राया वर्तमानसमये। अत एव भारतसर्वकारेण 2020 ईशवीये वत्सरे नूतनशिक्षानीतौ प्राचीनज्ञानप्रणाल्याः सम्वर्द्धनार्थं भारतीयज्ञानपरम्परा (Indian Knowledge System) इति नाम्ना विशिष्टं स्थानं दत्तम्। वस्तुतोऽस्माकं सर्वा संस्कृतशिक्षा भारतीयज्ञानपरम्परायाः संवाहकाः वर्तन्ते। भारतीयज्ञानप्रणाल्यां वेदोपनिषत्पुराणधर्मशास्त्रादिषु प्रतिपादितानां ज्ञानानां परम्परा स्वीकृता वर्तते। अर्थात् वेदादिषु समुल्लिखितानां तत्त्वानां ज्ञानमेव भारतीयज्ञानप्रणाल्या उद्देश्यमिति। आधुनिके विज्ञानयुगे विद्यमानानां चिकित्साप्रबन्धनाभियान्त्रि-क्यादिज्ञानानां बीजं प्राचीनज्ञानप्रणाली एव। वर्तमानसमये महदुपयोगभूतं संगणकविज्ञानमपि व्याकरणशास्त्रानुमतमेव चलति। अतोऽस्माकं प्राचीनज्ञानपरम्पराधीना एव प्रायः सर्वे आधुनिक्यः विद्याः वर्तन्ते। भारतीयज्ञानपरम्परायाः चर्चा यत्र विधीयते, तत्र वेदस्य चर्चा समागच्छत्येव। अतः को नाम वेदः ? इति जिज्ञासायां किञ्चिद्वक्तुमिहे।

सकले विश्वसाहित्ये वेदस्य स्थानमन्यतमम् **'वेदोऽखिलो धर्ममूलम्'**[1] इति वचनप्रामाण्यात्। सत्ताज्ञानविचारणलाभार्थेषु विद्यमानाद् विद्धातोर्घञि कृते 'वेदः' इति शब्दो निष्पद्यते। अनेके विद्धातवः, विद्धातोरर्थनिरूपणावसरे सिद्धान्तकौमुद्यां वचनमिदं प्राप्यते–

**सत्तायां विन्दते ज्ञाने वेत्ति विन्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्॥**[2] इति।

सत्तादिषु चतुर्थेष्वर्थेषु वेदशब्दस्य विग्रहो यथा- सत्तार्थे- विद्यते ज्ञानराशिः यस्मिन् स वेदः, ज्ञानार्थे- विदन्त्यनेन धर्ममिति वेदः, विचारणार्थे- विन्ते कर्तव्याकर्तव्यादिकं परमात्मानं वा योऽसौ वेदः, लाभार्थे- विन्दन्ति ज्ञानं येन यस्माद्वेति वेदः। सायणाचार्येणोक्तं यथा- **'अपौरुषेयवाक्यं वेदः**[3], **'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकं साधनो यो वेदयति स वेदः**[4] इति। वेदभाष्य-भूमिकायां वेदस्य प्रामाण्यविषये वचनमिदं दरीदृश्यते, यथा –

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**

*सहायकाचार्यः, संस्कृतव्याकरणविभागः,
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमः

 ISBN: 978-81-930770-3-0

**एवं विन्दति वेदेन तस्माद्वेदस्य वेदता ।।**[5] इति ।

वेदस्य संहिताब्राह्मणारण्यकोपनिषदित्येते चत्वारो भागाः विद्यन्ते । पाश्चात्यविदुषां मतानुसारेण वेदो नाम केवलं ग्रन्थः । वस्तुत एतन्मतं तिरस्करणीयं तथापि बहुशम् एतदेव मतमङ्गीक्रियते । यत्सत्यं भारतमातुः प्राणरूपाः वेदाः, अस्माकं सर्वेषां श्रुतिर्जननी वर्तते । यदि परकीयानां वेदविषये परकीयत्वभावना भवति, भवतु सा । परकीया एव ते सर्वथा । परन्तु भारतीयानामपि यदि वेदविषये परकीयत्वभावना भवति, तर्हि वेदसंरक्षणे तदध्ययने यादृशी श्रद्धा भवितुमर्हति तादृशी नैव स्यात् । श्रुतिशब्दवाच्याः शब्दराशयो लोकसंग्रहार्थमेव यदा ग्रथिताः, कालान्तरे लिपिनिविष्टा तदनन्तरं मुद्रिताः पुस्तकरूपतामाप्नुवन् । वेदस्य नित्यत्वं, विज्ञानोत्पत्ति-हेतुत्वं, निरपेक्षप्रामाण्यं, देवतास्वरूपत्वञ्च वरीवर्तते । देवतास्वरूपत्वे वेदस्य साक्षाद्देवता-धिवासरूपत्वं स्वयमेव श्रुत्या समाम्नातम् । उक्तञ्च यथा –

**प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।**
**यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओंकांसि चक्रिके ।।**[6] इति ।

वेदरूपस्य पुरुषस्य षडङ्गानि सन्ति –

**शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।**
**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ।।** इति ।

अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानीति व्युत्पत्त्या येन माध्यमेन यस्य कस्यापि वस्तुनो ज्ञानं जायते, तदेव अङ्गमिति नाम्ना व्यवह्रियते । तस्माद् वेदप्रतिपादकवस्तूनि वेदाङ्गानीति । महाभाष्यकारेण वेदाङ्गानाम् अध्ययनमावश्यकमिति समुद्घोषितं यथा –

**'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'**[7] इति ।

**आन्तरिकगुणवत्ताश्वासनकोषः (IQAC)–** शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्तायाः वृद्धये मानकस्थापने च कस्य दायित्वमिति प्रश्नः समागच्छति । तत्रादौ आन्तरिकगुणवत्ताश्वासनकोषस्य भूमिका उपस्थाप्यते । शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्तायाः विकासार्थं विश्वविद्यालयानु-दानायोगः (University Grants Commission) इति संस्थया विश्वविद्यालयमहाविद्यालयादि-शैक्षणिकसंस्थासु आन्तरिकगुणवत्ताश्वासनकोषः (Internal Quality Assurance Cell) इति नाम्ना एकः कोषः परिकल्पितो वर्तते । अयमेव कोषः शैक्षणिकसंस्थायाः आन्तरिकमूल्याङ्कनं विधाय अध्ययनाध्यापनादिषु गतिविधिषु गुणवत्तावृद्धये कार्यं करोति । शैक्षणिकसंस्थानादिषु कोषोऽयं मुख्यः, यतोहि विश्वविद्यालयस्य सर्वविधोन्नतये गुणवत्तासंरक्षणे च सर्वदा तृतीयनेत्र-रूपेण चपलशीलो यत्नशीलश्च भवति। आन्तरिकगुणवत्ताश्वासनकोषस्य कार्यक्षेत्रं किमिति विषये विश्वविद्यालयानुदानायोगेन केचन बिन्दवः परिगणिताः वर्तन्ते । विश्वविद्यालयानुदानायोगस्यैव मार्गदर्शनानुसारं शैक्षणिकसंस्थानां गुणवत्ताविकासार्थम् आन्तरिकगुणवत्ताऽऽश्वासनकेन्द्रस्य महत्त्वपूर्णं स्थानं भवति ।

**गुणवत्ताभिवृद्धये भारतीयज्ञानप्रणाल्या उपादेयता-** भारतीयज्ञानप्रणाली शैक्षणिकसंस्थानां मानकविकासार्थं महत्त्वपूर्णं स्थानं धरते । यतोहि भारतीयज्ञानप्रणालीमाध्यमेन ब्रह्माण्डज्ञानम्-

पर्यावरणज्ञानम्-जीवनदर्शनम्-कला-संस्कृतिः-सौन्दर्यबोध इत्यादीनां ज्ञानं च कर्तुं शक्यते । उच्चशैक्षणिकसंस्थानेषु भारतीयज्ञानप्रणाल्यनुमतानि कतिपयानि कारकाणि गुणवत्ताभिवृद्धये उपकारकभूतानि भवितुं शक्नुवन्ति । प्रसङ्गेऽस्मिन् केचन बिन्दवः उपस्थाप्यन्ते मया –

**पाठ्यक्रमः** – विश्वविद्यालयस्य महाविद्यालस्य वा पाठ्यक्रमाः गुणवत्तामानकनिर्धारणे प्रमुखाः दरीदृश्यन्ते । राष्ट्रीयमूल्यांकनप्रत्यायनपरिषद् (NAAC) इत्यनेन स्वाध्ययनप्रतिवेदननिदर्शिका (SSR) इत्यत्र भारतीयज्ञानप्रणालीसम्बद्धस्य पाठ्यक्रमस्य सन्दर्भे प्रश्नाः **प्रथमे निकषे** स्थापिताः वर्तन्ते ।

शैक्षणिकसंस्थानेषु पाठ्यक्रमाः भारतीयज्ञानप्रणालीमाधारीकृत्य भवेयुः[8] । पाठ्यक्रमे वेदोपनिषदारण्यकब्राह्मणादीनां वैदिकसाहित्यानां समावेशः स्यात् । वैदिकसाहित्यम् अस्माकं प्राचीनज्ञानपरम्परायाः मूलम् । आधुनिकज्ञानविज्ञानपरम्परा सर्वा वेदाधीनैव प्रचलिताः वर्तन्ते । वेदाङ्गानामपि समावेशः समुचितरूपेण पाठ्यक्रमे करणीयः । वेदाङ्गेषु व्याकरणं मुख्यमस्ति, मुखस्वरूपत्वात् । व्याकरणं विना भाषाज्ञानं कर्तुं न शक्यते, शब्दव्युत्पादनमपि न । अतः पाठ्क्रमे व्याकरणस्य स्थानं महत्त्वपूर्णं भवति । व्याकरणादतिरिक्तं छन्दोनिरुक्तशिक्षाकल्पज्योतिष-पुराणस्मृतिधर्मशास्त्रायुर्वेदादीनामपि स्थानं पाठ्यक्रमे स्थापनीयम् । सांख्ययोगन्यायवैशेषिक-मीमांसावेदान्ताद्यास्तिकदर्शनानां बौद्धजैनचार्वाकादिनास्तिकदर्शनानाञ्च समावेशः पाठ्यकर्मे अनिवार्यरूपेण भवति चेत् छात्राः जीवनदर्शनस्य ज्ञानं समुचितरूपेण करिष्यन्ति। वर्तमाने योगशास्त्रस्य महिमा आधुनिकैरपि अङ्गीकृता वर्तते। अन्तःशास्त्रीयपाठ्यक्रमस्यापि चर्चा वर्तते।[9] शैक्षणिकसंस्थानेषु रामायण-भगवद्गीता-प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापरका पाठ्यक्रमाः गुणवत्तामानकं निर्धारयन्ति ।[10]

व्यावसायिकाः पाठ्यक्रमाः संस्थानां गुणवत्ताः परिमार्जयन्ति अवश्यमेव । अतः कर्मकाण्डप्रशिक्षणं ज्योतिषप्रशिक्षणं वास्तुप्रशिक्षणं योगप्रशिक्षणं चेत्यादिपाठ्क्रमाः विशेषरूपेण परिगणिताः वर्तन्ते ।[11]

आधुनिकज्ञानप्रणाल्या सह संस्कृतज्ञानपरम्परायाः समायोजनमपि शैक्षणिकसंस्थानाना-मभिवृद्धये साहाय्यं भवितुमर्हति ।[12] स्वाध्ययनप्रतिवेदननिदर्शिका (SSR) इत्यत्र संस्कृतसाहित्ये प्राचीनशास्त्रपरम्परायाः समावेशो न वेति प्रश्नो वर्तते। अतः पाठ्यक्रमे प्राचीनशास्त्राणां समावेशः गुणवत्तावृद्धये उपयुक्तो मार्गो दृश्यते ।[13]

पाठ्यक्रमो भारतीयज्ञानप्रणालीमूलको विकल्पाश्रितश्रेयोऽङ्कप्रणाल्याः पूरितो भवेत् ।[14] अनेन छात्राणां कृते विविधानां शास्त्राणामध्ययने अवसरः लभ्यते । किञ्च छात्राः विविधप्राचीनशास्त्रज्ञानवन्तो भविष्यन्ति । शैक्षणिकसंस्थानां पाठ्यक्रमः स्वयमेव तत्तत्स्थानानां गुणवत्तायाः वृद्धिं नयति ।

**भारतीयज्ञानप्रणाल्याधारिताध्ययनाध्यापनम्**– राष्ट्रीयमूल्यांकनप्रत्यायनपरिषद् (NAAC) इत्यनेन स्वाध्ययनप्रतिवेदननिदर्शिका (SSR) इत्यत्र भारतीयज्ञानप्रणालीसम्बद्धे अध्ययना-ध्यापनसन्दर्भे प्रश्नाः **द्वितीये निकषे** स्थापिताः वर्तन्ते । भारते प्राचीनसमये गुरुकुलव्यवस्थाः

 ISBN: 978-81-930770-3-0

आसन्। तत्रैव छात्राः ऊषित्वा पठन्ति स्म। तत्र आचार्याः भारतीयज्ञानप्रणाल्यनुसारिणी पङ्क्तिशः शास्त्राणामध्यापनं कारयन्ति स्म । गुरुकुलपद्धत्या शैक्षणिकसंस्थानेषु अध्यापनमपि आन्तरिकगुणवत्ताभिवृद्धये सहाय्यभूतं साधनमिति वक्तुं शक्यते ।[15] अस्मिन् प्रसङ्गे साक्षात्पर-म्परागतप्राच्याधिगमगप्रणाल्याः समुल्लेखो मानकनिर्धारणे वरीवर्तते । न केवलं छात्राणा-मध्ययनम्, अपितु अध्यापकानामपि । विश्वविद्यालयीयानां महाविद्यालयीयानां वा छात्राणां गुरुकुलं प्रति नयनमपि गुणवत्तासमुन्नतिम् अर्जयति ।[18] भारतीयज्ञानपरम्पराधारितानां वेदवेदा-ङ्गादिप्राचीनदुरुहग्रन्थानामध्ययनेन अध्यापकेभ्यः ज्ञानसमृद्धकरणार्थं विश्रुतवरिष्ठाचार्याणां पारम्परिकगुरुणां वा सविधे विश्वविद्यालयो महाविद्यालयो वा स्वाध्यापकान् प्रेषयितुं शक्नोति।[19] गुणवत्तावृद्धये अधिकाधिकरूपेण अध्यापकानां पारम्परिकशास्त्राध्ययनाय गुरोः सविधे प्रेषणरूप उपक्रमोऽयमपि सहायको भवितुमर्हति।

**पारम्परिकानाम् अध्यापकानां नियुक्तिः**– शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्ताविकासाय अध्यापकानां नियुक्तिरपि अवधेयांशरूपेण परिगण्यते। विविधानां पारम्परिकशास्त्राधिगमवतां योगविज्ञान-पाण्डुलिपिविज्ञान-भैषज्य-ज्योतिषवास्तुविज्ञान-देवालयसंस्कृतिज्ञानवतां च अध्यापकानां संख्यापि संस्थायाः कृते गौरवास्पदं भवति ।[20]

केन्द्रीयसंस्कृतविश्वविद्यालयस्य शास्त्रचूडामणिः इति योजनापि विश्वविद्यालयेषु महाविद्यालयेषु च प्रायः पारम्परिकशास्त्राणामध्यापनार्थं वर्तते। अस्यां योजनायां विशिष्टविदुषां नियोजनमथ च राष्ट्रीयस्तरीयाचार्याणाम् अतिथि-अध्यापकत्वेन नियोजनं लाभाय दरीदृश्यते ।[21]

**भारतीयज्ञानप्रणाल्यनुमता स्वीकृता परियोजना**– केन्द्रीयसंस्कृतविश्वविद्यालयस्य पारम्परि-कशास्त्राणां सम्वर्धने अष्टादशी इत्यादयः विभिन्नाः प्रकल्पाः सन्ति। तथैव विश्वविद्यालयानु-दानायोगभारतीयदार्शनिकानुसन्धानपरिषद् (ICPR)- भारतीयसामाजिकविज्ञानानुसन्धानपरिषद्-संस्कृताकादमीत्यादिभिः संस्थाभिरपि शास्त्राणां संरक्षणपरकस्य शोधकार्यस्य कृते अनुदानं प्रदीयते । शैक्षणिकसंस्थासु एतादृशानां शोधकार्याणां सम्पादनेन आन्तरिकगुणवत्ता नूनमेव एधिष्यते ।[22]

**अध्यापकानां सम्माननम्**– अध्यापकेभ्यः पारम्परिकग्रन्थानां सम्पादनम्, टीकालेखनम्, शास्त्रीयनिबन्धलेखनम्, शास्त्रीयग्रन्थानां भारतीयभाषासु अनुवादः इत्यादिकार्येषु प्रोत्साहनम् अथ च तेषां कृतकार्यस्य मूल्याङ्कनेन विभिन्नाः संस्थाः सम्मानं कुर्वन्ति । यतोहि सम्प्रति भारतीयज्ञानप्रणाल्याः संरक्षणार्थम् अनेकानि शोधसंस्थानानि कटिबद्धानि सन्ति। अध्यापकानां शैक्षणिकविकासोऽपि संस्थायाः कृते महान् लाभो भवति ।[23]

**पारम्परिकशास्त्राणां प्रशिक्षणपीठस्थापनम्-** शैक्षणिकसंस्थानेषु पारम्परिकशास्त्राणां प्रशिक्षणार्थं प्रशिक्षणपीठस्थापनमपि मानकवर्धनं भविष्यति। अनेन पीठेन कर्मकाण्डप्रशिक्षणम्, वास्तुप्रशिक्षणम्, सस्वरवेदपाठप्रशिक्षणम्, ज्योतिषप्रशिक्षणम्, योगप्रशिक्षणमित्यादीनि प्रशिक्षणानि छात्रेभ्यः प्रदाय भारतीयज्ञानप्रणाल्याः विकासो भवितुमर्हति, सहैव संस्थानस्यापि गुणवत्ता वृद्धिर्जायते ।[24]

**पारम्परिकशास्त्राणां संरक्षणार्थं स्पर्धायाः आयोजनम्**– शैक्षणिकसंस्थानेषु पारम्परिकशास्त्राणां संरक्षणार्थं वाक्यार्थसभा, शलाकापरीक्षा, शास्त्रीयस्पर्धाः, शास्त्रार्थपरीक्षा, अन्त्याक्षरी इत्यादिषु राष्ट्रियस्तरीया राज्यस्तरीया क्षेत्रस्तरीया विश्वविद्यालयस्तरीया महाविद्यालयस्तरीया वा प्रतियोगितायाः आयोजनं शैक्षणिकगुणवत्ताभिवृद्ध्ये श्रेयस्करं दृश्यते।[25]

**प्रकाशनम्-** शैक्षणिकसंस्थायाः अभिवृद्ध्ये प्रकाशनमपि विशिष्टस्थानं भजते। शैक्षणिकसंस्थासु प्रकाशनविभागः प्रायः भवत्येव। ततः भारतीयज्ञानप्रणालीसम्बद्धानि शोधपत्राणि पुस्तकानि च प्रकाशयितुं शक्यते। एतदतिरिक्तं विभागशोऽपि शोधपत्रिकाणां भित्तिपत्रिकाणां प्रकाशनं भवत्येव। शैक्षणिकसंस्थायाः अध्यापकानां पारम्परिकशास्त्रसम्बद्धानि शोधपत्राणि, पुस्तकानि, सम्पादितपुस्तकानि, पारम्परिकशास्त्राणां संस्कृतेतरभाषासु अनुवादमूलकानि प्रकाशनानि, एतानि सर्वाणि शैक्षणिकसमुन्नतये सहायकानि भवन्ति।[26] भारतीयज्ञानपरम्परासंवलितानां ग्रन्थानाम् अन्यैः शैक्षणिकसंस्थाभिः सह संयुक्तप्रकाशनमपि गुणवत्ताभिवृद्ध्ये सहायकं भवति।[27] समुचितधनाभावे अन्तर्जालीयं प्रकाशनमपि सरलतया कर्तुं शक्यते।[28]

**विस्तारकगतिविधयः-** शैक्षणिकसंस्थानानां गुणवत्ताभिवृद्ध्ये प्राचीनशास्त्रसम्बद्धाः विस्तारकगतिविधयोऽपि सहभागिनो भवन्ति। भारतीयज्ञानपरम्परासम्भूतानां श्रीमद्भगवद्गीता-उपनिषत्दर्शनशास्त्राणां शैक्षणिकपरिसराद्बहिः सान्ध्यकालीनकक्षामाध्यमेन समाजे प्रसारणम्, संस्थाद्वारा यज्ञानुष्ठानयोगशिबिरादीनाम् आयोजनञ्चापि गुणमानकं वर्धयति।[29]

**भौतिकसंसाधनानि-** शैक्षणिकसंस्थानेषु पाण्डुलिपिसंरक्षणकेन्द्रम्, पाण्डुलिपिसंसाधनकेन्द्रम् योगप्रशिक्षणकेन्द्रम्, वेधशाला, यज्ञशाला, आध्यात्मिकविकासकेन्द्रम्, इत्यादिकेन्द्राणां संस्थापनमपि संस्थानानां समुन्नतिकारकं भवति।[30] एतानि केन्द्राणि भारतीयज्ञानपरम्पराधारितानि विद्यन्ते।

**संगोष्ठ्या आयोजनम्-** शैक्षणिकसंस्थानेषु अधिकरूपेण भारतीयज्ञानपरम्परामनुसृत्य संगोष्ठीनां व्याख्यानकार्यक्रमाणां कार्यशालानाञ्च आयोजनं गुणवत्ताभिवृद्ध्ये सहाय्यं दरीदृश्यते।[31] वर्तमाने भारतीयज्ञानप्रणालीमाधारीकृत्य व्याख्यानानि सम्मेलनानि च यत्र तत्र आयोज्यन्ते। स्वशैक्षणिकसंस्थायाम् अन्यशैक्षणिकसंस्थायां वा भवतु, कुत्रापि छात्राणाम् अध्यापकानाञ्च भागग्रहणं संस्थायाः कृते लाभप्रदो भवति। गुणवत्ताभिवृद्ध्ये प्रतिभागिनां छात्राणां संख्यापि गणनीया भवति।[32]

**अन्तर्जालीयपाठ्यसामग्रीनिर्माणम्-** आधुनिके संगणकयुगे अन्तर्जालस्य स्थानं विशिष्टं वर्तते। यतोहि आवश्यकभूताया अध्ययनसामग्र्याः अन्वेषणम् अन्तर्जाले छात्राः प्रतिदिनं कुर्वन्ति। यदि अन्तर्जाले भारतीयज्ञानप्रणालीसम्बद्धाः पाठ्यसामग्र्यः उपलभ्यन्ते चेत् छात्राः लाभान्विताः भवन्ति। अध्यापकाः शैक्षणिकसंस्थानस्य जालपुटके स्वस्य वैयक्तिकजालपुटके वा पाठ्यक्रमान्तर्गतानां शास्त्रीयपाठ्यविषयवस्तूनां निर्माणं विधाय संस्थापनमपि संस्थानानां गुणमानकं वर्धयति।[33]

 ISBN: 978-81-930770-3-0

**शोधकार्यम्-** अभियान्त्रिकी-चिकित्साविज्ञान-प्रबन्धन-न्यायशास्त्रादीनां बीजं प्राचीनज्ञानपरम्परा वर्तते। वेदोपनिषत्पुराणधर्मशास्त्रादीनि शास्त्राणि ज्ञानमूलकानि वर्तन्ते। अतः एतादृक्षु शास्त्रेषु विद्यमानानां ज्ञानानाम् आधुनिकशास्त्रेषु अन्वेषणमपि संस्थानानामभिवृद्धपरकं भवति।[34] वर्तमाने भारतसर्वकारस्य भारतीयदार्शनिकानुसन्धानपरिषत्, भारतीयसामाजिकविज्ञानानुसन्धान-परिषत्, संस्कृताकादमी, विश्वविद्यालयानुदानायोगः, केन्द्रीयसंस्कृतविश्वविद्यालयः प्रभृतयः विभिन्नाः संस्थाः भारतीयज्ञानप्रणाल्याः सन्दर्भे गवेषणाय धनसाहाय्यं कुर्वन्ति । अध्यापकाः प्राचीनशास्त्राणाम् अधुनिकैः शास्त्रैः सह शोधनिमित्तं परियोजनां स्वीकर्तुं शक्नुवन्ति । शैक्षणिकसंस्थानां समुन्नतये शोधकार्यमपि प्राथम्येन गण्यन्ते । अतः गुणवत्ताभिवृद्धये भारतीयज्ञानप्रणाल्यनुमतानि शोधकार्याणि सहायकानि दृश्यन्ते।

**छात्राणां प्रोद्बलनम्–** केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रतिवर्षं संस्कृतशास्त्राध्येतृभ्यः छात्रेभ्यः छात्रवृत्तिः प्रदीयते। न केवलं संस्कृताध्येतृभ्यः छात्रेभ्योऽपितु प्राचीनज्ञानपरम्परायां शोधकर्तृभ्यः शोधच्छात्रेभ्योऽपि शोधच्छात्रवृत्तिः प्रदीयते। भारतीयदार्शनिकानुसन्धानपरिषदपि दर्शनविषये शोधकार्याय छात्रवृत्तिः ददाति। दर्शनशास्त्रमपि प्राचीनज्ञानप्रणाल्याः अङ्गीभूतमस्ति। छात्राः प्राचीनज्ञानपरम्परायाः माध्यमेन उद्योगप्राप्तये सौविध्यं प्राप्नुवन्ति। संस्थानानां स्नातकच्छात्राः उद्योगे संलग्नाः भवन्ति चेत् संस्थानानां कृते लाभदायको भवति।[35]

**पुस्तकालयः–** शैक्षणिकसंस्थानानां गुणवत्ताभिवृद्धये पुस्तकालयस्य महती भूमिका भवति। पुस्तकालये प्राचीनपाण्डुलिपीनां दुर्लभपुस्तकानां प्राचीनसंस्कृतपत्रिकानां वेदोपनिषत्पुराण-स्मृतिधर्मशास्त्रादिग्रन्थानां संकलनं गुणवत्तावृद्धये सहायकमिति । एतादृशानां पुस्तकानां संख्यानुगुणं शैक्षणिकसंस्थानां मानकवृद्धिर्जायते। पुस्तकालये प्राचीनानाम् अप्राप्यपुस्तकानाम् अध्ययनार्थं प्रतिदिनं छात्राः अध्यापकाश्च गच्छन्ति। अध्यापकानां छात्रात्राञ्च पुस्तकालयस्य प्रयोगोऽपि संस्थानानां मानकनिर्धारणे सहायको भवति।[36]

**भारतीयज्ञानप्रणाल्यनुगुणा सर्वोत्कृष्टा परिपाटी–** शैक्षणिकसंस्थानानांभारतीयज्ञानप्रणाल्य-नुसारं सर्वोत्कृष्टपरिपाटी (Best Practice) परिकल्पिता भवन्ति चेद् अवश्यमेव संस्थानानां प्रगतिः भवति । वेदोपनिषद्गीतानीति-धर्मशास्त्रेत्यादिसम्बद्धानि समाजोपयोगसुभाषितवचनानि प्रतिदिनं संस्थानानाम् आमुखपटले स्थापनं सर्वोत्कृष्टपरिपाटी भवितुमर्हति।

**उपसंहारः–** निष्कर्षतः वक्तुं शक्यते यत् शैक्षणिकसंस्थानानाम् आन्तरिकगुणवत्ताया अभिवृद्धये भारतीयज्ञानप्रणाल्याः उपादेयता दरीदृश्यते। राष्ट्रियमूल्यांकनप्रत्यायनपरिषदा उच्चशैक्षणिक-संस्थानानां गुणवत्तानिर्धारणे सप्तप्रकारकाः निकषाः परिकल्पिताः सन्ति । तानि यथा– **पाठ्यचर्या, शिक्षणाधिगमः मूल्याङ्कनञ्च, अनुसन्धानं नवाचारः विस्तारश्च, मूलभूतसौविध्यानि अधिगमस्रोतांसि च, छात्राणां प्रोद्बलनं प्रगतिश्च, प्रशासनं नेतृत्वं प्रबन्धनञ्च, सांस्थिकमूल्यानि अत्युत्तमाः परिपाटयश्च।**

शैक्षणिकसंस्थानानां पाठ्यक्रमा भारतीयज्ञानप्रणालीसम्बद्धा भवितुमर्हति । येन ज्ञानविज्ञानजीवनदर्शनानामवबोधने सक्षमाः भवन्ति छात्राः । सप्तसु निकषेषु प्रायः

 ISBN: 978-81-930770-3-0

भारतीयज्ञानपरम्परायाः चर्चा विद्यन्ते । अतः भारतीयज्ञानप्रणाल्यनुगुणं शैक्षणिकसंस्थानेषु विविधाः कार्यक्रमाः स्पर्धाः गतिविधयश्च स्वीकरणीयाः । संस्कृतशैक्षणिकसंस्थानानां तु महत्सौभाग्यं यत् संस्कृतस्य पाठ्यक्रमाः प्रायेण 90 प्रतिशतं भारतीयज्ञानप्रणालीमिश्रिता वर्तन्ते। संस्कृतस्य पाठ्यक्रमे भारतीयज्ञानपरम्परायाः स्तम्भरूपेणावस्थितस्य वेदस्य वेदाङ्गानां च स्थानं भवत्येव। आन्तरिकगुणवत्तामूल्याङ्कने यदा यदा भारतीयज्ञानपरम्पराया चर्चा समागच्छति, तदा तदा प्राचीनशास्त्राणि स्वत आयान्ति एव । पुनश्च पाठ्यक्रमाः सामाजिक-स्थानीय-क्षेत्रीय-राज्यस्तरीय-राष्ट्रस्तरीय-विश्वस्तरीयसम्बद्धविषयभूताः भवेयु इति मूल्याङ्कने परिगणिता वर्तन्ते। अतः पाठ्यक्रमनिर्माणे विशेषतया एतादृशानां विषयाणां समायोजनं करणीयमेवेति दिक् ।

**पादटिप्पण्यः**

1. मनुस्मृतिः, 2.6.
2. सिद्धान्तकौमुदी, चुरादिगणः
3. सायणाचार्यः
4. सायणाचार्यः
5. ऋग्वेदभाष्यभूमिका
6. ऋग्वेदः, प्र.म.सूक्तम्, 40.5.
7. महाभाष्यम्, पस्पशाह्निकम्
8. 1.1.4 इति संख्यामानम्
9. 1.1.3. इति संख्यामानम्
10. 7.1.7. इति संख्यामानम्
11. 1.2.4 इति संख्यामानम्
12. 1.1.7. इति संख्यामानम्
13. 1.3.1. इति संख्यामानम्
14. 1.2.2. इति संख्यामानम्
15. 2.3.4. इति संख्यामानम्
16. 2.2.1. इति संख्यामानम्
17. 2.4.5. एवं 2.4.8 इति संख्यामानम्
18. 2.4.6. इति संख्यामानम्
19. 2.4.7. इति संख्यामानम्
20. 3.2.2. इति संख्यामानम्
21. 3.4.2. इति संख्यामानम्
22. 2.2.1. इति संख्यामानम्
23. 2.6.4. इति संख्यामानम्
24. 3.4.5, 3.4.6, 3.4.9 इति संख्यामानम्
25. 3.7.3. इति संख्यामानम्

 ISBN: 978-81-930770-3-0

26. 3.6.6. इति संख्यामानम्
27. 3.5.3. इति संख्यामानम्
28. 3.1.5. एवं 4.1.2. इति संख्यामानम्
29. 4.1.24. इति संख्यामानम्
30. 6.3.2. इति संख्यामानम्
31. 4.2.6. इति संख्यामानम्
32. 4.2.7. इति संख्यामानम्
33. 5.1.1., 5.1.7 इति संख्यामानम्
34. 4.2.1., 4.2.2., 4.2.3. 4.2.5 इति संख्यामानम्

❁❁❁

 ISBN: 978-81-930770-3-0

# शैक्षणिकसंस्थानामान्तरिकगुणवत्ताऽभिवृद्धये काव्यानामुपादेयता

**डॉ. बसन्तकुमारमुद्रा***

**सारांशः** – समग्रभारतवर्षे विद्यमानाः सुप्रतिष्ठिताः याश्च शैक्षणिकसंस्थाः वोभूयन्ते ताः सर्वाऽपि संस्थाः सर्वथा नवभारतस्य निर्माणे प्रयत्नशिलाः दरिदृश्यन्ते। नवभारतस्य निर्माणं केवलं नाम्ना एव न भवति अपितु समग्रशिक्षणसंस्थायाः कुलाधिपतयः, कुलगुरवः, कुलसचिवाः, सङ्कायाध्यक्ष्याः, विभागाध्यक्ष्याः, प्राचार्याः, आचार्याः, उपाचार्याः, सहायकाचार्याः तथा च कार्यालयीयाधिकारिणो सम्भूय स्वस्वश्रमदानेन अक्लान्तपरिश्रमेण च शिक्षासंस्थाया उन्नतिपुरस्सरं नवभारतस्य निर्माणे अग्रेसराः पथप्रदर्शकाश्च भवन्ति । यतोहि शिक्षणसंस्थाः नवभारतस्य निर्माणे बीजभूताः भवन्ति। किमर्थमित्युक्ते नवभारतस्यनिर्माणं तदा भवितुमर्हति यदा यूवानः योग्याः, ज्ञानिनः, दूरदृष्टयः, परोपकारिणः, शक्तिमन्तः, हितैषिणः, साधुचिन्तकाः, जागरुकाः, निर्भिकाः, समयानुवर्त्तितारः, कर्मठाः, समर्थाश्च भविष्यन्ति। अत एवम्भूतान् समग्रान् गुणान् यूनां कृते दातुं समर्थाऽस्ति काचिद् शिक्षासंस्था । तर्हि शिक्षासंस्था यूनां कृते कदा एवम्भूतान् गुणान् दातुं समर्था भविष्यतीति जिज्ञासा समागच्छति चेद् उत्तरं भवति यदा शिक्षासंस्थायाः आन्तरिकगुणवत्तायाः विकासः भविष्यति तदेति । यद्यप्यधुना UGC तः आन्तरिकगुणवत्ताऽभिवृद्धये बहवः नियमाः समागताः तथापि काव्यानां कीदृशं योगदानं वर्तत इत्यधुना विचार्यते मया।

**उपोद्घातः-** **कवीनां घटनान्येव चराचरविलक्षणा।**
**अकर्तुमन्यथाकर्तुं कर्तुं वा क्षमते जगत्॥**[1]

इत्युक्तरीत्या यथा भगवान् परमेश्वरः कर्तुमकर्तुमन्यथाकर्तुं प्रभवति तथा महाकविरपि प्रभवतीति सूचयत्ययं श्लोकः । किमर्थमित्युक्ते कवयः क्रान्तदर्शिनः, भगवत्याः सरस्वत्या उपासकाश्च भवन्ति। कवयः प्रतिच्या दृष्ट्या समग्रस्यापि जगतः समुन्नतिमूलकानि तत्त्वानि प्रेक्ष्य रचयन्ति काव्यानि। तानि काव्यानि यदि वयं पठामः तर्हि अवलोकयामः कवीनां रमणीयानि तत्त्वानि, यूनाम्, शिक्षकाणाम्, अधिकारिणाम्, कर्मचारिणाम्, छात्राणाम्, शिक्षासंस्थानानाञ्च आन्तरिकगुणवत्ताविकासपरकाणि तत्त्वानि। सर्वादौ एतस्य मूले तिष्ठति अध्यापकः। यतोहि अध्यापकः गुरुर्वा सर्वस्यापि तत्त्वस्य गुणस्य दाता पथप्रदर्शयिता च भवति।

**आदौ उत्तमाध्यापकस्य चयनम्-** आध्यापक एव शिक्षासंस्थायाः बीजं वर्तते, सः अध्यापकः सर्वस्यापि अधीयानच्छात्रस्य, विभागस्य, कर्मचारिणः, परिसरस्य, पर्यावरणस्य, शिक्षासंस्था-याश्च गुणवत्तामानयति । सोऽयमध्यापकः मनसि दृढसङ्कल्पितस्सन् कर्तुमकर्तुमन्यथाकर्तुं प्रभवति। यथोक्तम् उपनिषदि –

**युवा स्यात् साधु युवाध्यापकः। आशिष्ठो दृढिष्ठो बलिष्ठः।**
**तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः।**[2]

*सहायकाचार्यः, साहित्यविभागः, ल.दे.श. आ.सं.महाविद्यालयः, देवघरः, झारखण्डः

सूत्रमिदं न केवलं यूनां शारीरिकदृढताया अपितु मानसिकनैतिकदृढतायाश्च विषये प्रोत्साहनं ददाति । शिक्षेयं युवा-सदाचारी-अध्ययनशील-आशावादी-दृढनिश्चयी-बलवान् चेत्येतेषां गुणानामुपरि महत्वं प्रयच्छति । कारणञ्च एवम्भूतगुणविशिष्टस्य अध्यापकस्य पाणौ न्यस्ता पृथिवी सौभाग्यपूर्णा भवति । सौभाग्यं हि एकमात्रमानुषानन्दः कथ्यते । अत शिक्षासं-स्थायाः आन्तरिकगुवत्ताऽभिवृद्धये साधु अध्यापकस्य चयनमवश्यं भवेत् । यथोक्तं कालिदासेन-

**श्लिष्टाक्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।।**[3]

अर्थात् केषुचित् शिक्षकेषु अनन्तज्ञानस्य भण्डारः विद्यते परन्तु तेषु ज्ञानसम्प्रेषणस्य कला न भवति । यद्यपि केषुचित् शिक्षकेषु यद्यपि ज्ञानं स्वल्पं भवति तथापि ते ज्ञानसम्प्रेषणकलायां कुशलाः भवन्ति । यस्मिन् गुणद्वयं नाम ज्ञानं तथा सम्प्रेषणकला च तिष्ठतः वस्तुतः स एव शिक्षकेषु गणमान्यः भवतीति । अतः संस्थायाः कृते तादृशस्य शिक्षकस्य चयनमवश्यं भवेत् ।

कदाचिद् सोऽयमध्यापकोऽग्रे गत्वा उपाचार्य-आचार्य-विभागाध्यक्ष्य-सङ्कायाध्यक्ष्य-कुलसचिव-प्रबन्धक-कुलपति-कुलाधिपतीनां पदभारं तथा च राज्यस्य देशस्य वा प्राशासनिक-दायित्वं स्वीकरोति । सोऽयमध्यापकः यदा तत्तद् पदभारं स्वीकरोति तदा स एव शिष्याणाम्, छात्राणाम्, समस्तकर्मकर्तृणाम्, विभागानाम्, प्रशासनस्य, वित्तकोषस्य, पर्यावरणस्य, शिक्षा-संस्थायाश्च अभिवृद्धिमवश्यं कुर्यात् । अभिवृद्धिस्तु आन्तरिकगुणवत्तारक्षणद्वारैव भवति । परन्तु एवम्भूताः गुणाः तस्मिन् विद्यमानेऽपि न तथा साम्प्रतमवलोक्यते, न वा तस्मिन् उत्साहः, न धैर्यम्, न निष्ठता, न सहनशिलता, न नवाचारः, न दूरदर्शिता, न स्नेहः, न प्रीतिः, दृश्यते च तस्मिन् केवलमहङ्कारः । अहङ्कारस्तु समस्तगुणोद्भवस्य बाधकः भवति । येन शिक्षासंस्थायाः विशेषहानिः जायते, न तथा कश्चन कुर्यात् । तदर्थं जागरुकाः भवेयुः । भवतु तर्हि सुयोग्याध्यापकस्य चयनसत्वेऽपि स अनुत्साहितस्सन् संस्थां प्रति व्यभिचारः किमर्थमाचरतीति प्रश्ने कदाचित् तदुपरिस्थपदाधिकारिणामसहयोगता, तेषां व्यभिचारिता एव कारणं भवति । संस्थायाः आन्तरिकगुणवत्ताविकासे न केवलं अध्यापकस्य उत्तरदायित्वमपितु समस्तपदाधिकारिणः सम्भूय गुणवत्तायाः वृद्धिं कुर्युः । अतः तदर्थं सुयोग्याधिकारिणां चयनं भवेत् ।

**सुयोग्याधिकारिणां चयनम्-** काचित्संस्था स्वस्य गुणवत्ताऽभिवृद्धिनिमित्तं सुयोग्याधिकारिणां चयनं कुर्यात् । यतोहि अधिकारी सम्पूर्णशिक्षासंस्थायाः भारवाहकः मार्गदर्शकश्च भवति । तस्य प्रेरणया, अनुज्ञया, आदेशेन, निर्देशेन वा तदधीनकर्मचारिणः कार्यं कुर्वन्ति । सः अधिकारी निरहङ्कारी, गुणज्ञः, निष्ठावान्, नैतिकः, निर्लोभी, सदाचारी, अध्ययनशीलः, आशावादी, दृढनिश्चयी, बलवान्, दृढप्रतिज्ञः, निर्णयकर्ता, राजनीतिज्ञः, कूटनीतिज्ञः, कर्मठः इत्यादिभिः गुणैः विभूषितः स्यात् । कृत्याकृत्यधर्माधर्मादिविवेकता तस्मिन् भवेत् । उच्चनीचादिपरिगणनां सः न कुर्यात् । सः मितभाषी भवेत् । तस्य गुणेष्वेवादरः स्यात् । सः सर्वथा संस्थायाः समुन्नत्यै समर्पितः स्यात् । यथोक्तं भगवता व्यासेन –

**एक एवाग्निर्बहुधा समिध्यते एकः सूर्यः सर्वमिदं विभाति ।**

 ISBN: 978-81-930770-3-0

**एको वीरो देवराजोऽरिहन्ता यमः पितृणामीश्वरश्चैक एव ।।**[4]

यथा एक एव अग्निः अनेकेन प्रकारेण ज्वलति, एकः सूर्यः सर्वमिदं जगत्प्रकाशयति, देवतानामेक एव राजा शत्रून् हिनस्ति तथा धर्मराजः पितृणामीश्वरो भवति । तथैव एक एव सुयोग्याधिकारी संस्थायां गुणवत्तामानेतुं समर्थो भवति । अतः साधोः अधिकारिणः चयनमवश्यं भवेत् । नोचेत् संस्थायाः गुणवत्ताहानिः भविष्यति । यतोहि सः समस्तगुणानामधिकारी भवति । यथोक्तम् –

**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ।।**[5]

**सुयोग्याधिकारिणः सङ्कल्पपाठः**– अधिकारिपदमवाप्य सः अधिकारी साम्बिधानिकरूपेण सपथपाठमवश्यं कुर्यात् । तथापि साम्प्रतिककाले साम्बिधानिकसपथपाठं कृत्वापि केचन व्यभिचारं कुर्वन्ति । तथा न समाचरेत् । यथोक्तं सूर्यमणिरथशर्मणा आधुनिकभारते –

**लोकेन लोकस्य च सर्वदैव लौकाय चेत्युच्चरवैर्जगत्याम् ।**
**प्रतिष्ठितो वै गमतन्त्र एष इमं महामन्त्रमलं विरौति ।।**
**धनी भवेद्वा स भवेद्दरिद्रो जात्योन्नतो वास्तु नवास्तु किञ्च ।**
**इहाखिलो भारतवासिलोको विधानदृष्ट्या सततं समानाः ।।**
**महापराधं प्रविधाय केचिद् भवन्तु वा दोषिजनाः विमुक्ताः ।**
**कदा तु दण्ड्यो न भवेददोष इत्यादिवैशिष्ट्यमिदं विभर्ति ।।**[6]

स अधिकारी पदभारग्रहणात्पूर्वं गणतन्त्रस्य मन्त्रमुच्चार्य सपथपाठपुरस्सरं वक्ति यदहं सर्वदा सर्वथा च लोकेन चितस्सन् लोकस्य कृते कार्यं करोमि किञ्च लोकाय समर्पितो भवामि । धनी दरिद्रो वा भवतु, जात्या उन्नतोऽनुन्नतो वा भवतु विधानदृष्ट्या सर्वेष्वहं समानदृष्टिं प्राहिणोमि। दोषमाचरन्तः अनेके कदाचिन्मुक्ताः भवेयुः परन्तु कोऽपि निर्दोषः कदाचित् दण्डितः न भवेदिति ।

**सुयोग्याधिकारिणः शासनपद्धतिः-** अधिकारी न केवलं शिक्षणसंस्थायाः अपितु राज्यस्य देशस्य वा भवतु सः पदभारग्रहणात्परं कथं तत्तत्स्थानेषु शासनं कुर्यात् येन गुणवत्तायाः अभिवृद्धिः भवेदिति चिन्तयेत् । तत्रादौ अधिकारिणः प्रथमं भूषणं भवति श्रवणधैर्यता । सर्वादौ स अधिकारी कर्मचारिगणान् आहूय तेषां तथा संस्थायाः मङ्गलामङ्गलं श्रृणुयात् । तदनु सः अधिकारी कार्ये निमग्नस्सन् अन्यानपि कार्यं करणाय प्रचोदयेत्। समस्तकार्यं अविलम्वे समापनीयमिति प्रचोदयेत्। यथोक्तम् –

**श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिके ।**
**न हि प्रतिक्षते मृत्युः कृतमस्य न वा कृतम् ।।**[7] इति ।

अतः तत्रादौ श्रवणधैर्यता विचार्यते ।

**पदाधिकारिणः श्रवणधैर्यता-** पदभारग्रहणसमनन्तरं यदा सः अधिकारी संस्थायाः सुष्ठुपरि-चालनाय सर्वान् कर्मचारिणः समाहूय संस्थायाः विषये पृच्छति तदा कर्मचारिणः ससङ्किताः अधिकारिणं संस्थायाः विषये किमपि न वदन्ति । परन्तु तेषु केचन निर्भीकाः संस्थायाः

 ISBN: 978-81-930770-3-0

हिताहितविषये अधिकारिणं विज्ञापयन्ति। भवतु नाम साधु असाधु वा वचनं तत्सर्वं सावधानेन स अधिकारी श्रृणुयात् । यतोहि हिताहितश्रवणेनैव सर्वसम्पदः तस्मिन् रतिं कुर्वते । यथोक्तं महाकविना भारविना –

**स किंसखा साधु न शास्ति योऽधिपं**
**हितान्न यः संश्रृणुते स किंप्रभुः ।**
**सदाऽनुकुलेषु हि कुर्वते रतिं**
**नृपेष्वमात्येषु च सर्वसम्पदः ।।**[8]

श्लोकेऽस्मिन् सचिव-स्वामिनोः सखासम्बन्धोऽवलोक्यते। सर्वथा मया वक्तव्यं त्वया च श्रोतव्यमिति भावः प्रतिफलति । एवं च राजमन्त्रिणोः ऐक्यमतं स्यादित्यर्थः सुस्पष्टं भवति । येनानुकूलेषु परस्परानुरक्तेषु राजनि सर्वसम्पदः रतिं कुर्वते । तमेव मार्गमनुसृत्य अधिकारी कर्मकर्तृणां हिताहितं वा वचनं श्रृणुयात्। तदनु कर्तव्याकर्तव्यादिकं विविच्य कार्यं कुर्यात्। येन संस्थायाः अभिवृद्धिः भविष्यति।

**अधिकारिणः नीतिपूर्णशासनचिन्तनम्** – शासनपदव्यां स्थितः कोऽपि उपाचार्यः, आचार्यः, विभागाध्यक्ष्यः, सङ्कायाध्यक्ष्यः, कुलसचिवः, प्रबन्धकः, कुलपतिः, कुलाधिपतिर्वा भवतु सः नीतिसङ्गतं शासनं कुर्यात्। नीतिः सदैव अधिकारिणं समलङ्करोति। तया विरहितः शासकः संसारे निन्दां अपयशश्च प्राप्नोति। यथोक्तं भारविना-

**कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।**
**विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।।**[9]

अर्थात् अधिकारी सर्वथा कातर्यम् आलस्यञ्च त्यजेत्। षड्दुर्गुणान् (काम-क्रोध-लोभ-मोह-मद-मात्सर्यान्) विहाय नीतिपूर्णदुर्गमादर्शानुरूपपथि सदा चलेत्। नक्तंदिवं कार्याणि विभज्य कर्म कुर्यात् । अनया नीत्या शासकेभ्यो नैतिकशक्तेः बलं लभ्यते । येन शासकः दुर्जयः भवितुमर्हतीति भारविः मार्गं दर्शयति।

**सेवकादिषु अनुरागप्रदर्शनम्**– शिक्षासंस्थायाः विविधपदपदव्यां स्थितः शासकः अधिकारी वा अधस्तनकर्मचारिणं प्रति सदैव अनुरागं प्रदर्शयेत्। अनुरागः सर्वोत्तमः मार्गः भवति शासकानाम्। तेन शासनपद्धत्तिः सुगम्या भवति। यथोक्तं भारविना -

**सखीनिव प्रीतियुजोऽनुजीविनः**
**समानमानान्सुहृदश्च बन्धुभिः ।**
**स सन्ततं दर्शयते गतस्मयः**
**कृताधिपत्यामिव साधु बन्धुताम् ।।**[10]

अर्थात् शासकः सर्वथा स्वाभिमानं त्यजेत्, उदारश्च भवेत्, सर्वेषु बन्धुषु सर्वेषु मित्रेषु सर्वेषु च सेवकेषु समानबन्धुतां विस्तारयेत् । येन कर्मकर्तारः बन्धवः, मित्राणि, सेवकाश्च सन्तुष्टाः भविष्यन्ति।

 ISBN: 978-81-930770-3-0

**समकाले त्रिवर्गेषु प्रीतिः**– शैक्षणिकसंस्थायाः अधिकारिणः यद्यपि बहूनां ज्ञानानां, गुणानां, कलानां, कौशलानां, नियमानां च वेत्तारः भवन्ति तथापि कुत्रचित्स्थलेषु स्खलिताः भवन्तीति अवलोक्यते । कारणं तेषां ज्ञानं सत्वेऽपि ते परवशाः सन्तः पदव्याः दुरुपयोगं कुर्वन्ति । येन संस्थानानां कर्मचारिणां छात्राणां प्रशासनस्य च महती हानिः जायते । तथा न कर्तव्यमिति भारविः वक्ति । यथा -

**असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।**
**गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ।।**[11]

अर्थात् शासकः सर्वदा अनासक्तस्सन् धर्म-अर्थ-कामान् यथायथं विभज्य प्रत्येकमपि समीचीनमाचरणं कुर्यात् । समपक्षपाततया भक्त्यानुरागेण च सर्वस्याऽपि समयं निर्धारयेत् (यथा पूज्येषु अनुरागः भक्तिर्वा, कर्मठेषु योग्येषु च प्रीतिः तेषां सम्माननम्, निर्बलेषु सहानुभूतिः अनुकम्पा वा, कर्मकतृभ्यः सत्कर्मकरणाय तथा नियतसमये तत्कर्मसम्पादनाय प्रेरणम्, दोषादोषं विचार्य दोषिभ्यः दण्डं निर्दोषिभ्यः सम्मानम्, योग्यानां चयनम्, अयोगेभ्यः सत्पथप्रवर्त्तनाय प्रेरणमित्यादिः) । उच्यते-

**“धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः”**[12] इति ।

**उपायानां कौशलज्ञानम्-** राजनीतिविज्ञानस्य प्रमुखं कौशलं भवति उपायकौशलम् । उपायाश्चतुर्विधाः साम-दान-दण्ड-भेदाश्च । अतः शासकस्य सविधे चतुर्णामुपायानां कौशलज्ञानमवश्यं भवेत् । येन निर्बाधं स शासनं कुर्यात् । यथोक्तं भीष्मपर्वणि- **“उपायपूर्वं मेधावी यतते सततोत्थितः”**[13] इति । उपायपूर्णशासने शासकः दुर्गतिं नाप्नोति, अवमानितः न भवति किञ्च प्रशंसायाः अधिकारी भवति । तस्मिन् सर्वे सन्तुष्टाः भवन्ति । तदर्थमधिकारिणः सविधे उपायानां कौशलज्ञानं भवेयुरिति । अत आदौ सामदानयोः चर्चा क्रियते ।

**साम-दानयोः कौशलम् -**

**निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।**
**प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ।।**[14]

अनया उक्त्या सामदाने उभे सहचारिभावं प्रदर्शयतः । सामं विहाय दानं कदापि न प्रवर्तेत। तदर्थं सदा शासकस्य निष्कपटसामनीतिः दानं विना न प्रवर्तनीया । यतोहि “दानेन सर्वे वशाः” इति कृत्वा दानं आदरसत्कारेण विना न भवेत् । किञ्च अतिशयसत्कारोऽपि दोषाय भवति, तदर्थं जागरुकः भवेत्। अतिशयसत्कारः केवलं विशेषगुणाधिकारिणां तथा योग्यानां भवेत् नेतराणामिति । संस्थायाः समुन्नत्यै सर्वदा सामदानयोः प्रयोगं कुर्यात् । उक्तञ्च-

**लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा ।**
**मूर्खं छन्दानुराधेन तत्त्वार्थेन च पण्डितम् ।।**[15] इति ।

**दण्डकौशलम्- “दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति”**[16] इत्युक्त्या चतुर्षु कौशलेषु तृतीयं प्रमुखं स्थानमावहति दण्डकौशलम् । दण्डः भीतेः कारणम्, सम्मानस्य सूचकम्, न्यायस्य अभिज्ञानम्, सतर्कस्य वार्ता, सम्पुष्टेः साधनम्, व्यक्तित्वस्य पराकाष्ठा, शासनस्य च पद्धतिः भवति।

 ISBN: 978-81-930770-3-0

दण्डव्यवस्था आलसस्य, भ्रष्टाचारस्य, धनलोलुपतायाः, विलासिजीवनस्य, श्रमविमुखतायाश्च निराकरणं करोति। अतः दण्डः केवलं दुष्टानां कृते निर्दिष्टं न तु शिष्टानाम्। अतः शैक्षणिकाधिकारी सततं विचार्य दोषिभ्यो दण्डं दद्यात् धर्मविप्लवं च नश्येत्। यथोक्तं महाकविना -

**वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।**
**गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्॥**[17]

दण्डप्रदाने कदापि पक्षपातः न करणीयः। न कस्यापि धनसम्पत्तिमपहर्तुं न वा पदव्याः न च राज्यस्य लुब्धेन, न क्रोधावेशेन दण्डं दातव्यम्। सततं विचार्य दण्डं दद्यात्। रिपौ सुतेऽपि वा यदि सः दोषी तर्हि तस्मै दण्डं प्रयच्छेत् दोषानुरूपम्। यतोहि दण्डदानं शासकस्य धर्मः भवति। नोचेत् स्वेच्छाचारितादिदोषाः आपतन्ति। येन शासकः दुर्गतिं प्राप्नोति। धर्मशास्त्रानुसारेण दण्डः क्रोधलोभविवर्जितः स्यात्। यतोक्तम् –

**अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।**
**अयशो महदाप्नोति नरकं चैव गच्छति॥**[18] इति।

अतः दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुर्न तु सम्बन्धनिबन्धनः पक्षपात इति विचिन्त्य दण्डं दद्यात्। किञ्च यदि दण्डव्यवस्था न स्यात्तर्हि -

**दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः।**
**जले मत्स्यानि वा भक्ष्यन् दुर्बलान् बलवत्तराः॥**[19]

**भेदकौशलम्**- भेदस्तु अन्तिमः महनीयश्च पन्था वर्तते शासकानाम्। भेदकौशलेन कश्चिदधिकारी सुशासकत्वेन परिचितो भवति। तर्हि कोऽयं भेद इति जिज्ञासायामुच्यते अन्यतो विशेषस्य पृथक्करणमिति। कौशलोऽयं विपक्षशासनार्थमुपायभूतः। न्यायशास्त्रोक्तदिशा यथा अन्योऽन्याभावे च घटात् पटस्य भेदः तथेति। यथोक्तमग्निपुराणे -

**परस्परन्तु ये द्विष्टाः क्रुद्धबीतावमानिताः।**
**तेषां भेदं प्रयुञ्जीत परमं दर्शयेत् भयम्॥**
**आत्मीयान् दर्शयेदाशां येन दोषेण बिभ्यति।**
**परास्तेनैव ते भेद्या रक्ष्यो वै ज्ञातिभेदकः।**
**सामन्तकोपो बाह्यस्तु मन्त्र्यमात्यात्मजादिकः॥**
**अन्तःकोषञ्चोपशाम्यं कुर्वन् शत्रोश्च नं जयेत्॥**[20]

किञ्चोक्तं भारविना-

**विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः।**
**क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः॥**[21]

समस्तकार्यसम्पादनाय स अधिकारी स्वयमविश्वस्तः सन् सर्वत्र अवञ्चकान् आत्मीयान् नियोज्य कार्यं साधयेत्। स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन् परमुखे परान् नैव निन्देत्। कार्याणां सफलसमाप्तिसमन्तरं अनुजीविनमाहूय शासकः तान् पुरस्कुर्यात्। एवम्भूतसम्पदः

 ISBN: 978-81-930770-3-0

शासकस्य उपकारित्वं वदन्ति । कृतज्ञे शासके अनुजीविनः अनुरक्ताश्च सर्वदा शासकस्य रक्षां कुर्वन्ति । अतः शिक्षणसंस्थायाः अधिकारी अनया पद्धत्या शासनं कुर्यात् । किञ्च –

**यस्मिन् यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः ।**
**मयाचारो मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ।।**[22]

अत उपायचतुष्टयानामनुसरणेन शिक्षणसंस्थायाः कश्चिदधिकारी विचार्य यथायोग्यजनेषु उपायचतुष्टयानां विनियोगं कुर्यात् । येन उपायचतुष्टयं परस्परं स्पर्धामुपेत्य प्रचितोत्तरकालाः अर्थसम्पदः अनारतं प्रसवेयुः । अनेन समस्तविभागानाम्, विभागीयकर्मकर्तृणाम्, छात्राणाम्, उपकरणानाम्, पाठ्यक्रमस्य, पर्यावरणस्य, शासनस्य, वित्तकोषस्य, परिसरस्य च अभिवृद्धिः निरन्तरं भवेत् । किञ्च शासकः तस्य कः मित्रः कश्च शत्रुः, कः सम्मतः कश्च त्याज्यरिति विचारं कुर्यात् । नोचेत् शासकस्यैव हानिः भवति । यथोक्तम् कालिदासेन –

**द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम् ।**
**त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।।**[23] इति ।

किञ्च - **दोषदर्शी भवेत् तत्र यत्र स्नेहः प्रवर्तते ।**
**अनिष्टेनान्वितं पश्येद् यथा क्षिप्रं विरज्यते ।।**[24]

**शिक्षणसंस्थानित्तं भूमेरावश्यकता- "माता भूमिः पुत्रोऽहं पृथिव्याः"**[25] इत्युक्तरीत्या भूमिः निरंङ्कुशजीवनधारणाय प्रथमा सर्वोत्तमा च वर्तते । यथा मन्दिरनिर्माणाय भूमेः, मनुष्याणां गृहनिर्माणाय भूमेः तथा अध्ययनाध्यापनार्थं शिक्षणसंस्थायाः कृतेऽपि भूमेरावश्यकताऽस्ति । तदर्थं शिक्षणसंस्थानिमित्तं सुमुचितस्थाने भूमेः चयनं कुर्यात् । तदनु अध्ययनार्थमागतानां छात्राणां सर्वाङ्गीणविकासाय वास्तुशास्त्रानुमतं शिक्षाशौध-प्रशासनिकसौध-जलव्यवस्था-शौचालय-छात्रावास-पाकशाला-मन्दिर-क्रीडाङ्गण-योगशाला-यज्ञशाला-चिकीत्सालय-शारीरिक-व्यायामप्रकोष्ठ-बहुविधोपकरणादीनां च निर्माणं कर्तव्यम् । एताभिः व्यवस्थाभिः रहिता काचिद् शिक्षासंस्था भवितुं नार्हति । एतदर्थं शिक्षासंस्थायाः कृते शिक्षासंस्थायाः प्रतिष्ठातुः तथा स्थानीयप्रशासन-जिल्लाप्रशासन-राज्यसर्वकार-स्थानीयजनानां च योगदानं भवेत् । यतोहि शिक्षासंस्था छात्राणां तथा विकसितभारतस्य भाग्यनिर्धारणं करोति । अतः शिक्षासंस्थायाः कृते कदापि छलः न कोऽपि कर्तव्यः । यथोक्तम् -

**भूमौ च जायते सर्वं भूमौ सर्वं प्रतिष्ठितम् ।**
**भूमिः प्रतिष्ठा भूतानां भूमिरेव परायणम् ।।**
**यस्य भूमिः तस्य सर्वं जगत्स्थावरजङ्गमम् ।**
**तत्रातिगृद्धा राजानो विनिघ्नन्तीतरेतरम् ।।**[26]

**धनस्यावस्यकता– "वयं स्यां पतयो रयीणाम्"**[27] इति वेदपुरुषवचनानुसारं समस्तमनोरथानाम्, समस्तानां योजनानाम्, सर्वासां महत्त्वाकाङ्क्षाणाम्, समस्तानां समृद्धीनाम्, सर्वासामपि विद्यानाम्, सर्वेषामपि गुणानाम्, समस्तज्ञानविज्ञानानाम्, सहस्रगुणानाञ्च उत्पत्तिकारणं भवति

धनम्। धनं विना कथं वा शिक्षासंस्थायाः उत्पत्तिः अभिवृद्धिर्वा। राज्यसर्वकारः भारतसर्वकारो वा शिक्षासंस्थायाः समुन्नत्यै दृष्टिः दातव्या। उक्तञ्च –

**अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः।**
**क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा॥**[28]

किञ्च - **दारिद्र्याद् ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो**
**निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते।**
**निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते**
**निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्॥**[29]

**संसाधनव्यवस्था-** संसाधनं समस्ताकर्षणस्य केन्द्रबिन्दुः। तेन विना शीक्षणसंस्थाया अध्ययन-अध्यापन-शासनादिकार्यमवरुद्धं भवति। अतः शिक्षासंस्थायाः साधुपरिचालनाय स अधिकारी संसाधनोपकरणानां निर्माणं क्रयं वा कृत्वा तत्तत्विभागाय, अध्यापकाय, कर्मचारिणे, छात्राय च दद्यात्। येन शिक्षणसंस्थायाः निरन्तरमभिवृद्धिः भवेत्।

**अन्तर्जालपटलस्य विकासः-** समस्तसूचनानां प्रकाशकः अन्तर्जालपटलम्। विज्ञानयुगे कस्या अपि संस्थायाः कृते वरदानस्वरूपं भवति अन्तर्जालपटलम्। आधुनिकयुगे मानवः एकत्रोप-विश्य कस्या अपि संस्थायाः परिचयं तथा तदन्तर्निहितगुणान् झटिति ज्ञातुं प्रभवति। अन्तर्जालपटलं संस्थायाः कृते वरदानस्वरूपं भवति। अत अन्तर्जालपटलं निर्माय विकासं च कृत्वा तस्मिन् संस्थायाः समस्तसूचना दातव्या।

**आन्तरिकगुणवत्ताप्रकोष्ठनिर्माणम्-** शिक्षणसंस्थायाः प्रमुखमङ्गं भवति आन्तरिकगुणवत्ता-प्रकोष्ठः। प्रकोष्ठोऽयं शिक्षणसंस्थायाः, समस्तकर्मचारिणाम्, छात्राणां च गुणवत्तां वर्द्धयितुं सर्वाङ्गीणविकासाय च निरन्तरप्रयत्नं करोति। **NAAC** इति संस्था आगत्य अनेन प्रकोष्ठमाध्यमेन तत्तत्संस्थायाः गुणवत्तायाः प्रत्यायनं कृत्वा **(Gradation)** अङ्कान् यच्छति। तेनैव अङ्केन **UGC/State Government/Central Government** तः विपुलामर्थराशिं प्राप्य स्वकीयाभिवृद्धिं कृत्वा अग्रे सरति।

एवमेव शिक्षणसंस्थायाः आन्तरिकगुणवत्ताऽभिवर्द्धनाय उपर्युक्तबिन्दवः न पर्याप्ताः भवन्ति अपितु **वित्तकोषस्याभिवृद्धिः, भूतपूर्वच्छात्रसंसदः निर्माणम्, अव्यवस्थिता-चरणनिर्वृत्तिव्यवस्था, छात्रारक्षणव्यवस्था, कर्मचारि-उन्नयनप्रकोष्ठनिर्माणम्, अध्याप-कानामध्यापनव्यवस्थायाः विकासः, अध्यापकानां कौशलवृद्धिव्यवस्था, शिक्षकेतर-कर्मचारिणां कौशलवृद्धिव्यवस्था, नारीसुरक्षाव्यवस्था, युगानुकारिणी शिक्षादानम्, व्यवसायिकपाठ्यक्रमव्यवस्था, सङ्गणकीयज्ञानप्रदानम्, तकनिकीशिक्षादानम्, आधुनिकभाषाज्ञानप्रदानम्, छात्राभिभावकयोः प्रतिपुष्टिस्वीकरणम्, परीक्षाव्यवस्थायां नवाचारः, छात्राणामान्तरिककौशलाभिवृद्धिः, छात्राणां कृते सर्वविधसौविध्यप्रदानम्, छात्रावासव्यवस्था, छात्रवृत्तिव्यवस्था, दिव्याङ्गच्छात्रेभ्यो सौविध्यप्रदानम्, जलसं-रक्षणव्यवस्था, पर्यावरणव्यवस्था, वृक्षारोपणव्यवस्था, चिकित्सासौविध्यप्रदानम्,**

 ISBN: 978-81-930770-3-0

**योगप्रशिक्षणम्, क्रीडाव्यवस्था, पुस्तकालयसौविध्यप्रदानम्, प्रकाशनव्यवस्थादिविषये** शिक्षासंस्थायाः अधिकारिणः सततं चिन्तयेयुः ।

**उपसंहारः -**

अनेनप्रकारेण क्रान्तदर्शिनो कवयः विभिन्नेषु काव्येषु समस्ततत्त्वानामान्तरिकगुणवत्ताऽभिवर्द्धनोपायाः निरदिशन् । तेनैव पथा प्रविचलन् मानवः यशसोऽधिकारी भवति । तादृशपुरुषस्य हस्ते विन्यस्ता शिक्षणसंस्थाऽपि अनुदिनमभिवर्द्धते । "दिने दिने सा परिबर्द्धमाना" इव शिक्षणसंस्था नूतनत्वमाप्नोति । कर्मचारिणः छात्राश्च सुतरामभिबर्द्धन्ते । यद्यपि बहूनां तत्त्वानामुपस्थापनं करणीयमासीत् तथापि शोधपत्रगौरवभयादत्र उपसंहरामि ।

**<u>पादटिप्पणी</u>**

1. केसवमिश्रस्य अलङ्कारशेखरे
2. तैत्तिरीयोपनिदि, 2.8
3. मालविकाग्निमित्रम्, 1.16
4. महाभारते तीर्थयात्रापर्वणि, 134.8
5. नीतिशतकम्,63
6. आधुनिकभारतम्, श्लो.सं.20-22
7. शान्ति.175.15
8. किरातार्जुनीयम्, 1.5
9. किरातार्जुनीयम्, 1.9
10. तत्रैव, 1.10
11. तत्रैव, 1.11
12. किरातार्जुनीये मल्लिनाथकृतघण्टापथटीकायाम्, पृ.सं.12
13. महाभारतस्य भीष्मपर्वणि
14. किरातार्जुनीयम्, 1.12
15. किरातार्जुनीये मल्लिनाथकृतघण्टापथटीकायाम्, पृ.सं.12
16. महाभारतम्
17. किरातार्जुनीयम्, 1.13
18. किरातार्जुनीये मल्लिनाथकृतघण्टापथटीकायाम्, पृ.सं.13
19. शान्ति.15.9
20. अग्नि.पु.अ.225
21. किरातार्जुनीयम्, 1.14
22. उद्योग.37.7
23. रघु.1.28
24. अनुशासनपर्वणि, पृ.सं.6010

 ISBN: 978-81-930770-3-0

25. अथर्व.12.1.12
26. भीष्म.4.20-21
27. ऋग्.10.121.10, यजु.10.20, अथर्व.7.79.4
28. हितो.1.124
29. मृच्छ.1.14

**सन्दर्भग्रन्थाः –**


1. अलङ्कारशेखरः, केसवमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी-221001, 1979.
2. तैत्तिरीयोपनिषद्, श्रीशङ्कराचार्यः, गीताप्रेसः, गोरखपुरम्.
3. मालविकाग्निमित्रम्, महाकविकालिदासः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी-221001, 1979.
4. नीतिशतकम्, श्रीभर्तृहरिः, चौखम्बाकृष्णदासअकादमी, वाराणसी-221001, 2010.
5. तैत्तिरीयोपनिषद्, श्रीशङ्कराचार्यः, गीताप्रेसः, गोरखपुरम्.
6. आधुनिकभारतम्, मणिव्याख्यायुक्तम्, रचयिता व्याख्याकर्ता च प्रो. सूर्यमणिरथः, प्रकाशिका - कवितारथः, मातामठलेन, चूडङ्गसाहि, पुरी, ओडिशा-752001, 2009.
7. किरातार्जुनीयम्, महाकविभारविः, सम्पादकः व्याख्याकारश्च डा. सुधाकर मालवीयः, चौखम्बाकृष्णदासअकादमी, वाराणसी-221001, 2009.
8. रघुवंशमहाकाव्यम्, सम्पादकः श्री पं. रामचन्द्र झा, चौखम्बाकृष्णदासअकादमी, वाराणसी-221001, 2007.
9. संस्कृतनिबन्धशतकम्, डा. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, चौक, वाराणसी - 221001, 2010

 ISBN: 978-81-930770-3-0

# आधुनिकयुगे विविधदर्शनानां प्रायोगिकदृष्ट्या अध्ययनम्

**डॉ. नन्दिघोषमहापात्रः***

दुःखमयेऽस्मिन् प्रपञ्चे सर्वोऽपि जीवः सुखं कामयते दुःखं च जिहासते। आध्यात्मिकाधिभौतिकाधिदैविकभेदेन दुःखस्य त्रैविध्यमङ्गीकृतं शास्त्रकृद्भिः । एतेषां त्रिविधानां दुःखानां निर्मूलनेनैव आत्यन्तिकसुखस्य प्राप्तिर्भवतीति नास्ति सन्देहलेशोऽपि। तदेव शान्तिः परमानन्दः। तच्च सुखम् आत्मविद्यया एव लभ्यते । त्रिविधतापसन्तप्तानां शान्त्यर्थं क्लेशमयसंसारात् आत्यन्तिकदुःखनिवृत्यर्थं च दर्शनशास्त्रस्य महती आवश्यकता वर्तते । एतदर्थमेव दर्शनानि प्रवृत्तानि सन्ति।

दृश् धातोः करणार्थे ल्युट् प्रत्यये कृते सति दर्शनशब्दस्योत्पत्तिः। दृश्यते ज्ञायते विचार्यते परमतत्त्वमनेनेति दर्शनम् । अर्थात् येन साधनेन परमतत्त्वं दृश्यते, परमतत्त्वं ज्ञायते, परमतत्त्वं विचार्यते, तद्दर्शनम्। अत एव उक्तं श्रुतिषु –

**“आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः”**[1] इति।

आत्मदर्शनस्य सोपानत्रयं श्रवणं मननं निदिध्यासनञ्च भवति। आदावेव मोक्षशास्त्राणां श्रवणं ततस्तस्य भावनं मननं वा ततः शास्त्रोक्तपरमतत्त्वस्य ध्यानम् इत्येतत्सोपानत्रयं विधिवत्सम्पादनेनैव आत्मदर्शनमात्मसाक्षात्कारो वा सञ्जायते। तदेव द्रढयति शास्त्रम् -

**श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येयः इति दर्शनहेतवः ।।**[2] इति।

धर्मरूपेण आचाररूपेण व्यवहाररूपेण च संस्कृतेः यः बाह्यस्वरूपः वर्तते तस्याधारः दर्शनमेव। एतत् संस्कृतेः आन्तरीकस्वरूपं भूत्वाऽपि धर्म-आचार-व्यवहाररूपेण च स्वाभिव्यक्तिं प्राप्नोति। प्रसङ्गेऽस्मिन् शङ्केयं समायाति यत् दर्शनस्य का आवश्यकता इति। लक्षणसंग्रहे दर्शनस्य लक्षणं कुर्वता श्रीगौरीशङ्करभिक्षुणा उक्तम् –

**“विचारप्रयोजकं ज्ञानं दर्शनम्”**[3], **“तत्त्वज्ञानसाधनशास्त्रम्”**[4] इति च।

अतः विचारप्रयोजकत्वं तत्त्वज्ञानसाधनत्वं वा दर्शनशास्त्रस्य आवश्यकता वर्तते। को वा लाभः शास्त्रस्यास्य अध्ययनेन इति जिज्ञासायां मोक्षप्राप्तिरेव फलमिति समाधानम् । धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरषार्थ इति सूचयति भगवती श्रुतिः- **“न स पुनरावर्तते इति ।”**[5] वेदान्तदर्शनं भारतीयचिन्तनानां परमोत्कर्षमस्ति। अस्मिन् ब्रह्म एव परमसत्तारूपेण स्वीकृतम्। जीवो ब्रह्मैव नापरः इति वेदान्तोद्घोषेण ब्रह्मजीवयोः न कश्चिदपि भेदः सिद्ध एव । परं संसारे तयोः भेदः अज्ञानवशादेवानुभूयते । यथार्थज्ञानेन तदज्ञानं दूरीभवति ब्रह्मानन्दप्राप्तिश्च भवति । शास्त्रेषु अज्ञानं सर्वानर्थमूलमिति प्रतिपादितम् तदेव वक्ति आचार्यशङ्करः। यथा -

**सर्वानर्थप्रहाणाय ब्रह्मविद्याप्रतिपत्तये च सर्वे वेदान्ता आरभन्ते।**[6]

---

*सहायकाचार्यः, सर्वदर्शनविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः

 ISBN: 978-81-930770-3-0

किञ्च इदमज्ञानं बन्धनस्य हेतुः । तदुक्तम्- **अविद्याकामकर्माणि संसारस्य प्रयोजकभूतानि ।**[7] अतः आत्मानुसन्धित्सुभिः अज्ञानमपघातव्यम् । आत्मज्ञानेनैव तस्य अपघात इति उपनिषद् ब्रूते - **ब्रह्मविद् ब्रह्मैव भवति ।**[8] मोक्षप्राप्त्यनन्तरं जीवः न कदापि मरणशीलेऽस्मिन् संसारे जायते । स च मोक्षः तत्त्वज्ञानेन एव लभ्यते । तथोक्तं - **"ज्ञानान्मुक्तिः", "ऋते ज्ञानान्न मुक्तिः"**[9] इत्यादीनि । ज्ञानाभ्यासबलेन अज्ञानरूपमलं तथा निवारितं भवति यथा कटकादिद्रव्यसंस्पर्शेण जलं निर्मलं भवति । ज्ञानमेव जीवं पवित्रीकरोति । अत एव आचार्येण ज्ञानमेव मोक्षार्थं राजमार्ग इति स्वीकृतः । यथा अग्निः समिधान् भस्मीकरोति तथैव ज्ञानाग्निः सर्वाण्यपि कर्माणि भस्मीकरोति । श्रीमद्भगवद्गीतायां भगवता ज्ञानस्य महत्त्वम् एवं प्रतिपादितम् -

**ज्ञानाग्नि सर्वकर्माणि भस्मसात् कुरुते यथा ।**[10]
**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।**[11]
**ज्ञानी त्वात्मैव मे मतम् ।**[12]
**ज्ञानलब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।**[13]

तत्त्वानां ज्ञानं तत्त्वज्ञानम् । तत्त्वानि विभिन्नदर्शनानुसारं भिन्नानि भिन्नानि भवन्ति । तत्तत् दर्शनानुसारं तत्तत् तत्त्वानां सम्यग्ज्ञानेन मोक्षप्राप्तिर्भवतीति तत्तदाचार्याणामभिप्रायः । मोक्षस्तु लप्स्यते एव परं व्यावहारिकदशायां तत्त्वज्ञानेन या भावना उदेति, सा भावना लोके शान्तिप्रतिष्ठार्थं विश्वशान्तिप्रतिष्ठार्थं वा उपकरोति । अतः विश्वशान्तिप्रतिष्ठा ज्ञानेन एव भविष्यति इति निश्चप्रचम् ।

साम्प्रतं समग्रेऽस्मिन् विश्वे आतङ्कवादः एव अशान्तेः मूलत्वेन परिलक्षते । तन्निराकरणं एतावत् प्रयत्नरताः सन्तोऽपि न केनापि देशेन न केनापि प्रदेशेन न केनापि जनसाधारणेन वा कर्तुं शक्यम् । तन्निराकरणं केवलमेव दर्शनतत्त्वज्ञानेन कर्तुं शक्यम् । साम्प्रतं सम्पूर्णस्यापि विश्वस्येयं प्रमुखा समस्या । अस्याः विश्वसमस्यायाः अशान्तेः मूलकारणस्य आतङ्कवादस्य बहुनि कारणानि भवन्ति । तद्यथा- स्वार्थपरता, हिंसा, घृणा, असन्तुष्टता, दरिद्रता, विभिन्नता, लोभादयः। इमानि न केवलं आतङ्कवादस्य कारणानि अपि तु सर्वस्यापि अशान्तेः कारणानि भवन्ति । **"कारणनाशे सति कार्यनाशः"** इति नियमानुसारम् एतेषां कारणानां निराकरणेनैव विश्वशान्तिप्रतिप्रतिष्ठा भवितुमर्हति । **"नासतो विद्यते भावो नाभावो विद्यते सतः"**[14] इति न्यायेन शान्तिः सिद्धमेव । परं यथा ज्ञानं सिद्धम् अज्ञाननिवृत्यनन्तरं ज्ञानस्य स्वतः एव प्रकाशः सञ्जायते तथैव अशान्तिनिवारणानन्तरं शान्तेः प्राप्तिर्भवितुमर्हति इति नास्ति विप्रतिपत्तिः ।

**स्वार्थपरता-** स्वार्थपरता सर्वस्मिन्नपि क्षेत्रे अशान्तेः मूलकारणत्वेन दरीदृश्यते । स्वार्थोऽपि सामूहिकस्वार्थः वैयक्तिकस्वार्थो वा भवितुमर्हति । वैयक्तिकस्तु निगदद्व्याख्यात एव । कस्यापि देशस्य प्रदेशस्य समाजस्य गणस्य वा स्वार्थः सामूहिकस्वार्थः । उदाहरणत्वेन दलितानां दरिद्राणां वा जनानां समुद्धरणमेव माउवादीसंस्थायाः प्रमुखं कार्यम् । एते माउवादीनः दलितानां दरिद्राणां वा जनानां साहाय्यं कर्तुं हिंसामपि आचरन्ति । यद्यपि नैतत् वैयक्तिकस्वार्थः तथापि सामूहिकस्वार्थ एव । परं किमनया रीत्या दरिद्राणां दरिद्रतायाः निर्मूलनं भवितुमर्हति ? विश्वशान्तेः प्रतिष्ठा भवितुं

 ISBN: 978-81-930770-3-0

शक्यम् ? न, एतदर्थं केवलं दया, दानं, सौहार्दम् अर्थात् मैत्रादिभावना एव उपायः। एतदेव शास्ति योगशास्त्रम्- **"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भवनातश्चित्त-प्रसादनम्।"**[15] इति।

सुखितेषु मैत्री, दुःखितेषु करुणा, पुण्यात्मकेषु हर्षः अपुण्यात्मकेषु च उपेक्षा इत्येतादृशाः भावनाः क्रियन्ते चेदेव समाजः श्रृङ्खलितो भवितुमर्हति। श्रृङ्खलिते समाजे अशान्तिरेव न स्यात्। तनेव सौहार्दं वर्धेत्। स्वार्थनिमित्तं न कोऽपि जीवः विशिष्य मानवः जीवेत्। श्रुतौ अपि एषा भावना प्रकटिता –

**"जीवेम शरदः शतं श्रुणुयाम शरदः शतं प्रब्रवाम शरदः शतम्।"**[16] इति।

अत्र जीवेम श्रुणुयाम इत्यादीनि बहुवचनान्तपदानि सामूहिकीं भावनां प्रकटयन्ति। अस्माकं सम्पूर्णमपि विश्वम् एकः परिवारः। विश्वं भवत्येक नीडम्। अत्र स्वार्थादिभावनानां न किमपि स्थानं वर्तते। किमस्माकं परिवारे कस्यापि दरिद्रता भवति चेत् वयं तस्य साहाय्यं न कुर्महे? तथैव समग्रेऽस्मिन् विश्वे भगवता ये धनिकाः सृष्टाः तैः धनिकैः एव स्वभ्रातृकल्पानां दरिद्राणां साहाय्यम् अवश्यमेव करणीयम्, येन दरिद्रतायाः नाशः समनन्तरमेव स्वार्थपरभवनायाः निर्मूलनं, साम्यतायाः प्रतिष्ठा, माउवादीत्यादीनां संस्थानां निर्मूलनं भविष्यति। अयं निजः परो वेति भावनायाः नाशः भविष्यति। तदानीं सर्वत्र शान्तिरेव शान्तिः। सर्वत्र परमानन्दः प्राप्स्यते। **"यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं श्रृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति।"**[17]

परन्तु **"यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं श्रृणुयात्तत्केन कमभिवदेत्तत् केन कं मन्वीत तत्केन कं विजानीयाद् येनेदं सर्वं विजानाति तं केनविजानीयाद्वि-ज्ञातारमरे केन विजानीयादिति।"**[18] अर्थात् तदानीं सर्वत्र **"सर्वं खल्विदं ब्रह्म"**[19] इति भावना समायाति। न कोऽपि हिंस्यति इर्ष्यति वा। तदानीमेव **"संगच्छध्वं संवदध्वं संवोमनासिं जानताम्।"**[20] **"द्योः शान्तिरन्तरीक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरौषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवा शान्तिः ब्रह्म शान्ति सर्वं शान्तिः शान्तिरेव शान्ति सा मा शान्तिरेधिः।"**[21] इत्यादीनां श्रुतिनां सार्थकता भवितुमर्हति।

**हिंसा-** हिंसाभावना नूनमेव अशान्तेः कारणम्। तन्निवारणोपायान् सूचयति योगतत्त्वज्ञान-प्रतिपादकं शास्त्रं योगदर्शनम्। हिंसाभावनायाः प्रादुर्भावस्य कारणं चित्तदूषणं चित्तस्य अस्थिरता च यतो हि मनः एव मनुष्याणां कारणं बन्धमोक्षयोः। इति। तस्य चित्तस्य स्वच्छतानिमित्तं स्थिरतानिमित्तं च चित्तपरिकर्मव्यवस्थां शास्ति योगशास्त्रम्- **मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातः चित्तप्रसादनम्।**[22]

एभिरेव उपायैः चित्तं निर्मलं, स्थिरं, प्रसन्नञ्च तिष्ठति। प्रसन्ने चेतसि हिंसादयः भावनाः न कदाचिदपि आयान्ति। सर्वदुःखानां नाशः सञ्जायते। तदुक्तं भगवता- **प्रसादे सर्वदुःखानां हिनिरस्योपजायते।**[23] एवञ्च प्रच्छर्दनविधारणप्राणायामद्वारा, विषयवतीप्रवृत्तिद्वारा, ज्योतिष्मतीप्रवृत्तिद्वारा वा चित्तं समाहितं भवति स्थिरं प्रसन्नञ्च भवति। चित्तं यदा अनुरागशून्यं भवति

 ISBN: 978-81-930770-3-0

तदानीमपि चित्तं स्थितिपदं लभते। लोके विषयवैराग्यमित्यत्र जीवितुं यावदावश्यकं तावदेव आदेयं चेत् जीवनं सुखमयं मधुमयञ्च भवितुमर्हति। इदं सम्पूर्णमपि जगत् परमात्मना व्याप्तं वर्तते। संसारे परिदृश्यमानं सर्वमपि वस्तुजातं अस्य एव परमात्मनः स्वरूपम् अत ईश्वरार्पणबुद्ध्या अनाशक्ततया त्यागपूर्वकमेव भोक्तव्यम्। मानवस्य भौतिकतां प्रति यदाकर्षणं वर्तते तस्य नियन्त्रणं करणीयमिति ईशावास्योपनिषदुपदिशति –

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।**[24]
**प्रच्छर्दनविधारणाभ्यां वा प्राणस्य।**[25]
**विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिसम्बन्धिनि।**[26]
**विशोका वा ज्योतिष्मती।**[27]
**वीतरागविषयं वा चित्तम्।**[28]

किञ्च अहिंसादीनां यमानां शौचसन्तोषादीनां नियमानां सम्यगनुष्ठानेन परिपालनेन वा हिंसा, चौर्यं, लुण्ठनं, दरिद्रता, सामाजिकवैषम्यादीनां समुलोत्पाटनं भवितुमर्हतीति सूचयति योगदर्शनम् - **अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।**[29]
**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।**[30]
**अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थनम्।**[31]
**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।**[32]
**अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।**[33]

एतदेव आर्हतैरपि सम्यक्चरित्रस्य पञ्चभेदान् कृत्वा अङ्गीकृतम्। घृणाभावना अपि अशान्तेः प्रमुखं कारणं भवति। तस्याः अपि समूलोत्पाटनं शान्तेः पन्था। तदर्थम् उपदिशति श्रुतिः-

**यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**[34]

यः परमात्मनि सर्वेषां प्राणीनाम् अस्तित्वं पश्यति, सर्वेष्वपि भूतेषु परमात्मानं पश्यति, सर्वेऽपि प्राणिनः परमात्मनः स्वरूपमिति चिन्तयति, सः न कदापि हिंस्यति विजुगुप्सते वा। एतादृश्या एव भावनया घृणाभावनायाः मूलोत्पाटनं मैत्रीभावनायाः प्रतिष्ठापनं च भवितुमर्हति। लोभोऽपि अशान्तेः प्रमुखं कारणं वर्तते। अतः तस्यापि निरोधोपायं प्रदर्शयति ईशावास्योपनिषद्-

**तेन त्यक्तेन भूञ्जीथाः मा गृधः कस्य स्विद् धनम्।।**[35]

निखिलेऽस्मिन् प्रपञ्चे यत् किमपि वस्तुजातं दृश्यते तत् सर्वमपि सर्वशक्तिमता सर्वकारणवता ईश्वरेण व्याप्तम्। सांसारिकविषयाः न कस्यापि भवन्ति, तत्र अनाशक्तता एव प्रदर्शनीया। एतादृश्या भावनया मानवं न कदापि लोभः स्पृशति, यत् अशान्तेः कारणम्। अन्ते -

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**
**यद्यदात्मनि चेच्छेत तत्परस्यापि चिन्तयेत्।**

 ISBN: 978-81-930770-3-0

**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥**[36]

इति न्यायेन अनुकुलचिन्तनमेव विश्वशान्तेः मार्गः इति मे द्रढीयान् विश्वासः ।

**<u>पादटिप्पणी -</u>**

(1) बृहदारण्यकोपनिषद्, २-४-५
(2) सांख्यप्रवचनभाष्यम्, पृ.सं.३
(3) सर्वलक्षणसंग्रहः, पृ.सं.६३
(4) सर्वलक्षणसंग्रहः, पृ.सं.६३
(5) छान्दोग्योपनिषद्, ८-१५-१
(6) ब्र.सू.शा.भा.
(7) ब्र.सू.शा.भा.
(8) मु.उ.३-२-९
(9) मु.उ.२-२-९
(10) श्रीमद्भगवींता, ४-३७
(11) श्रीमद्भगवींता, ४-३८
(12) श्रीमद्भगवींता, ७-१८
(13) श्रीमद्भगवींता, ४-३९
(14) श्रीमद्भगवींता, २-१६
(15) योगसूत्रम्, १-३३
(16) यजुर्वेदः, ३६-२४
(17) बृहदारण्यकोपनिषद्, २-४-१४
(18) बृहदारण्यकोपनिषद्, २-४-१४
(19) छान्दोग्य उपनिषद्, ३/१४/१
(20) ऋग्वेदः, १०-१९१-२
(21) बृहदारण्यकोपनिषद्
(22) योगसूत्रम्, १-३३
(23) श्रीमद्भगवद्गीता, 2.
(24) ईशा. 1
(25) योगसूत्रम्, १-३४
(26) योगसूत्रम्, १-३५
(27) योगसूत्रम्, १-३६
(28) योगसूत्रम्, १-३७

 ISBN: 978-81-930770-3-0

(29) योगसूत्रम्, २-३५
(30) योगसूत्रम्, २-३६
(31) योगसूत्रम्, २-३७
(32) योगसूत्रम्, २-३८
(33) योगसूत्रम्, २-३९
(34) ईशावास्योपनिषद्, ६
(35) ईशावास्योपनिषद्, १
(36) महाभारते शान्तिपर्वणि

**सन्दर्भग्रन्थाः –**

१. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, २०१०, (शाङ्करभाष्यार्थ)।
२. ईशाद्यष्टोत्तरशतोपनिषदः, वासुदेवलक्ष्मणपणशीकरः, चौखम्बा विद्याभवन, वाराणसी, २००२.
३. उपनिषत्संग्रहः, श्रीनगेन्द्रप्रसादजैन, मोतिलाल बनारसी दास, दिल्ली, १९७०.
४. उपनिषद्वाक्यमहाकोषः, मोतिलाल वनारसी दास, दिल्ली, १९६३.
५. कठोपनिषद्, गीताप्रेस, गोरखपुर, २०१०.
६. छान्दोग्योपनिषद्, गीताप्रेस,गोरखपुर, २०१०.
७. दार्शनिकनिबन्धाः, डॉ. सुकान्तकुमारसेनापतिः, मान्यता प्रकाशन, दिल्ली, २०११.
८. भारतीयदर्शन, डॉ. उमेशमिश्रः, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ, २००३.
९. भारतीयदर्शन, बलदेव उपाध्याय, शारदा मन्दिर,वाराणसी, २००९.
१०. महाभारतम्, भगवान् व्यासः, गीताप्रेस, गोरखपुर, २००३.
११. वेदान्तसारः, सदानन्दयतिः, चौखम्बा विद्याभवन, वाराणसी, २००२, (विद्वन्मनोरञ्जिनी टीका)।
१२. श्रीमद्भगवद्गीता, भगवान् व्यासः, गीताप्रेस, गोरखपुर, २००९.

 ISBN: 978-81-930770-3-0

# संस्कृतमधीयानानां छात्राणां विकासाय शब्दशास्त्रस्योपयोगिता

**डॉ. नितेशकुमारद्विवेदी***

**शोधपत्रसारः-**

संस्कृतम् भारतस्य प्रतिष्ठाय परममावश्यकम् वर्तते। तद्यथा भारतस्य प्रतिष्ठे द्वे संस्कृतम् संस्कृतिस्तथा। पत्रेऽस्मिन् संस्कृतभाषाया प्रयोजनपुरस्सरं शब्दशास्त्रस्यानिवार्यत्वस्य विवेचनम् वर्तते। पाणिनिरचितव्याकरणशास्त्रे प्रक्रियांशदर्शनांशविषयमधिकृत्य विचारोऽत्र वर्तते।

**शोधपत्रम्-**

साम्प्रतम् व्याकरणम् पाणिनिव्याकरणस्यैव बोधकम् भवति। यथा महाभाष्यपदेन पतञ्जलिरचितम् व्याकरणभाष्यम् गृह्यते। तद्वत् संस्कृतव्याकरणपदेन पाणिनिरचितव्याकरण-स्यैव ग्रहणम् भवति। संस्कृतभाषा इत्यनेन या भाषा संस्कृता परिष्कृता वर्तते। तस्या एव ग्रहणम् वर्तते। भारते अष्टादशविद्यानामुल्लेखो प्राप्यते।

**अङ्गानि चतुरो वेदाः मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश॥**
**आयुर्वेदो धनुर्वेदः गान्धर्वश्चैव ते त्रयः।**
**अर्थशास्त्रं चतर्थन्तु विद्या ह्यष्टादशैव ताः॥**
**षडङ्गानि ब्राह्मणेन निष्कारणो धर्मः**
**षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति।

पतञ्जलिस्तु - **छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते।**
**ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

षडङ्गेषु मध्ये मुखं व्याकरणं स्मृतम्। प्रधाने च कृतो यत्नः फलवान् भवति इति मत्वा व्याकरणस्याध्ययनं नूनं कर्तव्यम्। नागेशेनापि कथितम्- **श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम्**[2]। अर्थात् पाणिनिव्याकरणस्यैव वेदाङ्गत्वम्।

साम्प्रतम् विश्वविद्यालयेषु प्राचीनव्याकरणम्,नव्यव्याकरणम् इति विभागद्वयम् वर्तते।

**प्राचीनव्याकरणम्-** तत्र अष्टाध्यायी ग्रन्थस्य काशिकाटीका तथा महाभाष्यग्रन्थस्याध्ययनं कर्तव्यम् भवति।

**नव्यव्याकरणम्-** अत्र लघुसिद्धान्तकौमुदी, वैयाकरणसिद्धान्तकौमुदी, प्रौढमनोरमा लघुशब्दे-न्दुशेखरः, परमलघुमञ्जूषा, वैयाकरणभूषणसारः, वाक्यपदीयम्, व्युत्पत्तिवादः इत्यादीनां ग्रन्थानाम् आंशिकसम्पूर्णरूपेण च अध्ययनम् भवति।

**प्राच्यनव्यभेदस्य कारणम्-** बौद्धानामागमनानन्तरं शास्त्रार्थपरम्परायां बृहत्परिवर्तनमभवत्। तत्र नव्यन्यायशैल्या विकासः तथा सर्वत्र तत्प्रभाववशाद् परिष्कारस्य नवीनपद्धतिः प्रादर्भूता।

*सहायकाचार्यः, व्याकरणविभागः ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

 ISBN: 978-81-930770-3-0

प्रकारताविशेष्यता, कार्यताकारणता, कारणतावच्छेदकम्, कार्यतावच्छेदकम् इत्यादीनाम्गौरव-लाघवविचारणायां परमावश्यकानां तत्त्वानां प्रवेशो जातः। तद्रीत्यैव प्रौढमनोरमा लघुशब्देन्दु-शेखरग्रन्थानां रचना जाता। शब्दप्रमाणविषये व्युत्पत्तिवादः भूषणद्वयम्, मञ्जूषात्रयम्, इत्यादिग्रन्थानां पठनाय न्यायशैल्या ज्ञानं नूनमावश्यकम् भवति। वैयाकरणाय अष्टाध्यायीग्रन्थेन साकं वाक्यपदीयभूषणद्वयम्, परिभाषेन्दुशेखरादिग्रन्थानामपि अध्ययनं कर्तव्यम् भवति।

**त्रिमुनि व्याकरणम्-** व्याकरणम् नाम व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्। वि आङ् पूर्वक कृञ् धातोः ल्युट्[3] प्रत्ययो भवति। शब्दानां व्युत्पत्तिः व्याकरणेन भवति। व्याकरण-शास्त्रस्य प्रणेता मुनित्रयं वर्तते।

**पाणिनिः-** व्याकरणशास्त्रस्य प्रवर्तकः तथा माहेश्वरसूत्राण्यवलम्ब्य अष्टाध्यायीग्रन्थस्य रचनाकारः। अनेन महामुनिना तादृशानि व्याकरणसूत्राणि प्रणीतानि। यत्र वर्णेनाप्यनर्थकेन न भवितव्यम् किंपुनरियता सूत्रेण। अतः सूत्रम् न वा सूत्रस्थो वर्ण तत्रानर्थेकन भाव्यम् इति।

**कात्यायनः-** सूत्रकारानन्तरं वार्तिककारस्य स्थानं समायाति। यतो हि सूत्रोपरि वार्तिकानि लिखितानि। तथा हि –

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्तिकमाहुः वार्तिकज्ञाः विचक्षणाः॥**

तद्यथा- ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् इति वार्तिकम् तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रोपरि वर्तते। सवर्णसंज्ञाविधायकेन सूत्रेण ऋवर्णस्य तथा लृवर्णस्य सवर्णसंज्ञा कर्तुम् न शक्यते। अतः वार्तिककारेण वार्तिकं विरचितम्।

**पतञ्जलिः-** व्याकरणशास्त्रे भगवान् पतञ्जलिः त्रिमुनि मध्ये अन्यतमो वर्तते। अष्टाध्यायी-माश्रित्य पतञ्जलिना महाभाष्यं विरचितम्। भाष्यस्य लक्षणन्त्वेवम् वर्तते। भाष्यलक्षणं यथा-

**सूत्रार्थो वर्ण्यते यत्र वर्णैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥**[4]

महाभाष्यम् – श्लोकोऽयं महाभाष्यवैशिष्ट्यं प्रतिपादयति। यथा -

**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**
**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥**[5]

तथोक्तम् पुण्यराजेन- तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशिष्य महाभाष्यमित्युच्यते लोके।

कैयटोऽप्यब्रवीत्- पाणिनीयव्याख्यानभूतत्वेऽपि इष्ट्यादिकथनेन अन्वाख्यातृत्वादस्य इतरभाष्यवैलक्ष्येन महत्त्वम्। दर्शनग्रन्थाः अपि व्याकरणशास्त्रे वर्तमानाः भवन्ति।

**वाक्यपदीयम्-** व्याकरणशास्त्रे ग्रन्थोऽयम् महता सम्मानेन परिगण्यते। भाषाविज्ञानविषये ग्रन्थस्य विशिष्टस्थानम् वर्तते। ग्रन्थे त्रीणि काण्डानि वर्तन्ते। ब्रह्मकाण्डम्, वाक्यकाण्डम्, पदकाण्डम् च। ब्रह्मकाण्डे ब्रह्मविषयकविचाराः प्रस्तुताः वर्तन्ते। वाक्यकाण्डे वाक्यानां विवेचनमस्ति। अष्टौ वाक्यानि सन्ति। तेषाम् लक्षणं प्रतिपाद्य विस्तरेण विचारोऽस्ति। सिद्धान्तरूपेण प्रतिभा वाक्यार्थः

इति मतमत्र समुल्लसितं वर्तते । पदकाण्डे बहवः समुद्देशाः सन्ति । पदपदार्थविषयो मुख्यतया प्रतिपादितो विद्यते ।

**वैयाकरणभूषणम्-** भट्टोजिदीक्षितेन कारिकाः प्रणीताः। कारिकामाधारीकृत्य श्रीमता कौण्डभट्टेन ग्रन्थोऽयम् विरचितः। यथा ग्रन्थनाम वैयाकरणभूषणमस्ति । तदनुसारेण वैयाकरणसिद्धान्तानां ज्ञानाय ग्रन्थाध्ययनं परमावश्यकम् भवति । अतीव मनोरमया भाषया वैयाकरणसिद्धान्तानां ज्ञानं कर्तुम् शक्यते । मञ्जूषादिग्रन्थानामुपजीव्यभूतो भवति ग्रन्थोऽयम् ।

**वैयाकरणसिद्धान्तमञ्जूषा-** दार्शनिकग्रन्थेषु वैयाकरणानां वाक्यपदीयानन्तरं मञ्जूषाग्रन्थस्य ख्यातिः विश्वप्रसिद्धा वर्तते । न्यायमीमांसादिग्रन्थान् पूर्वपक्षत्वेन समादृत्य ग्रन्थरत्नमिदम् भट्टनागेशेन प्रणीतम् । ग्रन्थेऽस्मिन् अष्टादशप्रकरणानि वर्तन्ते । वर्णस्फोटप्रकरणादारभ्याखण्ड-पदवाक्यस्फोटप्रकरणपर्यन्तम् महान् विचारो वर्तते । अत्र शक्तिः, लक्षणा, व्यञ्जना, धात्वर्थविचारः, निपातसामान्यार्थनिरूपणम्, नञर्थविचारः, एवकारार्थविचारः, तिङर्थविचारः, सनाद्यर्थविचारः, कृदर्थविचारः, नामार्थविचारः, सुबर्थविचारः, समासशक्तिः, क्यजादि-प्रत्यार्थविचारः, तद्धितप्रत्ययार्थविचारः, पदस्फोटनिरूपणम्, वाक्यस्फोटनिरूपणम्, अखण्डपद-वाक्यस्फोटनिरूपणम् नागेशेन नव्यन्यायशैल्यां प्रतिपादितम् वर्तते । इत्थं व्याकरणदर्शनस्य त्रयः पन्थानः प्रक्रियापरिष्कारदर्शनरूपा संक्षेपतोऽत्र निरूपिताः ।

**व्याकरणशास्त्रे शब्दब्रह्म-** व्याकरणदर्शनेऽखिलस्यैव प्रपञ्चस्य शब्दब्रह्मविवर्तरूपताया इहोपपादयिष्यमाणतया पूर्वं मूलभूतं शब्दब्रह्म विमृशामः । व्याकरणदर्शने शब्दब्रह्ममेव तत्त्वम् । इदञ्च शब्दतत्त्वन्न स्थूलशब्दात्मकमपितु तद्विवर्तोपादानभूतं स्वप्रकाशं परमार्थं नित्यं पराख्यं वेदान्तिभिर्ब्रह्मेति यदुद्घोष्यते तदात्मकं । तदुक्तं महाभारते –

**स्वरूपज्योतिरेवान्तः परावागनपायिनी ।**

वाक्यपदीये तदुक्तम् भर्तृहरिणा –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।**[6]

तथा च व्याकरणस्य प्रशंसां प्रतिपादयन् ब्रह्मप्राप्त्युपायेषु प्रधानीभूतोपायः वर्तते । इति प्रतिपादयति वाक्यपदीयकारः -

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ।।**[7]

महाभाष्यकारेण भगवता पतञ्जलिना प्रदीपकारेण महामहोपाध्यायकैयटेन च शब्दस्य ब्रह्मरूपता विस्तृतरूपेण प्रतिपादिता । तदुक्तं पशपशाह्निके महाभाष्ये ।

**चत्वारि श्रृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यां आविवेश ।।**[8]

 ISBN: 978-81-930770-3-0

इति मन्त्रं शब्दब्रह्मपरतया व्याचष्टे भाष्यकारः। अत्र महाभाष्ये महतेति प्रतीकमादाय महता देवेनेत्यस्य परेण ब्रह्मणेति विवरणं कृतं कैयटेन महतेति परेण ब्रह्मणेत्यर्थः। विवर्तपरिणामविषये सदानन्दोऽप्याह –

**अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः।**
**सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः॥**[9]

इत्थम् व्याकरणशास्त्रस्य अतीव माहात्म्यं वर्तते। संस्कृतं भाषा न केवला एका भाषा अपि तु भारतीयानां आत्मा वर्तते। अन्ते वक्तुम् शक्यते यत् ज्ञानप्राप्तये संस्कृतभाषा नूनं पठनीया। संस्कृतव्याकरणमतिरिच्य नास्ति कश्चनापरः पन्थाः इति दिक्।

**<u>सन्दर्भग्रन्थसूची</u>**


1. व्याकरणमहाभाष्यम् प्रकाशव्याख्यानोपेतम् पस्पशाह्निकम्, समीक्षक एवं व्याख्याकारः - डा. जयशङ्करलाल त्रिपाठी, ठाकुरप्रसाद पुस्तक भण्डार, कचौडी गली, वाराणसी 22100.
2. लघुशब्देन्दुशेखरः पृष्ठसंख्या 6, लघुशब्देन्दुशेखरः बैकुण्ठी हिन्दीटीकासमलङ्कृत, व्याख्याकारः संस्कृतवाचस्पति पं.वैकुण्ठनाथशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
3. करणाधिकरणयोश्च 3.3.117.
4. महाभाष्यम् पृष्ठसंख्या 2, व्याकरणमहाभाष्यम् प्रकाशव्याख्यानोपेतम् पस्पशाह्निकम्, समीक्षक एवं व्याख्याकारः - डा.जयशङ्करलाल त्रिपाठी, ठाकुरप्रसाद पुस्तक भण्डार कचौडी गली, वाराणसी 221001.
5. वाक्यपदीयम् 2/485.
6. वाक्यपदीयम् 1/1 पृष्ठसंख्या 2, वाक्यपदीयम् ब्रह्मकाण्डम्, श्रीसूर्यनारायणशुक्लप्रणीत भावप्रदीपव्याख्यानेन समलङ्कृतम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
7. वाक्यपदीयम् 1/11 पृष्ठसंख्या 20,वाक्यपदीयम् संसकृत आंग्ल हिन्दी भाषाटीकोपेतम्, टीकाकारः - वाचस्पति सत्यकाम वर्मा, मुंशीराम मनोहरलाल, नई दिल्ली।
8. महाभाष्यम् पस्पशाह्निक पृ. सं. 30.
9. वेदान्तसार अप. प्र. The Vedantsara of Sadananad together with the commentaries of Nrisimhsaraswati and Ramtirtha published by Pandurang Jawaji, Proprietor of the Nirnay Sagar Press.
10. अष्टाध्यायी अथवा सूत्रपाठपाणिनिकृत www.sanskritdocuments.org

 ISBN: 978-81-930770-3-0

# कालसमीक्षणम्

**डॉ. नवनीतशर्मा***

भारतीयज्ञानविज्ञानपरम्परायां निहितेषु विविधेषु शास्त्रेषु सन्ति नैकानि तत्वानि। तेष्वेव महत्वपूर्णतत्वेषु प्रधानतमं कालतत्वं **''कालः पचति भूतानि''**[1] इति भगवद्वचोभि उभयोः लोकयोः कालस्य महन्महत्वं द्योत्यते। एष एव कालः दर्शनेषु तत्वरूपः पुराणेषु यमरूपः गणिते च परिमाणरूपः वरीवर्ति। शब्दशास्त्रदृष्ट्या तु **कलिसंख्याने**[2] इत्यस्माद्धातोः **''पचाद्यच्''**[3] इति सूत्रेण अण् प्रत्यये कृते काल शब्दो निष्पद्यते। अर्थात् **कलयति सर्वाणि भूतानि असौ कालः**[4] क्षण-दण्ड-मुहूर्त-प्रहर-दिन-रात्रि पक्ष-मासायन-वत्सरादय इत्येते काल इति **दुर्गादासः**[5] अमरकोषे तु **''जन्यानां जनकः कालो जगतामाश्रयो मतः''**[6] इत्युक्त्या कालस्य जगदाधारत्वं प्रतिपादितं पुराणेषु साक्षाद्विष्णुरूपः काल इति दृढतया प्रतिपादितमित्थं वर्तते। यथा-

**परस्य ब्रह्मणो रूपं पुरुषं परमं द्विजः।**
**व्यक्ताव्यक्ते तथैवान्ये रूपे कालं तथापराम्**[7] ।।

प्रायेण सर्वेषु भारतीयदर्शनेषु कालस्य पदार्थत्वं स्वीकृत्य विशद् विवेचनं प्राप्यते। आधुनिके समवाये तु कालशब्दः परिमापक एव वर्तते। संस्कृतसाहित्ये विविधासु कृतीसु पृथक्-पृथक्तया कालशब्दस्य निवेशो दृश्यते। अभिज्ञानशाकुन्तले तु महाकविना कालिदासेन **''ये द्वे कालं विधत्तः''**[8] इत्यादिना सूर्यचन्द्रौ कालस्य नियामकौ विद्येते इति प्रतिपादितः। आचार्यनारायणपण्डितेन कालस्य नित्यत्वमित्थं द्योतितम् -

**नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि।**
**कुशाग्रेणैव संस्पृष्टः प्राप्तकालो न जीवति**[9] ।।

**वैदिकवाङ्मये कालनिरूपणम्-** विपुले वैदिकवाङ्मये चतुर्षु वेदेषु अष्टादशपुराणोपपुराणेषु संहिताब्राह्मणारण्यकेषु ग्रन्थेषु विविधेषु निगमागमेषु च कालविषयिणी सूक्ष्मतमा दृष्टिरवलोक्यते ऋग्संहितायां विश्वाधारः कालः तन्नियामकश्च सूर्य इति अस्थवामीये सूक्ते निगदितो विद्यते। अथर्वसंहितायां तु परमात्मरूपो कालः वर्णितोऽस्ति। वेदसारभूते उपनिषदि निकर्षतया कालस्योत्पत्तिमत्वेन तस्य विनाशित्वमनित्यत्वमस्वतन्त्रं च भाषितम्। दार्शनिकेषु समवायेषु सांख्ये त्रयाणां गुणानां सत्वरजस्तमसां तिस्रश्शक्तय अतीतवर्तमान्भविष्यत्कालरूपाः प्रतिपादिताः।

प्रायेण दार्शनिकदृष्ट्या कालविषयकं न हि किमपि गण्यमन्तरं वर्तते शब्दशास्त्रे महाभाष्यकारेण भगवता पतन्जलिना तु-

**''येन मूर्तीनामुपचयापचयाश्च लक्ष्यन्ते तं कालमाहुः''**[10]।

वाक्यपदीयकारेणेदमेवतथ्यमित्थं संकेतितम्-

**उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्।**
**निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम्**[11] ।।

---

*सहायकाचार्यः, ज्योतिषविभागः, ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

 ISBN: 978-81-930770-3-0

वेदान्तधिया ब्रह्मणः विशिष्टा क्रियाशक्तिः कालरूपा। आगमे हि मायया काल उत्पद्यत इति प्रमाणम्। यथा- **रागरवृध्णा, परिच्छितिरायुषा काल उच्यते।**

**नियतिः परतन्त्रत्वमेतैर्युक्तिस्तु पुरुषः**[12] **॥**

पुनश्च- **व्यापारव्यतिरेकेण कालमेकं प्रचक्षते।**

**नित्यमेकं विभुद्रव्यं परिमाणं क्रियावताम्॥**

**दृष्टिप्रस्थसुवर्णादिमूर्तिभेदाय कल्पते।**

**क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका**[13] **॥**

केषुचिदागमेषु विशेषेण वीरशैवागमे पाशुपतागमे च पदार्थेषु कालस्य गणना कृता विद्यते। संहितास्मृतिपुराणादिषु बहुत्र च कालस्याव्यक्तत्वं बहुत्र च व्यक्तत्वं कल्पितं यथा हि महाभारते-

**कालस्य विभागांश्च पह्तन अमनादीश्च।**[14]

शान्तिपर्वणि कालविषये व्यासोक्तिः संकेतयति कालं बलं न ग्रसति किं वा काल एव बलं ग्रसति। तद्यथोक्तम् -

**कालो गिरति विज्ञानं कालं बलमिति श्रुतिः।**

**बलं कालो ग्रसति तु तं विद्या कुरुते वशे**[15] **॥**

आधुनिकदृष्ट्या कालस्वरूपविषये पाश्चात्यपरम्परायां भौतिकविज्ञानदृष्ट्या कालस्य परिभाषा एतादृशी विद्यते – “Time is a measure in which events can be ordered from the part through the present into the future, and also the measure of educations of lucent and the intervals between them”[16]. अस्यायमेव आशयो यत् भूतभविष्यत्वर्तमानादीनां कालाश्रयाणां सापेक्षता येन सह विद्यते सैव कालः। अथ कालस्वरूपवर्णनानन्तरं तत्समीक्षणं ज्योतिषशास्त्रीयदृशा विविधशास्त्रसम्मतं प्रतिपाद्यते।

**ज्योतिषशास्त्रे कालस्वरूपं तद्वैशिष्ट्यसमीक्षणञ्च-**

आचार्यभास्करेण स्वकृतौ शिरोमणौ आदावेव ज्येतिषशास्त्रस्य सार्वभौमिकी परिभाषा विस्तृततया प्रतिपादितेत्थम् -

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**

**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्**[17] **॥**

‘‘तस्मादिदं कालविधानशास्त्रम्’’ इत्युक्त्या आचार्यलगधोऽपि वेदाङ्गज्योतिष इत्येवोवाच। जानीमो वयं यच्छास्त्रस्यास्य सिद्धान्त-संहिता-होरारूपाः त्रयोऽपि स्कन्धाः कालाश्रिता एव। सिद्धान्ते ग्रहगतियुतिस्थित्यादीनां गणितीयविवेचनं कालासापेक्ष्यमेव, किञ्च तज्जन्यं शुभाशुभं फलं कालाधीनमेवातः ज्योतिषशास्त्रं कालशास्त्रमपि वक्तुं पार्यते। अस्मादेव कारणात् ज्योतिषशास्त्रीयसिद्धान्तग्रन्थेषु आदिमे मध्यमाधिकारे प्रथम एव प्रधानविषयः कालसंज्ञकः। तत्र शास्त्रेऽस्मिन् निम्नलिखितयोः द्विविधयोः कालस्य चर्चाऽवलोक्यते। यथा -

१) अन्तःकृत्कालः (यमः)। २) कलनात्मककालः (गणनात्मकः) च।

 ISBN: 978-81-930770-3-0

भगवतो अनन्तस्य अविकृतत्वं यथा सृष्ट्युत्पत्तिकाले लयकाले भवति तथैव कालस्यापि स्थितिर्विद्यते। यथा हि भगवति अनन्ते विलीने लीने वा न हि किमप्यन्तरं भगवति विष्णौ समुत्पद्यते तथैव खहरराशावपि कयापि गणितीयप्रक्रियया भेदो न समायाति। अत्र हि काल शब्दस्य उत्पत्तिवाचकत्वं सिद्ध्यति। तच्चोक्तमाचार्यैः -

**अस्मिन् विकारः खहरे न राशावपि प्रविष्टेष्वपि निस्सृतेषु।**
**बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत्**[18] **॥**

तथापि ज्योतिषे कालशब्दो गणनात्मक एव तद्धि सूर्यसिद्धान्ते भगवदंशैरुक्तं यत्-

**लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।**
**स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते**[19] **॥**

प्रथमस्तु अन्तकृत्कालः यमरूपः सर्वभूत्संहारकश्च अतोऽस्य कालस्य साधनं गणितीयदृशा कर्तुं न पार्यते। अन्यः कलनात्मकः गणनात्मको वा कालः यमाश्रित्य इह जगति अतीतादीनां व्यवहाराः सिध्यन्ति। अतोऽयं कालः ग्रहगणितप्रक्रियायामपि महत्वपूर्णः। ग्रहगतिस्थितियुति-प्रभावादीनां ज्ञानेन्द्रियागोचरत्वात् सापेक्षकालस्य ज्ञानं परमावश्यकम्। इदमेवावधार्य भारतीयज्योतिषशास्त्रीय ग्रहगणितपरम्परायां कालस्य मूतामूर्तभेदेन द्वैविध्यं प्रकल्पितम्। तच्च मूर्तकालः स्थूलः अमूर्तश्च सूक्ष्मः उत वा स्थूलः व्यवहार योग्यः इन्द्रियगम्यः मूर्तः महत्वपूर्णश्च एवमेव सूक्ष्मः व्यवहारार्ह इन्द्रियागम्य अमूर्तसंज्ञकः।

**मूर्तामूर्तकालयोस्स्वरूपसमीक्षणम्-**

अथामूर्तकालसमीक्षणं गणितीयदृशा तु त्रुट्यादितः समारभ्य प्राणपर्यन्तं यः कालावयवः सोऽमूर्तसंज्ञकः। तत्र त्रुटितः समारभ्य प्राणपर्यन्तं कालयात्रा नारदेनेत्थं संकेतिता-

**सूच्याभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।**
**तच्छष्ट्या रेणुरित्युक्तो रेणुषष्ट्या लवः स्मृतः॥**
**तत्षष्ट्या लीक्षकं प्रोक्तं तत्षष्ट्या प्राण उच्यते**[20] **।**

समीक्षणदृशा आरोहक्रमेणानया रीत्या प्रतिपादयितुं शक्यते यथा -

सूचीपद्मपत्रभेदनकालः = १ त्रुटि, ६० त्रुटयः = १ रेणुः
६० रेणवः = १ लवः, ६० लवाः = लीक्षकम्
६० लीक्षकाणि = १ प्राणः

अमूर्तकालमानानामाधुनिकेन कालमानेन सह समीक्षणेन एते निष्कर्षाः समुपलभ्यन्ते, तद्यथा -

सूचीपद्मपत्रभेदनकालः· = १/३२४०००० सैकेण्डमितानि
६० त्रुटयः = १/५४००० सैकेण्डमितानि, ६० रेणवः = १/९०० सैकेण्डमितानि
६० लवाः = १/१५ सैकेण्डमितानि, ६० लीक्षकाणि = ४ सैकेण्डमितानि
१ प्राणः = ४ सैकेण्डमितानि

 ISBN: 978-81-930770-3-0

अन्तकृतकालविषये सुधावर्षिणिकारेण म. म. सुधाकरद्विवेदिना प्रोक्तं यत् - "**लोकानां प्राणिनामन्तकृत् नाशकर्ता एकः कालो यमराजानुयायी प्रसिद्धः कालदण्डाद्यमो दण्डमिति मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशतिकावचनात्**" ।[21]

वस्तुतस्तु समीक्षणेनेदं ज्ञायते यत् यस्य कालस्य ज्ञानं व्यवहारेणैव ज्ञानेन्द्रियैः यन्त्रादिना गणयितुं शक्यते सोऽमूर्तः । पुराकाले आचार्यैः कथं सूक्ष्मकालस्य गणना सम्पादिता इति विचार्यमाणे सति परम्पराऽवलोकनेन ज्ञायते यत् योगशक्त्या "**यत्पिण्डे तद्ब्रह्माण्डे**" इति नियममाश्रित्य योगबलेनैवामूर्तकालस्य बोधः तैर्विहितः।

सिद्धान्तलक्षणप्रतिपादने त्रुट्यादिप्रलयान्तकालकलना इत्यस्मिन् लक्षणेऽपि द्योत्यते इदं यत् त्रुटिकालज्ञानविधिरपि प्राचीनतमः । प्रभाटीकाकारेण मुरलीधरठक्कुरेण भणितमिदं यत्- "त्रुट्यादिप्रलयान्तकालकलने" इत्यादिसिद्धान्तलक्षणे त्रुटिकालपूर्वकप्रलयान्तावधिकालस्य विभागकरणं समुचितमिति विविच्य जितेन्द्रियपुरुषस्य नेत्रपक्ष्मपात्कालेन तथा तस्य दशगुर्वक्षरोच्चारणकालेन च तत्स्वरूपं प्रतिपाद्यते ।

**अथ मूर्तकालसमीक्षणम्** - व्यवहारिको कालः मूर्तकालसंज्ञकः किञ्च प्राणादिर्यस्य सः मूर्त्तकालः । मूर्तकालः स्थूलत्वात् गणयितुं शक्यते । तदुच्यते विषयेऽस्मिन् सौरसिद्धान्ते "**प्राणादिः कथितो मूर्तः त्रुट्याद्योऽमूर्तसंज्ञकः**"[22] विषयेऽस्मिन् भास्करोऽपि जगाद-

**योऽक्ष्णोर्निमेषस्य खरामभागः स तत्परस्तच्छतभागयुक्ता ।**
**त्रुटिर्निमेषैधृतिभिश्च काष्ठाः...................... ।।**[23]

श्लोकेनानेन मूर्तकालगणनपरम्पराऽवलोक्यते तद्यथा-

निमेषः जितेन्द्रियपुरुषस्य नेत्रपक्ष्मपातकालः ।

निमेषः/३० = तत्परः, तत्परः/१०० = त्रुटिः, १८ निमेषाः = काष्ठा,
३० काष्ठाः = १ कला, ३० कलाः = नाक्षत्रीयघटिका, २ घट्यौ = १ क्षणः,
३० क्षणाः = दिनम्, ६० घटिकाः = १ अहोरात्रम्

प्रायेण सर्वेषु सिद्धान्तग्रन्थेषु इयमेव कालगणनारीतिः विद्यते । तत्र मूर्तकालगणनाप्रसंगे गर्गाचार्यस्य मतं किञ्चिद् भिन्नं दृश्यते-

**अक्षिक्षेपपरिक्षेपो निमेषः परिकीर्तितः।**
**द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः।।**
**द्वौ लवौ क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः।**
**त्रिंशत्काष्ठा कला प्रोक्ताः कलास्त्रिंशन्मुहूर्त्तकः।।**
**ते तु त्रिंशदहोरात्रमित्याह भगवान् हरः।**[24]

श्लोकनिर्देशानुसारं गणनेत्थं सरलीक्रियते -

२ निमेषौ = १ त्रुटिः, २ त्रुटी = १ लवः, २ लवौ = १ क्षणः, १० क्षणाः = १ काष्ठा
३० काष्ठा = १ कला, ३० कलाः = १ मुहूर्त्तम्, ३० मुहूर्तानि = १ अहोरात्रम्

 ISBN: 978-81-930770-3-0

वेदाङ्गज्योतिषे तु समेषां मूर्तकालमानानां काष्ठाघटिकादीनां वर्णन दृश्यते। याजुष्ज्योतिषे विवृतमाचार्येण यथा हि -

**कलादश सविंशा स्याद् द्वे मुहूर्त्तस्य नाडिके।**
**द्वित्रिशस्तत्कलानां तु षट्शतीभ्यधिका भवेत्॥**
**ससप्तैकं भयुक् सोमः सूर्यो द्यूनि त्रयोदश।**
**अन्तमानि तु पञ्चाङ्गः काष्ठा पञ्चाक्षरा भवेत्॥**[25]

समीक्षणेन ज्ञायते यत् भास्करीयकाष्ठमानं ४ गुर्वक्षरोच्चारणकालः वर्तते। वेदाङ्ग-ज्योतिषे तु पञ्चगुर्वोक्षरोच्चारणकालः काष्ठाप्रमितः अतोऽत्र निष्कर्षोऽयं यत् भास्करकाष्ठामानतः वेदाङ्गज्योतिषोक्तं काष्ठमानं गुर्वक्षरेणाधिकमस्ति। एतस्माद् कारणात् भास्करीयकलातः वेदाङ्गज्योतिषोक्तकलायामपि किञ्चिदन्तरमापतति। आधुनिकप्रमाणेन तु मध्यमगत्या पञ्चगुर्वक्षराणामुच्चारणकालो सेकण्डमितः, अतः भास्करीयकालमानानि ग्रहगणितरीत्या सूक्ष्मासन्नीति भृशं विवेचितं भगणसमीक्षायां झामहोदयैः।

**पाश्चत्यमतानुसारेणामूर्तकालस्य व्यवहारमानानां समीक्षणम्-**

सम्प्रतिभारतीयकालगणनयां पाश्चात्यकालगणनया सह सम्बन्धविचारः क्रियते चेदेते सम्बन्धाः समानिष्क्रीयन्ते यथा-

ज्योतिषशास्त्रीयकालमानानि आधुनिककालमानानि च। यथा -

१ प्राणः = ४ सैकण्डमितानि

१ पलम् = २४ सैकण्डमितानि

२.५ पलानि = ६० सैकण्डमितानि = १ मिनटमितम्

१ विपलम् = २/५ सैकण्डमितानि

१नाड़ी = २४ मिनटमितानि

६० नाड्यः = २४ घण्टामितानि

३० अहोरात्राणि = १ मासः

१२ मासाः = १ वर्षम्

३६० दिव्य-अहोरात्राणि = १ दिव्यवर्षम्

१२००० दिव्यवर्षाणि = १ दिव्ययुगम् = १ महायुगम् = ४.३२ X १०$^{६}$ वर्षाणि

७१ दिव्ययुगानि = १ मन्वन्तरम् = ३.०६७२ X १०$^{८}$ वर्षाणि

१४ मन्वन्तराणि = १कल्प = ४.३२ X १०$^{९}$ वर्षाणि

२ कल्पौ = १ ब्राह्म अहोरात्रम् = ८.६८ X १०$^{९}$ वर्षाणि

३६० ब्राह्मदिनानि = १ ब्राह्मवर्षम् = ३.११०४ X १०$^{१२}$ वर्षाणि

५० ब्राह्मवर्षाणि = १ पराधर्म् = १.५५५२ X १०$^{१४}$ वर्षाणि

 ISBN: 978-81-930770-3-0

ब्रह्मणः पूर्णायुः = २ परार्धम् = ३.११०४ X १०^१४ वर्षाणि

कालगणनाया एषैव पद्धतिः संकेतिततया पुराणेषु महाभारते स्मृतिग्रन्थेषु च द्योतितं विद्यते।

**नवविधकालमाननां निरूपणं समीक्षणञ्च-**

मूर्तकालस्यैव व्यावहारिकदृष्ट्या ग्रहगणितीयदृष्ट्या धर्मशास्त्रीयदृष्ट्या च नवधा विभाजनं विधत्तं दृश्यते । तानि च नवविधकालमानानि सर्वैराचार्यैः समान्यैव अनुमोदितानि । तद्यथा भगवदुक्तिः –

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यञ्च गौरवम् ।**
**सौरञ्च सावनं चान्द्रमार्क्षमानानि वै नव ।।**[26]

एषु नवविधकालमानेषु चतुर्णां सौरचन्द्रनाक्षत्रसावनानामेव व्यवहारे प्रयोगो दृश्यते । उपरोक्तेषु व्यावहारिकमानेषु चर्तुषु लघुतमं चान्द्रमानं महत्तमञ्च सौरमानम् । परं नवविधकाल-मानेषु ब्राह्ममेव चान्द्रमानं महत्तमञ्च सौरमानम् । परं नवविधकालमानेषु ब्राह्ममेव गुरूतमम् । एवमारोहक्रमेण चान्द्रं नाक्षत्रं सावनं सौरं पैत्र्यं गौरवं प्राजापत्यं ब्राहञ्च नवमानानि सिद्ध्यन्ति । एतेषां नवमानानां कालप्रमाणं भिन्नं भिन्नं दृश्यते । परन्तु चतुर्णां व्यावहारिककालमानानां स्वजातीयत्रिंशद्दिनानां मासः मासैर्द्वादशभिर्वर्षं भवतीति सर्वसिद्धान्तनियमः ग्रहसाधनप्रक्रियायां विद्यते । ग्रहभगणाः ब्राह्ममानसापेक्षाः अयनज्ञानं दिव्यमानसापेक्षं ग्रहगतिस्तु सावनसापेक्षा मासप्रवृत्तिस्तु चान्द्रमानसापेक्षा घटिकादि-व्यवहारस्तु नक्षत्रसापेक्षमिति सिद्धान्तसम्मतं मतम् ।

**चन्द्रमानसमीक्षणम्-** सूर्यसापेक्षं चन्द्रगत्यानुवर्तितं मानं चान्द्रमानम् । पूर्वदिशि गतिमतोः सूर्यचन्द्रयोः प्रतिद्वादशांशात्मकमन्तरं चान्द्रतिथितुल्यमेतदेव चान्द्रमानमिति । **''दर्शः सूर्येन्दुसंगमः''** इति परिभाषया **''रवीन्दोर्युतेस्संयुतिर्यावदन्या विधोर्मास एतच्च पैत्र्यं द्युरात्रम्''** इति भास्करोक्त्या च सूर्यचन्द्रयोर्योगेन चान्द्रमासः किञ्च तयोः द्वादशांशात्मक-मन्तरेण चान्द्रदिनं ज्ञेयम् । यथा हि सूर्यसिद्धान्ते -

**अर्काद्विनिस्सृतः प्राची यद्यात्यहरहः शशी ।**
**तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः ।।**[27]

सैद्धान्तिकदृष्ट्या तु चन्द्रबिम्बकेन्द्रोपरिगतं कदम्बप्रोतवृत्तं सूर्यबिम्बकेन्द्रगतं भवति तदानीं दर्शान्तः । सूर्यगतेरपेक्षया चन्द्रगतेरधिकत्वात् दिनानुदिनं द्वादशांशात्मकमन्तरमुत्पद्यते । एवं चक्रभोगेन पुनः दर्शान्तः तदैव चान्द्रमासोत्पत्तिर्जायते ।

अथ चतुर्णां व्यावहारिककालमानानां परस्परं कश्चन अन्तस्संबन्धो विद्यते । सौरचान्द्र-मासानामन्तरमधिमासाः दिनानामन्तरञ्चाधिदिनानि । दर्शान्ततो दर्शान्तं यावत् संक्रान्त्युपल-क्षिताः मासाः ग्राह्याः भवन्ति । एकस्मिन् चान्द्रमासे ३९/३१/५०/७ सावनदिनानि प्रजायन्ते । अतोऽनुपातेन चान्द्रवर्षे ३५४.२२ सावनदिनानि भवन्ति । सूक्ष्मेक्षिकया विचार्यमाणेन

 ISBN: 978-81-930770-3-0

प्रतिसिद्धान्ते चन्द्रगतौ कलावैलक्षण्यात् कल्पीयचान्द्रदिनानां संख्या भिन्ना भिन्ना प्राप्यते। तद्यथा –

| **सिद्धान्तः** | **चान्द्रदिनोदयः** |
|---|---|
| वेदाङ्गज्योतिषमते | १६०७०४०००० |
| प्रथमार्यभटमते | १६०३००००८० |
| ब्रह्मगुप्तमते | १६०२९९९००० |
| नीलकण्ठमते | १६०२९९९६९६३ ’ |
| द्वितीयार्यभटमते | १६०३००००२० |
| पराशरमते | १६०३००००३५४५. |
| पञ्चसिद्धान्ते रोमकमते | १६०२९४७३६८४२१. |
| सिद्धान्तराजमते | १६०२९२९०६८९५०. |
| सूर्यसिद्धान्ते | १६०३००००८० |
| सिद्धान्तशिरोमणौ | १६०२९९०००००६ |

समीक्षणदृशा विचार्यमाणे सति वेदाङ्गज्योतिषमतं किञ्चिद् स्थूलं वरीवर्ति। सौरमतं तु सूक्ष्मासन्नं तत्सममेव सोमवाशिष्ठब्राह्मादीनां मतमपि विद्यते। व्यावहारिकप्रयोजनदिशायां यथा -

**तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा।**
**व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते॥**[28]

आचार्यभास्करोऽपि तदेव समर्थयति- **मासास्तथा च तिथयस्तुहिनांशुमानात्।**[29]

**नाक्षत्रमानसमीक्षणम्-** नक्षत्राणां प्रवहवायुवेगेन नित्यभ्रमणात् स्वकीया गतिर्नास्ति। अतः न क्षरति इति नाक्षत्रं इत्युक्तम्। भास्करेण तु भवासर एव भभ्रमो निरुक्तः। वासनाभाष्येऽपि **''भभ्रमो नक्षत्रसावनमिति''** उल्लेखः कृतः। सौरोक्त्याऽपि नाक्षत्रदिवसस्यार्थे भोदय इति शब्दस्य प्रयोगो दृश्यते। प्राचीनाचार्यैः नक्षत्राणां स्वकीया गतिर्नास्तीति विचारे नवीनानां सम्मतिर्न दृश्यते। अतस्तैः प्रकारत्रयेण नक्षत्राणां गतिरुक्ता। तच्च यथा-

1. भचक्रचलनात्प्रथमा निरपेक्षागतिः।
2. अयनचलनाद्द्वितीयागतिः।
3. स्वकीयगत्या तृतीया सापेक्षा च गतिः।

उपर्युक्तेगतित्रये प्राचीनार्वाचीनाचार्याणां मतैक्यता दृश्यते परं च सापेक्षगतिविषये अर्वाचीनैः वेधेन ज्ञायते स्म। अत्र निरपेक्षसापेक्षयोः गतिवशादुत्पन्ननाक्षत्रगत्योरन्तरस्य अत्यन्तं सूक्ष्मत्वान्मुनीश्वरेण तयोः समतैवाङ्गीकृता।

नक्षत्रदर्शनाय गर्भीयक्षितिजज्ञानमावश्यकं वर्तते। गर्भीयक्षितिजस्य नक्षत्राणां वेधेऽपि प्रकाशस्य वर्तननियमेन यथा सूर्योदयात्प्रागेव स्पष्टोदयो भवति। अतः नूतनाः वसन्तसम्पातस्य

 ISBN: 978-81-930770-3-0

याम्योत्तरवृत्तेन सह प्रथमसंयोगादपरसंयोगपर्यन्तं नाक्षत्रदिनमामनन्ति । महायुगीयनाक्षत्रदिनानि विभिन्नाचार्याणां मतेषु निम्नलिखितानि भवन्ति यथा -

वेदाङ्गज्योतिषे - १५८५४४००००

पञ्चसिद्धान्तान्तर्गते सूर्यसिद्धान्ते - १५८२२३४८००

रोमकसिद्धान्ते - १५८२१८५६००

पौलिशसिद्धान्ते - १५८२२३६००

वर्तमानसिद्धान्तपञ्चके - १५८२२३४८२८

ब्रह्मगुप्तभास्करादयः - १५८२२३६४५०

आर्यभटप्रथम वटेश्वरश्च - १५८२२३४५००

नीलकण्ठमते - १५८२२३४५४२

सिद्धान्तराजमते - १५८२१६७७४८.१०१

**सावनमानसमीक्षणम्-** तत्र यज्ञविशेषसम्बन्धिनं कालं सावनम् । तच्च ज्योतिर्विद्भिः रवेः उदयादुदयं यावन्मानं कुदिनं सावनं वा निगद्यते । तत्र मध्यमसावनमपि उदयान्तरसंस्कृतं संस्कृतभेदात् स्पष्टं जायते । एवं स्थानवशाद् ग्रहाणां सावनत्रयं सिद्धान्ते सञ्जायते परञ्च सूर्यं विहायान्येषां ग्रहाणां स्थितिस्तु विमण्डले भवतीत्यतः तेषां बिम्बीयसावनं चतुर्विधं सूर्यस्य च स्थानबिम्बयोः अभेदत्वात् त्रिविधं सावनं विद्वद्भिस्समीक्षितम् ।

कियन्मितं कालो सावनमिति विचारे कल्पिते कदाचिद् एकस्मिन्दिने रविः केनचिन्न-क्षत्रेण सह भ्रमणे प्रवृतः युगपदेवोदयक्षितिजे समागत्य ततः प्रत्यक् चलनप्रवहवायुवेगेन षष्ट्या घटीनां चलनेन नक्षत्रं तु पुनः उदयक्षितिजं प्राप्यते परञ्च रविः प्राक्चलनात् क्षितिजादधः स्वगतितुल्यान्तरे तिष्ठति । अतः भोदयान्तरात् यावता कालेन सूर्योदयो जातः तेन युक्तं नाक्षत्रीयषष्टिघटीमानं सावनं भवति ।

अथ चैकस्मिन् सौरवर्षे सावनदिनानां ज्ञानाय भास्कराचार्यरीत्या विचारिते सति सावन-दिवसोपपत्तौ वासना भाष्ये- **''अथ समायां भूमावभीष्टकर्कटेन त्रिज्या''** इत्यनया रीत्या एकस्मिन्सौरवर्षे सावनदिवसानां संख्या ३६५/ १५/३०/२२/३० घट्यादयः मानं प्राप्यते । ततोऽनुपातो विधीयते यद्यैकेन वर्षेणैतावन्ति कुदिनानि तदा कल्पवर्षैः किमिति । एवं लभ्यन्ते कल्पेष्टसावनदिवसाः ।

**स्फुटसावनम्-** तत्र स्फुटरविवशेन गतिकलोत्पन्नासून् संसाध्य नाक्षत्रमानयोजनेन स्पष्टरवि-सावनम् । तच्च प्रतिक्षणविलक्षणात् गणितानुपयोगी । रवेः स्फुटगतिकलाः क्रान्तिवृत्ते तिष्ठन्ति कालमापनं तु नाडीवृत्तो भवति । अतस्स्फुटगतिकलोत्पन्नासून् नाक्षत्रीयासु संयोज्य स्फुटसावनं भवति ।

**मध्यमस्फुटसावनम्-** मध्यमस्फुटसावनज्ञानाय रवेर्मध्यमगतिकलोत्पन्नासूनां नाक्षत्रीयनाडीघटी षष्टियोगेन प्राप्तिः । रवेः दैनिकमध्यमगतिकलानां समत्वेऽपि प्रतिराशिजन्यासूनामन्तरेण तदुत्पन्न-कालानामासुत्वोपलब्धेः अनुपातः क्रियते चेत्-

 ISBN: 978-81-930770-3-0

$$\frac{\text{स्वोदयासवः x मध्यमगतिकलाः}}{\text{१८००}} = \text{मध्यमगतिकलोत्पन्नासवः}$$

इदं सावनं स्फुटस्वरूपकत्वान्मध्यमगतेरुत्पन्नत्वाच्च स्फुटमध्यमसावनं ज्ञायते।

**मध्यमसावनम्-** मध्यमरविः मध्यमगत्या नाडीवृत्ते क्रान्तिवृतीयमध्यमगतिकलासमानासुभिः तिष्ठति । कालगत्योरेकत्रैव परिनिष्ठितत्वात् । भारतीयमतानुसारं मध्यमसावनमानं २१६५९ अस्वात्मकं भवति। एवमनुपातेन युगीयकल्पीय वा मध्यमसावनमानं ज्ञातुं पार्यते। विभिन्ना-चार्याणां युगीयसावनदिवसाः -

वेदाङ्गज्योतिषमते - १५८११२००००

पञ्चसिद्धान्तिकायाः सूर्यसिद्धान्ते - १५७७९१७८००

पञ्चसिद्धान्तिकायाः पौलिशसिद्धान्ते - १५७७९१६०००

ब्रह्मसिद्धान्तसम्राटसिद्धान्तादिषु - १५७७९१७८२८

प्रथमार्यभटमते वटेश्वरमते च - १५७७९७५००

नीलकण्ठमते - १५७७९१७८३९.५

सिद्धान्तराजमते - १५७७८४७७४८.१०१

एतेषु प्राचीननवीनसौरमानयोः किञ्चिदन्तरमायाति । अतः वराहवचनं समीचीनमेव प्रतिभाति। नवीनास्तु सूक्ष्मयन्त्रवेधेन सौरमानादपि सूक्ष्मवर्षमानं साधयन्ति। वेधजन्यं वर्षमानं ३६५/१५/२२.९ दिनात्मकं भवति। मानमेतद् सौरवर्षमानात् ८ १/२ सार्द्धष्टपलैर्दीर्घतरं सूक्ष्मञ्च भवति।

**सौरमानसमीक्षणम्-** सूर्यस्य क्रान्तिवृत्तगत्या अंशैकचलनेनैकं सौरदिनम्। सूर्यः स्वपूर्वगत्या अश्विन्यादितः समारभ्य पुनर्यदा तद्बिन्दुमागच्छति तावत्कालं एकसौरवर्षमिति मन्यते। सूर्यस्यैक-चक्रभ्रमणवशाद् सौरवर्षमुत्पद्यते। यथोक्तं भास्करेण शिरोमणौ तद्धि **''रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्''**।

**चलस्थिरसौरयोस्समीक्षणम्-** सिद्धान्ते चक्रशब्देन द्वादशराशेर्ग्रहणं भवति। तस्यैको भोगकालः सौरवर्षतुल्यः। तच्च सिद्धान्ते द्विधा विचार्यते प्रथमं तु नाडीक्रान्तिवृत्तयोः सम्पातस्य चलनेन चलमेषादिः अपरञ्च रेवतीतारायाः क्रान्तिवृत्ते स्थितरत्वात् तत्प्रदेशः स्थिरमेषादिः। सृष्ट्यादौ चलस्थिरमेषयोरेकस्मिन्नेव बिन्दौ(अश्विन्यादिबिन्दोः) एवासीत्। अतः सृष्ट्यादौ समैव भगणपूर्तिः सायणनिरयणसौरयोः सञ्जायते स्म। परञ्च सम्पातस्य चलत्वात् परवर्तिकाले समकाले उभयो पर्यायपूर्तिर्न सञ्जायते। अतः चक्रपूर्तिकालादन्तरं प्रागेव वा यावता कालेन सूर्यः सम्पातगतो भवति तेन संस्कृतो भगणकालः सायनरविवर्षं सम्पातात्सम्पातं द्वादशराशि-भोगकालं वा भवति। निरयणसायनसौरयोः वर्षप्रमाणे वार्षिकीया अयनगतिः तुल्यमन्तरिता भवति। विषयेऽस्मिन् ब्रह्मगुप्तभास्करादिनामपेक्षया वटेश्वरमतं सम्यगस्तीति समीक्षणेन ज्ञायते।

**सौरमानप्रयोजनम्-** सौरमानादेव दिनरात्र्योः, संक्रान्तीनाम्, अयनयोः, युगानाञ्च गणना क्रियते यथोक्तं सूयसिद्धान्ते –

 ISBN: 978-81-930770-3-0

**सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।**
**अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता ॥**[30]

तत्र संक्रान्तीनां पुण्यकालोऽपि सौरगत्यैव भवति। यथोक्तं रामदैवज्ञेन –

**संक्रान्तिकालादुभयत्र नाडिकाः पुण्याः मताः षोडश षोडशोष्णगोः ।**[31]

ऋतूनां विषये तु श्रीपतिना- **मृगादिराशिद्वयभानुभोगात् षडर्तवः स्युः शिशिरो वसन्तः ।**[32]

**पैत्र्यमानसमीक्षणम्-** पितृसम्बन्धिनं चान्द्रमासैकतुल्यममान्तादमान्तं पैत्र्यमानम् । पितृणां चन्द्रपृष्ठे निवसत्वात् तेषां चान्द्रमासतुल्यमेकमहोरात्रम्। यथोक्तं भास्करेण-

**विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति ।**[33]

चन्द्रः भूपरितः स्वाक्षभ्रमणगत्या यावता कालेन भ्रमणमेकं सम्पादयति तावता कालेन पितृणामहोरात्रम् । अतः भूवासिभिः सदा चन्द्रबिम्बस्थलाञ्छनं समानमेव दृश्यते अतस्तैः चन्द्रपृष्ठस्य दर्शनं कर्तुं न पार्यते।

**पितृणामहोरात्रव्यवस्था-** निशाकरस्य भूसूर्ययोर्मध्यवर्त्तित्वात्पृष्ठे निवसतां पितृणां चान्द्रमास एवाहोरात्रं भवति । आर्यभटोऽपि पित्र्यमहोरात्रं चान्द्रमासतुल्यमेव स्वीकरोति । भास्करस्तु- **दर्शान्तेपितुर्मध्याह्नः असितपक्षदले उदयः सितपक्षदले अस्ताहः, पूर्णान्तेनिशीथश्चेति**[34] वक्ति । तन्न समीचीनम् । यतो हि दर्शान्ते कदम्बसूत्राभिप्रायिकस्य ध्रुवसूत्रमुचितस्य कथनं नोचितम्।

वास्तवपितुर्मध्याह्नविषये दामोदरो वक्ति यत् भूकेन्द्राच्चन्द्रबिम्बकेन्द्रगते कदम्बप्रोतवृत्तं यदि सूर्यस्य बिम्बकेन्द्रगतमपि भवति तदा वास्तवं दर्शान्तः। सूर्यस्य पृष्ठक्षितिजोपरिस्थिततत्वे सति याम्योत्तरवृत्तनिष्ठत्वं मध्याह्नलक्षणम् तेन यदा वास्तवदर्शान्तो भवति न तदा पितृणां मध्याह्नः सम्पद्यते । वस्तुतश्चन्द्रोपरिगतं ध्रुवप्रोतवृत्तं क्रान्तिवृत्ते यत्र लगति तत्रैव स्थिते रवौ वास्तवपितृमध्याह्नो भवति। पितृणां वास्तवोदयास्तसमीक्षाऽपि तत्रैव भगणसमीक्षायां द्रष्टुं शक्यते। प्रबन्धगौरवभयादत्र पल्लवनं न क्रियते। सूर्यसिद्धान्तेऽपि-

**पितरः शशिगा पक्षं स्वदिनं च नरा भुवि ।**[35]

**गौरवमानसमीक्षणम्-** गुरोः मध्यमगत्यैकराशिभोगकालो हि गौरववत्सरः। यथोक्तं भास्करेण एतद्विषये - **बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति ।**[36]

सूर्य सिद्धान्तोक्त्या तु **''द्वादशघ्ना गुरोर्याताः''** वस्तुतः विजयादिषष्टिसम्वत्सराणां द्वादशवर्षीयं चक्रं विद्यते । विष्णुधर्मोत्तरपुराणे अन्यदपि सम्वत्सरस्य चर्चा विद्यते यथोक्तं अद्भुतसागरे वल्लालसेनाचार्येण -

**माधवशुक्लसमारम्भे चन्द्रार्कौ वासवर्क्षगौ।**
**जीवयुक्तौ यदा स्यातां षष्ट्यब्दादिस्तदा भवेत् ॥**[37]

गुरोर्गत्या संहितासु अतिचारादिनिर्णयेषु वत्सरस्यास्य शुद्ध-लुप्त-महातीचार-अतिचार-अधिवर्षाणां विशेषतया चर्चा विद्यते। किञ्चिदत्र विचार्यतेऽस्मिन् विषये यथा - कल्पकुदिनैः कल्पग्रहभगणास्तदैकेन कुदिनेन किमिति एकस्मिन्दिने गुरोः एकदिनात्मिका गतिः । पुनरनुपातेन

 ISBN: 978-81-930770-3-0

यदनया गत्यैकं दिनं तदा मध्यमगुरुराशिकलाभिः किमिति फलं ३६१/२/४/४५ सावनवर्षात् १/२/४/४५ सावनदिनादिकमधिकं ४/१३/२५/३७ सावनदिनादिना सौरवर्षाच्च न्यूनम्। एकस्मिन् वत्सरे स्फुटगुरोरेकराशिसंचारो भवत्तदासौ शुद्धसम्वत्सरो ज्ञेयः । यदि गुरुरेकस्मिन्नेव सम्वत्सरे द्विराशिचारं कृत्वा पुनर्वक्रितः पूर्वराशिं नैति तदासौ लुप्तसम्वत्सरो महातीचारश्च कथ्यते । यदि वर्षमध्ये द्विराशिचारं कृत्वा वक्रितः पुनः पूर्वराशिमेति तदाऽतीचारः कथ्यते । तत्प्रमाणवचनानि यथा-

**यत्रैकराशिसञ्चारो मार्गगत्यागुरोर्भवेत् ।**
**शुद्धः संवत्सरः स स्यात् सर्वेषाञ्च शुभप्रदः ।।**
**यत्र द्विराशिसञ्चारो ह्यतीचारः स कथ्यते ।**
**लुप्ताब्दश्च यदाब्दान्ते पूर्वभं नैति वक्रितः ।।**[38]

एवं यत्र वत्सरे स्फुटगुरोः सञ्चारो न भवति सोऽधिवत्सरः कीर्तितः ।

**दिव्यमानसमीक्षणम्-** दिवि भवानां देवानां सम्बधिनं कालमानं दिव्यमिति । तत्र सायनसौर-वर्षभोगेन देवासुराणामहोरात्रं भवति । यथा भास्कराचार्येण तु –

**रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव ।**[39]

तत्कथमुभयोरहोरात्रमिति जिज्ञासायां विचारिते सति देवा हि भुवः ध्रुवप्रदेशस्य सौम्यदिग्भागे सुमेरौ निवसन्ति। तथा च ततः १८० अंशाभ्यन्तरे याम्यदिग्भागे भूपृष्ठे कुमेरौ दैत्याः सन्ति। अतस्तयोः क्षितिजवृत्तं नाडीवृत्तधरातलरूपं मध्यमभूपरिधितुल्यमेव । तेन सायनमेषादितः सायनमिथुनान्तं यावत् सौम्यगोलस्थिते रवौ देवानां दिनस्य पूर्वार्धम् । ततश्च सायनतुलादिपर्यन्तं तेषां दिनस्योत्तरार्द्धं भवति । एवमेव सायनतुलादितः सायनधनुषान्तं यावद् देवानां पूर्वनिशा । ततश्च सायनमीनान्तं यावत् तेषामुत्तरनिशा भवति। अधुना धार्मिककार्येषु निरयणमानानामेव ग्रहणं भवति । देवासुराणां वास्तवोदयास्तनिरूपणविषये तु भास्करोक्त परिभाषयाम् **''दिनं दिनेशस्य यत्रोऽत्र दर्शने''** यदा देवानां दिनं अर्थात् यत्र सूर्यस्य दर्शनं भवति किन्तु तेषां निवासो हि ध्रुवस्थाने, अतः सायनमेषादग्रे क्रान्तिवृत्तस्वपृष्ठक्षितिजवृत्तयोगबिन्दौ रव्युदयः । एवं सायनतुलादेः पूर्ववर्तियोग-बिन्दौ देवानां सूयास्तः । अतस्तदन्तरं गणितीयरीत्या साध्यते-

त्रिज्या x रविपरमलम्बनज्या = सायनरविभुजज्या परमक्रान्तिज्या ।

अत्र हि भास्कराभिमतं रवेः परमलम्बनम् · २३६.५ विकलाः । आधुनिकवेधानुसारं लघुतमं परमलम्बनम् ८.७ विकलाः, महतमं परमलम्बनम् · ९० विकला । प्राचीनमते परमा क्रान्तिः २४ अंशाः नवीनवेधसिद्धा परमाक्रान्तिः २३.२८ अंशादिः । पद्धत्याऽनया सायनरविभुजज्या विज्ञाय तस्याश्चापं सायनरविभुजांशाः । तत्तुल्याः भुजांशा यदा भवन्ति तदा देवानां सूर्योदयः षड्राशिभ्यन्तरे अस्तञ्च भवति । असुराणां वैपरीत्येन सूर्योदयास्तौ ज्ञातव्यौ ।

**प्राजापत्यमानसमीक्षणम्-** प्रजापत्यंशसमुद्भवाः मनवास्तेषां सम्बन्धिनं सैकसप्ततियुगमित-कालेनेको मनुः अतो एकमनोराविर्भावकालादन्यमनोराविर्भवकालपर्यन्तं मन्वन्तरमित्युच्यते । तत्रान्यमानमिवास्मिन् कालमाने दिनरात्र्योर्भेदो नास्तीति सूयसिद्धान्ते स्पष्टता भगवदंशैर्निगदितम्

 ISBN: 978-81-930770-3-0

- **''न तत्रद्युनिशोर्भेदो''** । तत्र युगव्यवस्था विषये मुनीश्वरैः प्रतिपादितं यत् वेदाङ्गज्योतिषे युगव्यवस्था पञ्चवर्षीया सैव साम्प्रतिकयुगव्यवस्थायाः मूलभूता । तत्र पञ्चभिर्वर्षैः प्रथमं लघुयुगं द्वादशभिर्लघुर्युगैः द्वितीयलघुयुगं तथा च द्वादशभिर्द्वितीयलघुयुगे तृतीयलघुयुगम् । तृतीयलघुयुगं खखरिपुभिः गुणितं साम्प्रतिकं कलियुगमानम् ।

एवं प्रकारेण- ५ x १२ x १२ x ६०० = ४,३२००० वर्षाणां कलियुगम् । ततः सौरमानमवलम्ब्य **''कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया''** इत्युक्त्या धर्मपादवर्धनक्रमेण चतस्त्रिद्व्येकसङ्गुणात् महायुगमानं समायाति ।

४३२००० x १ = कलिमानम्

४३२००० x २ = द्वापरमानम्

४३२००० x ३= त्रेतामानम्

४३२००० x ४ = कृतमानम्

चतुर्णां योगेन १० x ४३२००० = महायुगमानम् = ४३२०००० वर्षाणि । ब्रह्मगुप्तेनाऽपि युगपद्धतिरेषैव स्वीकृता । आर्यभटेन तु महायुगे चतुर्णां चरणानां समानमेव भागं स्वीकृत्य समप्रकारेणैवै व्यवस्था सम्पादिता । अतस्तन्मते १०,८०,००० वर्षाणां चत्वारो युगपादाः पृथग् भवन्ति । एवमेव ब्राह्मपक्षे सौरपक्षे चैकसप्तत्या युगैरेको मनुः कथितः । परञ्च प्रथमार्यभटमते ७२ द्विसप्तत्या युगेरभिहितो मनुः । आर्यभटेन तु सन्ध्यासन्ध्यांशयोः चर्चा न विहिता केवलं गणितयुक्त्यैव ७२ मनुभिः महायुगमानं प्रपूरितम् । विषयेऽस्मिन् सन्ध्यासन्ध्यांसविचारः प्रभाटीकायामुक्तं तत्समीचीनम् ।

**ब्राह्ममानसमीक्षणम्-** विधेः सम्बन्धेनेदं ब्राह्ममानम् । तत्र सौरार्यब्राह्मानामिति पक्षत्रयेऽपि चतुर्दशमनुतुल्यं ब्रह्मणो दिनम् । सौरे तु- **ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश..** । आर्यभटेन तु **युगरविभगणाः ख्युघृ शशि चयगियिङुशुछ्लृ कु ङिशिबुण्लृख्षु प्राक्..**[40] भास्करेण तु ब्रह्ममतमेव स्वीकृतं तत्र विचारिते हि ज्ञायते यत् ब्राह्मसौरयोः मतैक्यं तथा च आर्यपक्षे १००८ = ७२ x १४ कल्पमानं वर्तते। सौरमते १४ x ७१ = ९९४ मनवः १४ (सन्धयः) १००८ महायुगानि। मतेऽस्मिन् ब्रह्मगुप्तोक्तिः यत् आर्यभटोऽपि महायुगतुल्यं मनुसन्धिमिच्छति[41] ।

**कल्पमानविचारः-** ब्राह्मसौरयोः कल्पगता गणितीया प्रक्रिया समाना एव भवति । आर्यमते युगचरणप्रमाणभेदेन किञ्चिदन्तरं समायाति । सौरपक्षीयकल्पगतमानं तु विगतकृतयुगान्तीयं विद्यते । आर्यभटस्य कल्पगतं मानं महाभारतयुद्धात् पूर्ववर्तिकं मन्यते । मन्येऽहं द्वापरान्ते कल्यादौ वा । सिद्धान्तशिरोमणेः कल्पगतं शकसम्वत्सरस्य आरम्भकालो विद्यते । तच्च भास्करमते सर्वेषां योगेन शकादौ कल्पगतम् १९७२९४७१७९ आर्यभटमते शकादौ कल्पगतम् १९८६१२३१७९ सौरब्राह्मयोः समानतया अनयोः अन्तरेण १३१७६००० तुल्यानि सौरवर्षाणि। सौरब्राह्मपक्षाभ्यां आर्यपक्षे पूर्वोक्ता संख्याधिका वर्तते ।

 ISBN: 978-81-930770-3-0

**ब्रह्मणायुः-** ब्रह्मणः आयुविषये सौरब्राह्मपक्षयोः **''शतायुर्ब्रह्मा''** इति मत्वा महाकल्पस्य कल्पना कृता। तस्य पूर्णायुविषये आगमानां वैमत्येन आचार्यैः विभिन्नता स्वीकृता। ब्राह्मसौर-पक्षानुसारं ब्रह्मायुषः पंचाशद्वर्षाणि व्यतीतानि। शेषञ्च प्रथमं दिनम्। वर्तमानदिने कल्पतोऽर्धं व्यतीतम्। बटेश्वरोऽपि स्कन्दपुराणीयं एतादृशमेव मतं स्वीकरोति। भास्करेणापि ब्राह्मगुप्तमतमेव समर्थितम्।

**ब्रह्मदिवसोपपत्तिः**- यावद् सूर्यस्य दर्शनं तावद्दिनमिति **''दिनं दिनेशस्य यतोऽत्रदर्शने''** इति भास्कराचार्यवचनेन ब्रह्मणः निवासस्थानं कियद्दूरे विद्यते यतः सः ब्रह्मा कल्पपर्यन्तं रविं पश्यति। जिज्ञासायामस्यां प्रदर्श्यते ध्रुवाधस्तान्मेरूपृष्ठे ब्रह्मणो निवासः। अत उत्तरगोलस्थितरविदर्शनं तस्य स्यादेव दक्षिणगोले धनोरन्ताहोरात्रवृत्ते रविः परमदक्षिणो भवति। अतो धनोरन्ताहोरात्रवृत्तस्य प्रतिबिन्दुतः कृतानां भूगोलस्पर्शरेखाणां यत्र योगो भवति ततोऽत्युच्चतरप्रदेशे यदि ब्रह्मणो निवासः स्यात्तदास्य सर्वदेव रविदर्शनं स्यादिति दिग्।

## पादटिप्पणी

1. सि.शि,ग. अ, वा.भ. श्लो सं. १५।
2. पा.धा.पा.भ्वा.५२९
3. पा.अष्टा.३/०१//१३४।
4. श.क.ख.२ पृ. सं. १०८ श.स.स.
5. तत्रैव
6. अ को. १/४/१
7. वि.पु. १/२/१४
8. अ.भि.शा.श्लो.सं.१
9. हितोपदेश
10. महा.भा.पृ.२/२/५
11. वा प. १/३
12. वि.श.ज्ञा.का. १४/६९
13. का.स.१/२
14. का.सि.द.पृ.सं. ८५
15. महा.भा.शा.प.२३२/१६
16. Oxford Dic. Ed-04
17. सि.शि,ग.अ.
18. बीजगणितिम् १.१४
19. सू.सि.म.अ.श्लो.सं. १०
20. सू.सि.त.भा.पृ.७
21. सू.सि.म.अ.श्लो.सं.१० सुधावर्षिण्याम्
22. सि.म.अ. श्लो. शं. ११

 ISBN: 978-81-930770-3-0

23. सि.शि.ग.अ.का.अ. श्लो.सं.
24. भा.गो.मी.पृ.सं. १८५
25. या.ज्यौ.३८-३९
26. सू.सि.मा.अ.श्लो.सं. १
27. सू.सि.मा.अ.श्लो.सं.१२
28. सू.सि.मा.अ.श्लो.सं.१३
29. सि.शि.ग.अ.का.अ. श्लो.सं.३१
30. सू सि. मानाध्यायः श्लो. ३
31. मु.चि.३/५
32. सिद्धान्तशेखरे
33. सि.शि.गो.त्रि.वा.श्लो. १३
34. सि.शि.गो.त्रि.वा. (१३-१४)
35. सू. सि. भू. अ. ७४
36. सि.शि. ग. अ. का . मा. ३०
37. अद्भुत सागरे
38. सू.सि.तत्वामृतभाष्यम् पृ. ३६
39. सि. शि. ग. का. अ. श्लो. १९
40. आ. भ. गी. पा. श्लो. ३
41. ब्रा. स्फु. सि., म. अ. श्लो. १२

❀❀❀

 ISBN: 978-81-930770-3-0

# शैक्षणिकसंस्थानामान्तरिकगुणवत्ताऽभिवृद्धये विविधदर्शनानामुपादेयता

**डॉ. नीरजकुमारभार्गवः***

**भूमिका-** तत्र तत्र शैक्षणिकसंस्थासु अध्ययने संलग्नानां छात्राणाम्, अध्यापने रतानाम् अध्यापकानाम्, अन्येषु कार्येषु प्रवृत्तानां कर्मचारिणां च अभिवृद्धये शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्ताया अभिवृद्धि अपेक्षिता । शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्ता च विविधैः प्रकारैः वर्धते । किन्तु कस्याश्चित् संस्थायाः आन्तरिकगुणवत्ता उत्तमा अस्ति नवेति कथनेन न सिध्यति, अपितु परीक्षका एव तत्र प्रमाणभूता भवन्ति । अत एव प्रोक्तमपि –

**सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते ।**
**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ।।1-2**

तत्र भारतीयानि दर्शनानि शास्त्राणि च शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्तायाः अभिवृद्धौ कथम् उपयोगीनि भवन्तीति प्रतिपाद्यते ।

**प्रमाणम् -** भारतीयदर्शनेषु एकं वचनं प्रसिद्धं यत् मानाधीना मेयसिद्धिः इति । एवञ्च सर्वाण्यपि भारतीयदर्शनानि येन केनचित् प्रमाणेनैव स्वसिद्धान्तं साधयन्ति । अप्रमाणिकं च सिद्धान्तं निराकुर्वन्ति । तत्र प्रतिदर्शनं प्रमाणसंख्या भिद्यते । तथाहि प्रोच्यते ग्रन्थेषु -

**प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।**
**अनुमानञ्च तच्चापि सांख्या शब्दश्च ते उभे ।।**
**न्यायैकदेशिनोऽप्येवमुपानञ्च केचन ।**
**अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ।।**
**अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा ।**
**सम्भवैतिह्ययुक्तानि तानि पौराणिकाः जगुः[2] ।।**

एवञ्च तत्र तत्र शैक्षणिकसंस्थासु प्रामाणिकं कार्यमेव कर्तव्यं नतु प्रमाणशून्यम् । यदा सर्वमपि कार्यं प्रामाणिकं भविष्यति तदा कस्याश्चिदपि संस्थायाः अवनतिः भवितुं नार्हति । अपितु सर्वदा अभिवृद्धिरेव भविष्यति ।

**योगदर्शनम् -** योगदर्शनस्य अनुसरणं संस्थानां विकाशाय उपकारकं भवति । तथाहि यदा अस्माकं शरीरं मनश्च स्वस्थं भवति तदैव वयं कस्यचिदपि कार्यस्य सम्पादनं कर्तुं प्रभवामः । अत एव प्रोच्यते शरीरमाद्यं खलु धर्मसाधनमिति । शरीरं मनश्च योगदर्शनस्य आश्रयणेनैव स्वस्थं भवति । योगस्य यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि भवन्ति । तत्र शरीरम् आसनादिना स्वस्थं भवति । यमादिभिश्च मनः स्वस्थं भवति । गीतायामपि प्रोच्यते -

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।**
**न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन[3] ।। 6-16 ।।**
**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।**

---

*सहायकाचार्यः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठः, हावडा

 ISBN: 978-81-930770-3-0

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा[4] ।। 6-17 ।।**

**न्यायदर्शनम्-** न्यायदर्शनस्य अनुसरणमपि शैक्षणिकसंस्थानामान्तरिकगुणवत्तायाः अभिवृद्धौ उपयोगि विद्यते। तथाहि न्यायदर्शने प्रोच्यते -

**मोहं रुणद्धि विमलीकुरुते च बुद्धिम्,**
**सूते च संस्कृतपदव्यवहारशक्तिम् ।**
**शास्त्रान्तराभ्यसनयोग्यतया युनक्ति,**
**तर्कश्रमो न तनुते कमिहोपकारम्[5] ।।**

एवञ्च न्यायदर्शनस्य अध्ययनेन जनानां बुद्धिः कार्यसम्पादने कुशला भवति । तया प्रवीणबुद्ध्या यदा जनाः कार्यं करिष्यन्ति चेत् सर्वमपि कार्यमुत्तमरीत्या भविष्यति। तेन अस्माकं संस्थानां विकाशो भविष्यति। एवञ्च अस्माभिः न्यायदर्शनस्य अनुसरणमवश्यमेव कर्तव्यमिति भावः। एवमेवान्यत्रापि प्रोक्तम् -

**प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम् ।**
**आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता[6] ।।**

तस्मात् न्यायदर्शनस्य सिद्धान्तानामनुसरणं सर्वस्यापि कार्यस्य सम्पादने सहकारि भवति। ततश्च शैक्षणिकसंस्थानामभिवृद्धौ अवश्यमेव उपकारि स्यादिति भावः।

**वेदान्तदर्शनम् -** वेदान्तदर्शनस्य सिद्धान्तानामनुसरणमपि शैक्षणिकसंस्थानामभिवृद्धौ उपकारकं भवति। गीतायां कर्मणः प्राधान्यं प्रतिपाद्यते। अत एव तत्र प्रोक्तम् -

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि[7] ।।2-47**

अतः अस्माभिः फलस्याशां विहाय कर्म कर्तव्यमिति। कर्तव्यभावनया अनासक्तेन जनेन यत्कर्म क्रियते तदेव कर्मकौशलमित्युच्यते। एतदेव परमो योग इति कथ्यते। अत एव प्रोक्तमपि गीतायाम् - **तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्[8] ।।2-50**

मानवः सर्वदा प्रयत्नशीलाः तिष्ठन्ति। अतोऽस्माभिः सर्वदा प्रयत्नशीलैः भाव्यम्। अत एव शास्त्रेषु कर्मणः प्रशंसा विद्यते। तथाहि शास्त्राणां वचनानि -

**नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।।3-5**
**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।3-8**
**तस्मादसक्तः सततं कार्यं कर्म समाचर ।**
**असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ।।3-19**
**कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।**
**लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि[9] ।।3-20**

 ISBN: 978-81-930770-3-0

**व्याकरणदर्शनम्-** व्याकरणदर्शनस्य सिद्धान्तानामनुसरणेनापि अस्माकं संस्थानां विकाशो भविष्यति। तथाहि व्याकरणदर्शनस्य प्रयोजनप्रतिपादनप्रसङ्गे प्रोच्यते -

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यज्ञमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्[10]॥**

एवञ्च स्वरापराधेन यजमानस्य विनाशः सञ्जातः। तथैव यदि वयं त्रुटिपूर्णं कार्यं कुर्मश्चेत् अस्माकं हानिः संस्थायाश्च हानिः भविष्यति। तस्मात् अस्माभिः सर्वदा ध्यानेन दोषरहितं कार्यं कर्तव्यम्। तेन अस्माकं विकाशः अस्माकं संस्थायाश्च विकाशो भविष्यति। एवमेवान्यत्राप्युच्यते-

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगवित् दुष्यति चापशब्दैः[11]॥**

एवञ्च व्यवहारकाले यथावद् शब्दान् प्रयुङ्क्ते सः अनन्तं जयं प्राप्नोति। एवञ्च वयमपि स्वकार्यस्य सम्पादनकाले यथायोग्यं कार्यं करिष्यामश्चेत् अवश्यं शैक्षणिकसंस्थानां विकाशो भविष्यति। एवमेवान्यत्रापि पठ्यते याज्ञिकाः पठन्ति आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीम् इष्टिं निर्वपेत् इति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। तथैव कस्यांश्चित् संस्थायां नियुक्ताः जनाः यदा त्रुटिपूर्णं कार्यं करिष्यन्ति चेत् दोषभाजः भविष्यन्ति दण्डभाजः च भविष्यन्ति। तस्मात् जनाः दोषभाजः न स्युः दण्डभाजश्च न स्युः तदर्थं जनैः दोषरहितं कार्यं कर्तव्यम्। तेन संस्थासु कार्यम् उत्तमं भविष्यति। तेन च संस्थानां विकाशो भविष्यति।

एवमेव व्याकरणशास्त्रे तत्र तत्र विचारेषु सति सन्देहे व्याख्यानेन निर्णयः क्रियते नतु विचारस्य त्यागः क्रियते। अत एव प्रोक्तमपि व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षण-मिति। तथैव शैक्षणिकसंस्थानां कार्यसम्पादने जायमानानां सन्देहानां व्याख्यानेन निर्णयः कार्यः नतु कार्यस्य त्यागः कर्तव्य इति। एवमेव व्याकरणशास्त्रे अर्थवतः अनर्थकस्य च ग्रहणे प्राप्ते अर्थवतः एव ग्रहणं कार्यमित्यस्ति नियमः। अत एव प्रोक्तमपि अर्थवद्ग्रहणे नानर्थकस्य इति। तथैव तत्र तत्र कार्याणां सम्पादने अर्थवतः अनर्थकस्य च कार्ये प्राप्ते अर्थवदेव कार्यं कर्तव्यं नतु अनर्थकम्। ततश्च अवश्यमेव संस्थानां विकाशो भविष्यति। एवमेव अपरोऽपि नियमः विद्यते गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः इति। एवञ्च तत्र तत्र संस्थासु गौणमुख्ययोः कार्ये सम्प्राप्ते मुख्यं कार्यमेवादौ कर्तव्यमिति। एवमेव असिद्धं बहिरङ्गमन्तरङ्गे इति नियमः विद्यते एवमेव अन्येऽपि सिद्धान्ताः सन्ति येषामनुसरणेन वयं शैक्षणिकसंस्थानाम् अभिवृद्धिं कर्तुं शक्नुमः इति।

**अचार्यव्यवहारः-** अस्माकं दार्शनिकानाम् आचार्याणां व्यवहारस्य अनुसरणमपि शैक्षणिक-संस्थानामभिवृद्धौ उपयोगी भवितुमर्हति। यथा भगवतः पाणिनेः व्यवहारविषये लिखति भगवान् पतञ्चलिः प्रमाणभूतः आचार्यः दर्भपवित्रपाणिः शुचौ अवकाशे प्राङ्मुखः उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राऽशक्यं वर्णेन अपि अनर्थकेन भवितुं किं पुनः इयता सूत्रेण। एवञ्च अस्माभिरपि स्वकीयं कार्यं तथैव कर्तव्यम्, येन अस्माकं कस्मिश्चित्कार्ये प्रमादो न भवेत्।

भारतीयेषु दर्शनेषु शास्त्रेषु च आचारस्य कर्मणः महती प्रशंसा विद्यते। अतः अस्माभिः आचारयुक्तैः भाव्यम्। तथाहि शास्त्राणां वचनानि –

 ISBN: 978-81-930770-3-0

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः[12]।।1-108**
**आचारात् विच्युतो विप्रो न वेदफलमश्नुते ।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत्[13]।।1-1-82**

भारतीयेषु दर्शनेषु शास्त्रेषु च धर्मस्य महती प्रशंसा विद्यते । अतः अस्माभिः धर्मयुक्तैः भाव्यम् । तथाहि शास्त्राणां वचनानि -

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्[14]।।6-92।।**
**धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः ।**
**यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः[15]।।कर्णपर्व - 69**

स्वकर्मणः श्रद्धया सम्पादनमेव धर्मः प्रोच्यते । ततश्च यदि वयं धर्मस्य परिपालनं कुर्मश्चेत् संस्थानाम् अभिवृद्धिः स्यादेवेति भावः ।

**निष्कर्षः-** शैक्षणिकसंस्थानाम् आन्तरिकगुणवत्तायाः अभिवृद्धौ भारतीयदर्शनानां महती उपयोगिता विद्यते । भारतीयेषु दर्शनेषु शास्त्रेषु च आचारस्य कर्मणः धर्मस्य च महती प्रशंसा विद्यते। अतः मनुष्यैः आचारशीलैः कर्मयुक्तैः धर्मसम्पन्नैश्च भाव्यम् । तादृशजनैश्च सम्पादितेन कार्येण समग्रस्य अपि राष्ट्रस्य अभिवृद्धिः भवति । ततश्च शैक्षणिकसंस्थानाम् अभिवृद्धिः स्यादेव ।

**पादटिप्पणी -**

1. अभिज्ञानशाकुन्तलम्
2. तार्किकरक्षा
3. श्रीमद्भगवद्गीता
4. श्रीमद्भगवद्गीता
5. सुभाषितरत्नभाण्डागारम्
6. सुभाषितरत्नभाण्डागारम्
7. श्रीमद्भगवतगीता
8. श्रीमद्भगवतगीता
9. श्रीमद्भगवतगीता
10. महाभाष्यमपस्पशाह्निकम्
11. महाभाष्यमपस्पशाह्निकम्
12. मनुस्मृतिः
13. भविष्यपुराणम्
14. मनुस्मृतिः
15. महाभारतम्

 ISBN: 978-81-930770-3-0

# शैक्षिकान्तरिकगुणवत्तावृद्धये प्राचीनाधुनिकशिक्षाव्यवस्थयोरुल्लिखितानि तत्त्वानि

डॉ. महेशकुमारपाणिग्राही*

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।**
**नासौ योगो न तत्कर्म संस्कृतेऽस्मिन् यन्न दृश्यते ॥**

वैदिकशिक्षायाः प्रारम्भः इत्युक्ते विश्वशिक्षायाः प्रारम्भः इति ऐतिहासिकानामभिमतम् । वैदिककालादारभ्य शिक्षणसंस्थानां गुणवत्तावृद्धये प्रयासः चलत्येव । यद्यपि आधुनिककाले शिक्षणसंस्थानां गुणवत्तानिर्धारणं स्तरनिर्धारणं वा केषाञ्चन बिन्दूनामाधारेण भवति, तथापि प्राचीनकाले छात्राणामुपलब्ध्याधारेण विद्वत्ताधारेण च भवति स्म । सम्प्रति उच्चशिक्षणसंस्थानां गुणवत्तां परीक्षितुं NAAC (राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषद्) (National Assessment and Accreditation Council) नेशनल इंस्टीट्यूट रैंकिंग फ्रेमवर्क (NIRF) च संस्थाद्वयं वर्तते । उभयोः संस्थयोः गुणवत्ता निर्धारणार्थमुपायाः भिन्नाः भवन्ति । NAAC संस्था गुणवत्तायाः आकलनं कृत्वा ग्रेड यच्छति, परन्तु NIRF संस्था गुणवत्तायाः आकलनं कृत्वा स्तरं (Rank) यच्छति । तत्र तुलनामेवं कर्तुं शक्यते-

| तुलनात्मकविन्दुः (point of comparison) | राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषद्(NAAC) | नेशनल इंस्टीट्यूट रैंकिंग फ्रेमवर्क (NIRF) |
|---|---|---|
| मूल्याङ्कनप्रक्रिया | गुणात्मकमूल्याङ्कनम् (Accreditation and quality assessment) | मात्रात्मकमूल्याङ्कनम् (Rankings based on quantitative data Method) |
| मूल्याङ्कनस्याधरः (Basis of assessment ) | UGCइत्यस्य नियमाधारेण (UGC guidelines) | शिक्षणं,शैक्षिकसंसाधनम्, अनुसन्धानं,स्नातकपरिणामः, शिक्षणेतरकार्यं,समावेश्च (Teaching, learning resources, research, graduation outcomes, outreach, inclusiveness) |
| उद्देश्यं (Purpose) | संस्थायाः गुणवत्तायाः निर्धारणं (Identify quality of an institute) | प्रदर्शनाधारेण संस्थायाः कृते स्तरनिर्धारणम् (Rank institutions based on performance) |

**NAAC इत्यस्य परिचयः-** यदा आधुनिककाले उच्चशिक्षायाः गुणवत्तां प्रासङ्गिकताञ्च अधिकृत्य महती चिन्ता आगता । एतद्विषयकचिन्तानां निवारणाय नवशिक्षानीत्या (New Policy on Education-1986) कार्ययोजनया (PoA- 1992) च नीतीनां विषये व्यूहः घटितः; स्वतन्त्रस्य राष्ट्रस्तरीयस्य प्रत्यायनाभिकरणस्य संस्थापनाय वैशद्येन आवश्यकता च प्रकटीकृता। परिणामतः

*सहायकाचार्यः (सं), शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी

 ISBN: 978-81-930770-3-0

विश्वविद्यालयानुदानायोगस्य स्वायत्तसंस्थारूपेण 1994 वर्षे राष्ट्रियमूल्याङ्कनप्रत्या-यनपरिषदः स्थापना अभवत् । उच्चतरशिक्षासंस्थानां कार्यकरणविधाने गुणवत्ताश्वासनम् अविभाज्यमङ्गं यथा स्यात् तथा रा. मू. प्र. परिषन्निर्धारितकार्यं तदीयदूरदृष्टौ प्रतिबिम्बितमस्ति ।

**संस्कृतसंस्थानां कृते NAAC मानदण्डः-** सर्वेषां विश्वविद्यालयानाम् उच्चतरशिक्षासंस्थानां च कृते रा. मू. प्र. परिषदा निदर्शिकाः, मार्गदर्शकसूत्राणि, स्वाध्ययनप्रतिवेदनस्य प्रारूपाणि च दत्तानि। भारतसर्वकारस्य शिक्षामन्त्रालयेन संघटितायाः समितेः संस्तुती अनुसृत्य नूतनशिक्षानीतिः २०२० इत्यस्यां सूचितांशान् आधारीकृत्य संस्कृतविश्वविद्यालयानां संस्थानाम् उच्चतरसंस्कृताध्ययन-संस्थानां च कृते पुनरीक्षितसूचकैः मानकैश्च युता पृथक् निदर्शिका सज्जीकृता ।

२०२० नूतनशिक्षानीतेः गोपालस्वामिसमितेश्च प्रतिवेदने (संस्कृतस्य विकासाय दूरदृष्टि-मार्गदर्शकमानचित्रयोः च दशवर्षीयपरिप्रेक्ष्ययोजनायाम्) अनुशंसितसंस्कृतशिक्षायाम् अपेक्षित-परिष्कारार्थं संस्कृतविश्वविद्यालयानां संस्कृतविश्वविद्यालयसम्बद्धसंस्थानां च कृते प्रमुखाः निर्णायकाः अंशाः इत्थं सन्ति -

- प्रत्येकं छात्रस्य संस्कृतभाषया मौखिकलिखितसंवादे दक्षता ।
- कक्ष्यायां अध्यापकप्रकोष्ठेषु परिसरे च संवादमाध्यमरूपेण सर्वेषां कार्यक्रमाणां गतिविधीनां च माध्यमरूपेण सरलमानकसंस्कृतस्य उपयोगः ।
- सर्वेषु स्तरेषु सर्वेषां विषयाणाम् अध्यापनस्य भाषामाध्यमं संस्कृतम् ।
- संस्कृतज्ञानप्रणालीनाम् अन्याधुनिकज्ञानप्रणालीनां च एकत्र समावेशः ।
- संस्कृतच्छात्राणाम् अधितन्त्रि बह्वायामीयपाठ्यक्रमद्वारा कौशलसम्पादनं कौशलसंवर्धनं च येन तेषाम् उद्यमितासामर्थ्यम् उद्योगावसराश्च वर्धिताः स्युः ।

**मूल्याङ्कनस्य केन्द्रबिन्दुः-** संस्थानां विकासं केन्द्रीकृत्य रा.मू.प्र.परिषद्

- गुणवत्तोपक्रमः ।
- गुणवत्ताभिरक्षणम् ।
- गुणवत्तासंवर्धनं चेति त्रीन् पक्षान् अभिलक्ष्य मूल्याङ्कनं करोति ।

एवं रा. मू. प्र. परिषद् संस्थायाः समग्रगुणवत्ताश्वासनरूपरेखाम्, उच्चतरशिक्षासंस्थानाम् अपेक्षितव्यवहारान्, मूल्यानि च केन्द्रीकृत्य मूल्याङ्कने प्रवर्तते । सा च रूपरेखा गुणवत्ताश्वास-नस्य प्रधानतत्त्वानां सततविकासाय आन्तरिकं बाह्यञ्च मूल्याङ्कनम् अन्तर्भावयति । रा. मू. प्र. परिषद् समग्रां संस्थाम् एकांशत्वेन परिकलय्य मूल्याङ्कनस्य आद्यं चरणं प्रारभते ।

**गुणवत्तासूचकरूपरेखाविवरणम्-** रा.मू.प्र.परिषदा क्रियमाणं निकषाश्रितमूल्याङ्कनं मूल्या-ङ्कनप्रत्यायनयोः मूलस्तम्भः। सप्तनिकषाः संस्थागतान् गतिविधीन् प्रधानकार्याणि च सूचयन्ति।

**1. पाठ्यचर्यापक्षाः(Curricular Aspects)**

1.1 पाठ्यचर्यायाः संरचना विकासश्च (Curriculum Design and Development)

 ISBN: 978-81-930770-3-0

1.3 शैक्षिकनमनीयता (Academic flexibility)
1.3 पाठ्यचर्यासंवर्धनम् (Curriculum Enrichment)
1.4 प्रतिपुष्टिप्रणाली (Feedback System)

**2. शिक्षणाधिगमप्रक्रिया मूल्याङ्कनं च (Teaching-Learning and Evaluation)**
2.1 छात्रनामाङ्कनं छात्रविवरणिका च (Student Enrolment and Profile)
2.2 छात्रवैविध्यस्यआवश्यकतानां सम्पूर्तिः (Catering to Student Diversity)
2.3 शिक्षणाधिगमप्रक्रिया (Teaching-Learning Process)
2.4 अध्यापकविवरणिका तद्गुणवत्ता च (Teachers' Profile and Quality)
2.5 मूल्याङ्कनप्रक्रिया तत्र परिष्काराश्च (Evaluation Process and Reforms)
2.6 छात्रस्य निष्पत्तिः अधिगमपरिणामश्च (Student Performance and Learning Outcomes)
2.7 छात्रसन्तुष्टेः सर्वेक्षणम् (Student Satisfaction Survey)

**3. अनुसन्धानं, नवाचाराः, विस्तारश्च (Research, Innovations and Extension)**
3.1 अनुसन्धानप्रोन्नयनं सौविध्यानि च (Promotion of Research and Facilities)
3.2 अनुसन्धानाय आर्थिकस्रोतसां सङ्ग्रहः (Resource Mobilization for Research)
3.3 नवाचारयुता अन्योन्याश्रयव्यवस्था (Innovation Ecosystem)
3.4 शोधप्रकाशनानि पुरस्काराश्च (Research Publications and Awards)
3.5 परामर्शः (Consultancy)
3.6 विस्तारगतिविधयः (Extension Activities)
3.7 सहयोगाः (Collaboration)

**4. आधारभूतसंरचना अधिगमसंसाधनानि च (Infrastructure and Learning Resources)**
4.1 भौतिकसौविध्यानि (Physical Facilities)
4.2 अधिगमसंसाधनरूपेण ग्रन्थालयः (Library as a Learning Resource)
4.3 सूचनाप्राविधिकीमूलसंरचना (IT Infrastructure)
4.4 परिसरसौविध्यानाम् अनुरक्षणम् (Maintenance of Campus Facilities)

**5. छात्राणां प्रोद्बलनं पुरोगतिश्च (Student Support and Progression)**
5.1 छात्राणां प्रोद्बलनम् (Student Support)
5.2 छात्रप्रगतिः (Student Progression)
5.3 छात्रप्रतिभागिता गतिविधयश्च (Student Participation and Activities)

**6. प्रशासनं, नेतृत्वं, प्रबन्धनं च (Governance, Leadership and Management)**

 ISBN: 978-81-930770-3-0

6.1 संस्थायाः दूरदृष्टिः नेतृत्वञ्च (Institutional Vision and Leadership)
6.2 व्यूहविकासः परिनियोजनं च (Strategy Development and Deployment)
6.3 अध्यापकसशक्तीकरणव्यूहाः (Faculty Empowerment Strategies)
6.4 वित्तीयप्रबन्धनं संसाधनसङ्ग्रहश्च (Financial Management and Resource Mobilization)
6.5 आन्तरिकगुणवत्ता-आश्वासन-व्यवस्था (Internal Quality Assurance System (IQAS)

**7. सांस्थानिकमूल्यानि सर्वोत्तमपरिपाटयश्च (Institutional Values and Best Practices)**

7.1 सांस्थिकमूल्यानि सामाजिकोत्तरदायित्वानि च (Institutional Values and Social Responsibilities)
7.2 अत्युत्तमाः परिपाटयः (Best Practices)
7.3 सांस्थिकं वैलक्षण्यम् (Institutional Distinctiveness)

निकषाश्रितमूल्याङ्कनं मूल्याधारितनिर्णयं प्रोन्नयति। तद्यथा– 'प्रशासनं, नेतृत्वं, प्रबन्धनं च' इति निकषः - भागग्राहित्वं, पारदर्शिता, गणकार्यं, प्रणालीदृष्टिः, न्यायः, आत्मप्रत्ययः, सार्वजनिकेषु अर्थेषु शुचिता इत्यादीनि मूल्यानि प्रोन्नयति।

**Table 1: Distribution of Metrics and KIs across Criteria**

| Type of HEIs | Sanskrit Universities | Sanskrit Dual Mode Universities | Sanskrit Affiliated/ Constituent Colleges |
|---|---|---|---|
| Criteria | 7 | 7 | 7 |
| Key Indicators (KIs) | 34 | 34 | 32 |
| Qualitative Metrics ($Q_lM$) | 69 | 70 | 43 |
| Quantitative Metrics ($Q_nM$) | 85 | 93 | 73 |
| Total Metrics ($Q_lM + Q_nM$) | 154 | 163 | 116 |

NAAC (National Assessment and Accreditation Council) संस्था मानदण्ड-निर्धारणे प्रभावं प्रासङ्गिकताञ्च आनयितुं सामान्यपरिवर्तनं कृत्वा सप्तनिकषानां स्थाने दशनिकषान् योजितवान्। तान् यथा-

**Criterion-**

1. छात्राणां प्रगतिः सफलता च (Student Progression and Success)
2. शैक्षिककार्याणि (Curricular Aspects)
3. अनुसंधानं नवाचारश्च (Research and Innovations)
4. प्रशासनं नेतृत्वञ्च (Governance and Leadership)
5. सांस्थानिकमूल्यानि सर्वोत्तमपरिपाटयश्च (Institutional Values and Best Practices)

ISBN: 978-81-930770-3-0

6. वैयक्तिकविकासः शैक्षिकगुणवत्ता च (Professional Development and Teacher Quality)
7. संवेदनशीलता समावेशिता च (Sensitivity and Inclusivity)
8. आधुनिकशैक्षिकसंसाधनम् आधारभूतसंरचना च (Modern Educational Resources and Infrastructure)
9. प्रदर्शनं मूल्याङ्कनं प्रतिपुष्टिः च (Performance Evaluation and Feedback Mechanism)
10. संस्थागतस्वायत्तता दीर्घकालिकयोजना च (Institutional Autonomy and Long-term Planning)

**IQAC इत्यस्य स्थापना-** शैक्षिकसंस्थानामान्तरिकगुणवत्तावृद्ध्यर्थमुच्चशिक्षणसंस्थासु आन्तरिकगुणवत्ताआश्वासनप्रकोष्ठस्य स्थापना करणीया। यः प्रकोष्ठः गुणवत्ताभिवृद्धये उत्तरदायी भवति। शैक्षिकप्राशासनिकगतिविधीनां निरीक्षणं कृत्वा गुणवत्ताभिवर्धनाय परामर्शञ्च दास्यति।

IQAC इत्यस्य स्थापना प्रत्येकं शिक्षणसंस्थाने संस्थायाः प्रमुखस्याधीने भवेत्। यत्र सदस्याः अधो लिखितरूपेण भविष्यन्ति।

1. अध्यक्षः- संस्थायाः प्रमुखः (Chairperson: Head of the Institution)
2. केचन प्राशाशनिकाधिकारिणः (A few senior administrative officers)
3. त्रयः तः अष्टौ अध्यापकाः (Three to eight teachers)
4. प्रबन्धनसमित्याः एकः सदस्यः (One member from the Management)
5. एकः/द्वौ सदस्यः सामाजिकः, छात्रः, पूर्वच्छात्रः वा (One/two nominees from local society, Students and Alumni)
6. एकः/द्वौ सदस्यः सर्वकारीयः, वाणिज्यिकः, प्रमुखः वा (One/two nominees from Employers/Industrialists/stakeholders)
7. एकः वरिष्ठाध्यापकः संयोजक/निदेशकरूपेण (One of the senior teachers as the coordinator/Director of the IQAC)

IQAC (Internal Quality Assurance Cell) इत्यस्य मुख्यमुद्देश्यं शैक्षिकसंस्थानां गुणवत्ताभिवर्धनाय योजनानिर्माणं परामर्शप्रदानञ्च। तत्र गुणवत्ताभिवर्धनाय कानिचन कार्याणि करणीयानि भवन्ति। तानि यथा-

1) गुणवत्तायाः मानकनिर्धारणम् (पाठ्यक्रमे, प्रशासने, शिक्षणप्रक्रियायां ............)।
2) शिक्षणे पाठ्यक्रमे च परिवर्तनम्।
3) छात्रोपलब्धेः मूल्याङ्कनम् (गतिविधिषु भागग्रहणं, परीक्षायां प्राप्ताङ्कः, प्रतिपुष्टिः......)।
4) शिक्षकाणां शैक्षिकविकासस्य प्रबन्धनम् (संगोष्ठी, कार्यशाला, प्रशिक्षणं, तात्कालिकज्ञानं, नूतनविधिप्रविधिविषये ज्ञानं, प्राविधिकोपकरणानां प्रयोगः........ )।
5) संस्थागतस्वायत्तता नेतृत्वञ्च।

6) सततान्वेषणं मूल्याङ्कनञ्च (शैक्षिकं प्राशासनिकं च कार्यं गुणवत्तापूर्णं चलति न वा । समयानुसारेण मूल्याङ्कनं कृत्वा परिवर्तनम्) ।
7) छात्राणां सर्वाङ्गीणविकासः (शैक्षिकशैक्षिकेतरकार्येषु च, यथा- क्रीडा, सांस्कृतिक-कार्याणि, मानसिकस्वास्थ्यं, प्रशिक्षुता (Internship), विष्यमार्गदर्शनं......... ) ।
8) अधिकारिणां कर्मकराणां च प्रतिक्रिया ।
9) शोधक्षेत्रे विकासः (शोधप्रकोष्ठस्य स्थापना) ।
10) गुणवत्ताभिवर्धनाय डिजिटलटूल्स इत्यस्योपयोगः (आन्तर्जालिकमूल्यांकनं, ई-अधिगमश्च)
11) संस्थायाः विकासार्थं योजनानिर्माणम् ।
12) आन्तरिकं वाह्यञ्च मूल्याङ्कनम् ।
13) प्रत्येकं कार्यस्य प्रतिवेदननिर्माणम्, आवश्यकीयपत्राणां सञ्चिकायां संरक्षणम् ।
14) विभागीयस्वायत्तता, आत्ममूल्याङ्कनञ्च ।
15) राष्ट्रिय-अन्ताराष्ट्रियसंस्थाभिः सह सहभागिता ।
16) छात्राणां कृते अतिरिक्तसहायकसामग्रीणां व्यवस्था ।
17) समाजेन सह संम्बन्धस्थापनं, क्षेत्रीयविकासश्च । ................ इत्यादीनि ।

एतादृशानां कार्यक्रमाणां माध्यमेन IQAC संस्थायाः गुणवत्ताभिवर्धनं कर्तुं शक्नोति ।

**प्राचीनाधुनिकशिक्षाव्यवस्थयोरुल्लिखिततत्त्वानि-** सम्प्रति प्राचीनआधुनिकयोः तुलना क्रियते । प्रत्येकं संस्था गुणवत्ताभिवर्धनाय विभिन्नोपायान् समाचरति । संस्थां सर्वोच्चस्थाने स्थापयितुं, पाठकान् आकर्षयितुं, समाजे समादरञ्च प्राप्तुं तत्रत्य प्रशासकाः, प्राध्यापकाः, कर्मचारिणः, छात्राश्च निरन्तरं यतमानाः भवन्ति ।

यद्यपि गुणवत्ताभिवर्धनाय संस्था सर्वदा सर्वथा च यत्नशीला भवति, तथापि कालानुगुणं तत्र सामान्यभेदः परिलक्ष्यते। अयं भेदः कदाचित् सन्दर्भाधारेण कदाचित् वा परिस्थित्याधारेण परिलक्ष्यते। यथा-

**1. शिक्षणप्रक्रिया (Teaching Methodology)**

**प्राचीनकाल**:- प्राचीनकाले शिक्षणप्रक्रिया मौक्षिकरूपेणासीत् । शिक्षा मुख्यतः श्रुतिस्मृत्युपरि पर्यवेशितासीत् । शिक्षया जीवनसिद्धान्तं, नैतिकमूल्यं, व्यावहारिककौशलञ्च प्रदीयते स्म ।

**आधुनिककाल**:- परन्तु आधुनिकशिक्षाव्यवस्था कक्षाधारिता वर्तते । या शिक्षा निर्दिष्टस्थाने, निर्दिष्टसमये, निर्दिष्टपाठ्यक्रमाधारेण प्रदीयते । अत्र पाठ्यक्रमस्य समाप्तिरेव प्रमुखं लक्ष्यम् । कालेऽस्मिन् प्राविधिकशिक्षणपद्धतेः विकासः जातः।

**2. गुरुशिष्यसम्बन्धः (Teacher-Student Relationship)**

**प्राचीनकाल**:- अस्मिन् काले गुरुशिष्ययोः सम्बन्धः पितापुत्रवदासीत् । गुरुः स्वकीयं सर्वमपिज्ञानं शिष्येभ्यः यच्छति स्म । शिष्योऽपि समर्पितभावेन गुरोः आदेशम् उपदेशं च स्व्यकरोत् । गुरुः शिष्याणां वैयक्तिकस्य सामाजिकस्य च विकासस्य उत्तरदायी भवति स्म ।

 ISBN: 978-81-930770-3-0

**आधुनिककाल**:- अत्र शिक्षणं व्यावसायिकं प्रशासनाधारितञ्चास्ति । शिक्षकः केवलं पाठ्यक्रमाधारेण छात्रेभ्यः ज्ञानं यच्छति । अतः गुरुशिष्ययोः सम्बन्धोऽपि व्यावसायिकः भवति। यद्यपि उभयोर्मध्ये महत्त्वपूर्णान्तरिकसम्बन्धः वर्तते, तथापि प्राचीनकालवत् दृढसम्बन्धः नास्ति ।

**3. पाठ्यक्रमः अध्ययनसामग्री च (Curriculum and Study Material)**

**प्राचीनकाल**:- प्राचीनकाले पाठ्यक्रमे मुख्यरूपेण द्वे विद्ये परा-अपरा च आस्ताम् । चतुर्दशविद्यानाम्/अष्टादशविद्यानामध्ययनं भवति स्म ।

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।।**
**आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।**
**अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु ।।**

एतेन सह लौकिकविषयाः अपि पाठ्यक्रमे आसन् । यथा- गणित-विज्ञान-साहित्य-दर्शन-आयुर्वेदादयः ।

**आधुनिककाल**:- सम्प्रति पाठ्यक्रमः व्यापकः अस्ति । पाठ्यक्रमे विज्ञानं, गणितं, कला, साहित्यं, समाजशास्त्रं, प्रविधिशास्त्रं, व्यावसायिकादिविषयाः सम्मिलिताः सन्ति । अन्ταराष्ट्रिय-शैक्षिकमानदण्डाधारेण मानकीकृतपाठ्यक्रमः निर्धारितोऽस्ति । पाठ्यक्रमे प्रतिस्पर्धात्मकभावनां जागरयितुं विषयाः संश्लिष्टाः सन्ति ।

**4. प्रवेशप्रक्रिया (Admission Process)**

**प्राचीनकाल**:- शिक्षार्थिनां प्रवेशः मुख्यतः गुरोः अनुमत्या भवति स्म । शिष्यः यदा आध्यात्मिकरूपेण मानसिकरूपेण च प्रस्तुतः भवति, तदा बालः प्रवेशं स्वीकरोति स्म । परन्तु शिक्षाव्यवस्थायां मुख्यतः उच्चवर्गीया एव स्थानं प्राप्नुवन्ति स्म ।

**आधुनिककाल**:- सम्प्रति प्रवेशपरीक्षाया अनन्तरमुत्तीर्णच्छात्रः प्रवेशं स्वीकर्तुं शक्नोति । कुत्रचित्पूर्वपरीक्षायाः परिणाम अपि ग्रहणयोग्यः भवति । प्रवेशसमये आरक्षणनीतिः गृहीतास्ति ।

**5. शिक्षायाः उद्देश्यं (Purpose of Education)**

**प्राचीनकाल**:- प्राचीनकाले शिक्षायाः मुख्यमुद्देश्यमासीत् मोक्षप्राप्तिः । तेन सह आध्यात्मिक-नैतिक-बौद्धिक-सामाजिकादिगुणानां विकासोऽपि आसीत् ।

**आधुनिककाल**:- परन्तु आधुनिकशिक्षायाः मुख्यमुद्देश्यं नियुक्तिप्राप्तिः । कारणमाधुनिकशिक्षा मुख्यतः व्यावसायिकदृष्ट्युपरि पर्यवेशितास्ति । एतेन सह बैद्धिक-प्रविधिक-कौशलादीनां विकासोऽपि वर्तते ।

**6. आधुनिकप्राविधिकशिक्षा (Modern Technological Education)**

**प्राचीनकाल**:- प्राचीनकाले प्राविधिकशिक्षायाः विशेषमहत्त्वं नासीत् । तथापि शिल्पकला, चिकित्सा, कृषिः, व्यवसायादिषु विषयेषु कौशलप्राप्तये बलं प्रदीयते स्म ।

 ISBN: 978-81-930770-3-0

**आधुनिककाल**:- सम्प्रति शिक्षाक्षेत्रे सर्वत्र सङ्गणकस्य उपयोगः भवति । शिक्षणमपि अन्तर्जालमाध्यमेन दीयते । प्रायशः प्रत्येकं कक्षायां सूचनासम्प्रेषणप्रविधेः प्रयोगः क्रियते । श्यामफलकस्थाने स्फूर्तिफलकस्य व्यवहारः प्रचलति । चिकित्सा, विज्ञानं, आभियान्त्रिकादि-विषयाणां शिक्षा प्रचलति । आहत्य एवं वक्तुं शक्यते यत् आधुनिकशिक्षा प्राविधिकशिक्षा इति । शिक्षायामपि प्राविधिकोपकरणानां बहुलप्रयोगः भवति ।

**7. सामाजिकं सांस्कृतिकञ्च वैशिष्ट्यम् (Social and Cultural Diversity)**

**प्राचीनकाल**:- प्राचीनकाले शिक्षायां सामाजिकाः संस्कृतिकाश्च विषयाः सम्मिश्रिताः आसन् । यद्यपि ब्राह्मणानामाधिक्यमासीत् तथापि गुरुकुल-नालन्दा-तक्षशीलादिषु शिक्षणसंस्थासु विभिन्नवर्गीयच्छात्राः अध्ययनमकुर्वन् ।

**आधुनिककाल**:- सम्प्रति समावेशात्मकशिक्षायाः कालः । धर्म-जाति-वर्ग-लिङ्गादिभेदं त्यक्त्वा सर्वेषां कृते शिक्षणाय अवसरः प्रदीयते ।

**8. शिक्षकप्रशिक्षणं योग्यता च (Teacher Training and Qualifications)**

**प्राचीनकाल**:- शिक्षकाणां कृते विशेषप्रशिक्षणव्यवस्था नासीत् । कारणं तेषां कार्यम् अनुभवा-धारितम् आसीत् । गुरोः चयनं ज्ञान-नैतिकता-आध्यात्मिकतादिगुणाधारेण भवति स्म । यस्य सर्वविधं ज्ञानमासीत्, शिक्षणकला च यस्य पार्श्वे अवर्तत, सः छात्रान् पाठयति स्म ।

**आधुनिककाल**:- शिक्षकप्रशिक्षणोपरि बलं प्रदीयते । शिक्षकप्रशिक्षणं, प्राविधिकज्ञानं, योग्यता, प्रमाणपत्रादीनामाधारेण उच्चशिक्षाक्षेत्रे चयनं भवति । अस्मिन् काले गुणवत्ताभिवर्ध-नाय तात्कालिकं ज्ञानं (Update Knowledge), CDP (Continuous Professional Development), अधिकप्रमाणपत्रादीनामर्जनेन भवति ।

**9. मूल्याङ्कनप्रक्रिया (Evaluation Process)**

**प्राचीनकाल**:- मूल्याङ्कनाय कापि विशाषव्यवस्था नासीत् । गुरुः छात्रस्य वैयक्तकाचरणं, ज्ञानं, व्यवहारं च दृष्ट्वा उपाधिं यच्छति स्म । शास्त्रार्थ-साक्षात्कार-तर्कादीनां माध्यमेन मूल्याङ्कनं कृत्वा उपाधिः प्रदीयते ।

**आधुनिककाल**:- सततमूल्याङ्कनव्यवस्था आगता । परीक्षणाय परीक्षणसंस्था निर्मिता । परीक्षणे शैक्षिक-सामाजिक-मानसिकक्षमतानामुपरि ध्यानं दीयते ।

**10. शैक्षिकसंसाधनं (Educational Resources)**

**प्राचीनकाल**:- प्राचीनकाले संसाधनं सीमितमासीत् । वृक्षस्याधो, सामान्यभवने, सर्वनिम्न-शैक्षिकसंसाधनं व्यवहृत्य शिक्षणं प्रचलति स्म । पुस्तकमपि सर्वेषां कृते नोपलभ्यते ।

 ISBN: 978-81-930770-3-0

**आधुनिककाल**:- अत्यधिकसंसाधनानामुपयोगः भवति। प्रयोगशाला, स्फूर्तिफलकं, संगणकं, ई-ग्रन्थालयः, ई-पुस्तकं, चलच्चित्रम्, अन्तर्जालम्, अन्यानि वैद्युतिकोपकरणानि च व्यवहृतानि भवन्ति। सम्प्रति शिक्षणसंस्थासु सर्वमपि कार्यम् अन्तर्जालमाध्यमेन (डिजिटाल) प्रचलति।

**निष्कर्षः-** शैक्षिकसंस्थायाः विशेषतः शिक्षायां गुणवत्ताभिवर्धनाय कालाधारेण विभिन्नोपायाः आदृताः। साररूपेण एवं वक्तुं शक्यते यत् प्राचीनकाले शिक्षा वैयक्तिक-नैतिक-आध्यात्मिक-विचारोपरि आसीत्, परन्तु आधुनिकशिक्षा प्राविधिक-व्यावसायिक-वैश्विकविचारधारोपरि पर्यवेशितास्ति।

**सहायकान्तर्जालसङ्केतः**


1) https://www.education.gov.in/sites/upload_files/mhrd/files/NEPFinalEnglish0.pdf

2) http://naac.gov.in/index.php/en/assessment-accreditation

3) http://naac.gov.in/images/docs/Manuals/RAF_Autonomous_Institution_Manual-21618. pdf

4)https://www.google.com/search?q=iqac+criteria&scaesv=d8c2b4a8fa54c828&rlz=1C1FKPE_enIN988IN988&sxsrf=AHTn8zp17VJTa76PECNC7YChOH6sVtjK5A%3A1746266452998&ei=VOkVaIzfPN2Q4EPkpmE8QU&oq=iqac&gslp=Egxnd3Mtd2l6LXNlcnAiBG-lxYWMqAggDMgoQABiABBgUGIcCMg4QABiABBiRAhixAxiKBTIFEA-AYgAQyChAAGIAEGEMYigUyBRAAGIAEMgoQABiABBhDGIoFMgUQABiABDIFEAAYgAQyBRAAGIAEMgoQABiABBhDGIoFSLk1UABYphBwAHgAkAEAmAHnAaAB0AaqAQMyLTS4AQHIAQD4AQGYAgSgApIHwgIKECMYgAQYJxiKBcICDhAAGIAEGLEDGIMBGIoFwgILEAAYgAQYkQIYigXCAgoQLhiABBhDGIoFwgIIEAAYgAQYsQPCAgsQLhiABBixAxjlBMICDhAuGIAEGLEDGNEDGMcBmAMAkgcDMi00oAf8HrIHAzItNLgHkgc&sclient=gws-wiz-serp

5) http://naac.gov.in/docs/Manuals/RAF_Affiliated%20_College_Manual.pdf


❀❀❀

 ISBN: 978-81-930770-3-0

# पारम्परिकसंस्कृतच्छात्राणामान्तरिकगुणविकासाय शाङ्करदर्शनस्य महत्त्वम्

डॉ. विभुदत्तमिश्रः*

**शोधसारः**

पारम्परिकसंस्कृतच्छात्रः वस्तुतः सम्प्रदायवित् एव भवति। सम्प्रदायेषु अधीतः छात्र एव शास्त्रस्य समिचीनं व्याख्यानं करोति। किन्तु अद्यतनकाले सम्प्रदायः पारम्परिकः वा इत्यस्य अर्थः भिन्नतया वर्तते । यः शास्त्री-आचार्य-विद्वान इत्याद्युपाधिप्राप्तये शास्त्रमध्येति सोऽपि पारम्परिकसंस्कृतच्छात्रः। तेषां छात्राणाम् आन्तरिकविकासाय शांकरदर्शनस्य महत्वं बहु वर्तते। आन्तरिकगुणविकासाय श्रद्धा, स्वप्रयत्नः, आत्मविश्वासः, आत्मदायित्वबोधः इत्यादीनाम् नितराम् अपेक्षा वर्तते। शङ्कराचार्येण अपि एतत् सर्वं तत्तत्स्थाने एतत् सर्वं प्रतिपादितं वर्तते। वस्तुतः पारम्परिकच्छात्राणाम् एतत् सर्वं स्वाभाविकमासीत् पुरा काले । किन्तु गते काले सामर्थ्यमपि गतम्। अतः इदानीं तत्पुनः अस्माभिरेव साधनीयः भवति। शंकराचार्याभिमता श्रद्धा एव आन्तरिकगुणविकासाय महत्त्वं भजते इति इह विशेषतया आलोच्यते।

**कूटशब्दाः** – पारम्परिकः, सम्प्रदायः, श्रद्धा, श्रवणम्, आन्तरिकविकासः, व्यक्तित्वम्।

पारम्परिकसंस्कृतच्छात्र इत्युक्ते यः गुरुकुले गुरोः समीपे शास्त्राध्ययनं करोतीति सामान्यतया एव बुध्यते। आधुनिककाले वर्तमानकाले वा अन्यापि परिभाषा भवति यत् यः शास्त्री-आचार्य-विद्वान इत्याद्युपाधिप्राप्तये शास्त्रमध्येति सोऽपि पारम्परिकसंस्कृतच्छात्रः।

आन्तरिकविकासाय इत्युक्ते आन्तरिकगुणविकासाय इति । आत्मगुणविकासाय आत्मविकासाय व्यक्तित्वविकासाय इत्यादयः पर्यायशब्दाः भवितुम् अर्हन्ति। शाङ्करदर्शनम् शङ्कराचार्येण प्रणीतं दर्शनम् अथवा शङ्कराचार्यसम्बन्धी दर्शनम् स्वीक्रीयते। शाङ्करदर्शनम् अद्वैतदर्शनम् इति प्रसिद्धम्। वस्तुतः अद्वैतदर्शनम् शङ्कराचार्यात् प्रागपि आसीत्। श्रुतिसु स्मृतिसु वा उक्तानि वचनानि शङ्कराचार्येण विस्तृततया सरलतया च व्याख्यातानि वर्तन्ते । तत्र शङ्कराचार्यस्य कः आशयः इति किञ्चित् इह आलोच्यते। के विषयाः आलोच्यन्ते इति चेत् आन्तरिकगुणविकासाय शाङ्करदर्शनस्य महत्वविषये आलोच्यते।

पारम्परिकशब्देन इह सम्प्रदाय इति अर्थः गम्यते । सम्प्रदायेसु अधीतः छात्र एव सम्प्रदायवित् भवति। स च शास्त्रस्य अर्थस्य च सम्यक् व्याख्यानं करोति। सम्प्रदायस्य वैशिष्ट्यं प्रकाशयितुं आचार्यशङ्करेण उक्तं यत् "तस्मादसंप्रदायवित्सर्वशास्त्रविदपि मूर्खवदेवो-पेक्षणीयः" इति। वस्तुतः य असंप्रदायवित् भवति सः शास्त्रस्य अनुचितमर्थं निर्धारयति व्याख्यायति च। अतः आचार्येण उक्तं य असम्प्रदायवित् सर्वशास्त्रवित् चेदपि मूर्खः भवति। तस्य उपेक्षा कर्तव्या।

मनुष्यस्य जीवने धर्म-अर्थ-काम-मोक्षा इति चतुष्टय पुरुषार्थाः वर्तन्ते । तेषु मोक्षः परमपुरुषार्थः नित्यत्वात्। मोक्षः ज्ञानात् एव सम्भवति इति शङ्करचार्यस्य अभिमतम्। अतः

*सहायकाचार्यः, वेदान्तविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी

 ISBN: 978-81-930770-3-0

ज्ञानमेव आन्तरिकविकासस्य मूलम् । तच्च ज्ञानम् आत्मज्ञानमेव । श्रद्धा अस्ति चेत् ज्ञानप्राप्तिः भवति । श्रद्धावान् लभते ज्ञानम्[2] इति । अर्थात् यस्य श्रद्धा अस्ति तस्य एव ज्ञानाधिकार अस्ति । इदानीमिह विचार्यः विषयः वर्तते का नाम श्रद्धा इति। वेदान्तसारे श्रद्धा इत्यस्य विश्वासः इत्यर्थः । गूढार्थदीपिकायामपि वेदान्तवाक्ये विश्वासः एव श्रद्धाः । कठोपनिषदः शाङ्करभाष्ये श्रद्धा-शब्दस्य आस्तिक्यबुद्धिरिति अर्थः लभ्यते । अस्तित्वपरकतया या बुद्धिः सा आस्तिक्यबुद्धिः । आस्तिक्यबुद्धिः येषां ते आस्तिकाः । किमाधारीकृत्य आस्तिक्यबुद्धिः भवेदिति पुनः जिज्ञासा उपजायते । धर्मानुसारम् ईश्वरे आस्तिक्यबुद्धिः यस्य स आस्तिकः । धर्मशास्त्रदर्शनशास्त्रानुसारं वेदे आस्तिक्यबुद्धिः यस्य स आस्तिकः । किन्तु स्वामिविवेकानन्दमते आत्मनि नाम स्वस्मिन् एव आस्तिक्यबुद्धिः यस्य स आस्तिकः । अर्थात् आत्मविश्वास एव आस्तिक्यबुद्धिरिति भवति । तेन श्रद्धा इत्यस्य साक्षात् अर्थो भवति आत्मविश्वासः ।

आत्मविश्वासस्य मुख्यतया त्रीणि उपादानानि भवन्ति । यथा -

1. आत्मप्रभावोत्पादकता/आत्मप्रभावकारिता (Self-Efficacy)
2. आत्मदायित्वबोधः/स्वदायित्वबोधः (Self-Responsibility)
3. आत्मनिर्देशना/स्वलक्ष्यचयनम् (Self-Direction)

1) **आत्मप्रभावोत्पादकता/आत्मप्रभावकारिता (Self-efficacy)**

Self-Efficacy इति शब्दः मनोवैज्ञानिकशब्दः भवति । अस्य अनुदितरूपं भवति आत्मप्रभावोत्पादकता अथवा आत्मप्रभावकारिता इति । वस्तुतस्तु मनोविज्ञाने आत्मप्रभावो-त्पादकता भवति कश्चन सिद्धान्तः । अस्य सिद्धान्तस्य प्रतिष्ठाता भवति Albert Bandura महोदयः । साधारणतः वयं स्वजीवने सुखमिच्छामः । किन्तु अनायासेन कथं सुखं प्राप्नुयात् तदेव चिन्तयामः । कुत्रापि कार्ये सामान्यमपि कष्टमनुभवामश्चेत् तत्कार्यं त्यजामः । किन्तु यस्य आत्मप्रभावोत्पादकतागुणः वर्तते सः कष्टकार्ये प्रयत्नं विदधाति । अर्थात् अहं चेष्टे इति भावना तस्य मनसि जायते । यदा कष्टकार्यकरणे विघ्नाः उपजायन्ते तदा कार्यं न त्यक्त्वा चेष्टा यत्नं वा करणमेव आत्मप्रभावोत्पादकता भवति । आत्मविश्वासस्य प्रथमलक्षणम् आत्मप्रभावकारिता भवति । आत्मप्रभावकारितां विना किमपि नूतनं कार्यं कर्तुं नैव शक्यते । अहं कर्तुं शक्नोमि, मम सामर्थ्यं वर्तते इति भावना एव आत्मप्रभावकारिता आत्मप्रभावोत्पादकता वा इति उच्यते ।

**आत्मदायित्वबोधः/स्वदायित्वबोधः (Self-Responsibility)**

आत्मविश्वासस्य द्वितीयोपादानं भवति स्वदायित्वबोधः । दायित्वबोधः परिपक्वबुद्धेः परिचायकः भवति । आत्मविश्वासे दायित्वबोधस्य स्वरूपं सप्तधा भवति । यथा-

**स्वाभिलाषपरिपूर्णतायाःदायित्वबोधः (Achieving of my Desire is my Responsibility)**

 ISBN: 978-81-930770-3-0

अभिलाषा इत्यस्य अन्यत् नाम कामना, इच्छा। बाल्यकाले इच्छा अस्माकं भवति; किन्तु इच्छपूर्तिकारः पिता अथवा माता अथवा अन्यः कोपि भवति । किन्तु प्राप्ते वयसि अस्माकं इच्छायाः प्ररिपूर्णे अस्माकमेव दायित्वं वर्तते । तत्र माता पिता वा किमपि कर्तुं न शक्नोति । स्वाभिलाषपरिपूर्णतायाः दायित्वं स्वस्य उपरि एव भवति । यदि अन्येन केनापि स्वाभिलाषः परिपूर्यते तदा जनः दयापात्रं भवति। तस्य आत्मविश्वासः नैव बर्धते। अतः स्वाभिलाषपरिपूर्णता स्वस्य एव दायित्वं भवति।

**स्वकार्योत्कृष्टतायाःदायित्वबोधः (Quality of my work is my Responsibility)**

अस्माकं कार्यमेव अस्माकं परिचयः । जीवने कुत्रापि साफल्यं प्राप्तुम् इच्छामश्चेत् तत्र अस्माकं कार्यस्य उत्कृष्टता गुणवत्ता वा एव प्रमाणम्। स्वजीवने यत् किमपि कार्यं अस्माभिः क्रियते तत्कार्यमेव अस्माकं परिमापकं भवति । अस्माकं कार्यं दृष्ट्वा एव अन्यः अस्मान् परिमापयितुं पारयति । अतः स्वकार्यस्य उत्कृष्टता कथं स्यात् तदपि स्वदायित्वं भवति । साधारणतः जीवने परिलक्ष्यते यत् कुत्रापि कार्ये कापि त्रुटि जाता चेत् अन्यान् दूषयामः। एवञ्च स्वपरीक्षायाः फलमपि सम्यक् नागतं चेत् तत्रापि मूल्याङ्कनविधिं मूल्याङ्कनकर्तारं वा दूषयामः। एतत् अनुचितं भवति। अतः स्वकार्यस्य उत्कृष्टता कथं भवेत् इत्यपि स्वदायित्वबोधे अन्तर्भवति।

**संपर्कस्य दायित्वबोधः (Quality of my Communication is my Responsibility)**

जीवने संपर्कस्य माहात्म्यं वर्तते। समाजे जीवामः, संपर्कबलादेव। सर्वैः सह संपर्कः कथम् उत्तमं भवेत् तदपि स्वदायित्वं भवति। यदा कदा अपि अस्माकं संपर्कः केनचित् सह नश्यति तदा अन्यस्योपरि दोषारोपणं क्रियते । तदा एतत् बोधव्यं भवति यत् मम संपर्कस्य दायित्वं मम एव अस्ति। केन सह कथं संपर्कः स्थापनीयः इति स्वयमेव चिन्तनीयम् भवति।

**व्यवहारस्य दायित्वबोधः (Quality of my Behavior is my Responsibility)**

अन्यान् प्रति यथा व्यवह्रियते तथैव व्यवहारः प्राप्यते । अन्ये यदि अस्मान् असाधु आचरन्ति तत्र अस्माकम् आचरणे एव दोषः वर्तते। किन्तु अस्माकं स्वभावः वर्तते अन्यान् एव दूषयामः। अतः स्वव्यवहारस्य दायित्वं स्वयमेव वोढव्यम्।

**समयबोधः (My Time is my Responsibility)**

साधारणजीवने सर्वदा वयं आक्षेपं कुर्मःयत् मम समय नास्ति। किन्तु जगति सर्वेषां कृते समयः समानमेव। किन्तु तस्य समयस्य व्यवहारं सर्वैः सम्यक्तया कर्तुं न पारयन्ति। अधिकांश-समयः जालपुटे व्ययीकुर्मः । अथच वदामः समयः न लभ्यते। अतः समयस्य सदुपयोगः अपि स्वस्य उपरि भवति।

**मूल्यबोधः (My Value is my Responsibility)**

 ISBN: 978-81-930770-3-0

मनुष्यः स्वभिमानी भवति । यत्र तस्य मूल्यं (importance) न भवति तत्र तस्य दुःखं जायते । किन्तु मूल्यं कथं भवेत् तदपि स्वस्य अधीने वर्तते । कथं व्यवह्रियते चेत् मूल्यं वर्धते इति स्वयं चिन्तनीयम् । तथा च वर्तीतव्यम् भवति । अतः स्वस्य मूल्यम् अपि स्वदायित्वं भवति।

**सुखस्य दायित्वबोधः (My happiness is my Responsibility)**

मम मनसः सुखस्य कारणम् अहम् एव । तथैव दुःखस्य कारणमपि अहमेव । मम चिन्तनमेव मम शान्तेः अशान्तेः वा कारणं भवति । किन्तु सर्वदा वयं चिन्तयामः अन्यस्य कृते दुःखी सुखी वा भवाम । सर्वदा एतत् मनसि निधातव्यं भवति यत् मम कार्यमेव मम सुखस्य दुःखस्य वा कारणं भवति । अतः स्वसुखस्य दायित्वं स्वयमेव नेतव्यम् भवति ।

1. **आत्मनिर्देशना/स्वलक्ष्यचयनम् (Self-Direction)**

जीवने किमपि लक्ष्यं भवेदेव । विना लक्ष्यं जीवनस्य स्वारस्यं न भवति । यदि लक्ष्यं निर्धारितं नास्ति तर्हि किं कर्तव्यं किं न कर्तव्यमिति चिन्तयितुं न शक्यते । अतः जीवने लक्ष्यं निश्चेतव्यम्। एतस्य कृते स्वस्य सर्वोत्कृष्टम् आदर्शम् अनुसरणं करणीयम् इति विवेकानन्दस्य मतम्। ज्ञानप्राप्त्यर्थं कथं वर्तितव्यम् इति बोधयति –

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।।** - (गीता5/34)

गुरुं प्राणामादिकं विनिवेद्य सेवां च कृत्वा प्रश्नः कर्तव्यम् । तदा एव गुरुः अपेक्षितं ज्ञानं ददाति । छात्रजीवने व्यक्तित्वनिर्माणाय उपायाः –

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।।**
**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।**
**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।**
**भवन्ति सम्पदं दैवीमभिजातस्य भारत ।।** - गीता. 16/1-3)

भयशून्यता, अन्तःकरणंशुद्धिः, शास्त्रतः आचार्यतः ज्ञानप्राप्तिः, मनसः एकाग्रता, दानं, बाह्यकरणानां निग्रहः, यज्ञः, स्वाध्यायः, तपः, सरलता, अहिंसा, सत्यम्, अक्रोधः, सन्न्यासः, अन्तःकरणनिग्रहः, परस्मै पररन्ध्रप्रकटीकरणाभावः, दुःखितेषु कृपा, विषयसन्निधौ अविक्रिया, अक्रौर्यम्, लज्जा, वाक्पाणिपादादीनाम् अनावश्यकव्यवहाराभावः, तेजः, क्षमा, धृतिः, शौचम्, अद्रोहः, अतिमानाभावः इत्यादि गुणाः व्यक्तित्वविकासाय भवन्ति । सर्वकर्मणां सिद्धये पञ्चकारणानि- **अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।**
**विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ।।**[3]

साधारणतया छात्राणां स्वभावः वर्तते यत् परीक्षायाः प्राक् एव प्रस्तुतिः क्रीयते । यदा परीक्षाकालः आगच्छति तदा एव पठनमारभ्यते । आवर्षं किमपि श्रमं न कुर्वन्ति । किन्तु

 ISBN: 978-81-930770-3-0

परीक्षाकाले एव अधिकतया मानसिकचापं स्वीकुर्वन्ति । वस्तुतः आवर्षं आसत्रं किञ्चित् किञ्चित् अध्ययनं क्रीयते चेत् परीक्षाकाले भारः न भवति । अधुना तु छात्राः विपरीतमेव आचरन्ति । देवलयं गत्वा देवं प्रार्थयन्ति यत् परीक्षायां कथञ्चित् उत्तीर्णः भवेत् इति । श्रीमद्भग-वद्गीतायामुक्तमस्ति यत् सर्वविधकार्याणां साफल्ये अन्तिमं कारणं तु दैवं भवति । कार्यस्य साफल्यार्थं अधिष्ठानं, कर्ता, करणं, विविधा चेष्टाः, दैवं च पञ्चकारणानि भवन्ति । तत्र तु दैवकारणं पञ्चमत्वं भजते । अतः शंकराचार्यः कथयति यत् साफल्यार्थम् आधारः, कर्ता, करणं, चेष्टा च आदौ सम्यक्तया पालनीयाः स्वाधीनत्वात् । तदनन्तरं एव दैवस्य कारणत्वं भवति ।

आन्तरिकगुणविकासाय वेदान्ताभिमतस्य श्रवणस्यापि महत्त्वं वर्तते । वेदान्ते श्रवणं नाम गुरूपदिष्टवेदान्तवाक्येषु तात्पर्यावधारण्[5] । अर्थात् गुरोः वाक्यस्य केवलं श्रवणं नास्ति अपि तु वाक्यस्य किं तात्पर्यं तदेव चिन्तनीयं भवति । अत्र तात्पर्यावधारणं तदा एव भवति यदा समनस्कः कश्चित् भवेत् । आशयस्तु छात्रः समनस्कः एव भवेत् । अन्यमनस्कः तिष्ठति चेत् विद्याग्रहणं धारणं च नैव भवति । वेदान्ताभिमतं श्रवणमित्युक्ते समनस्कतया विषयावगमनम् ।

मनुष्यः आत्मानम् इन्द्रियैः सह समानमिति चिन्तयति । सर्वदा इन्द्रियाणाम् अनुभव एव आत्मन अनुभव इति साधारणानुभवः । किन्तु आचार्य शंकरः निर्वाणाष्टके कथयति अहं न मनः, न बुद्धिः, न अहंकारः, न श्रोत्रं, न जिह्वा इत्यादि । यथा –

**"मनोबुद्ध्यहंकारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।**
**न च व्योमभुमी न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।**[6]"

अपि च जीवने किम् अत्यन्ततया दुर्लभमिति चेत् उच्यते मनुष्यत्वं मुमुक्षुत्वं महापुरुष-सान्निध्यम् इति । अर्थात् जीवने एतत् त्रयं दुर्लभं भवति । उक्तं च शंकराचार्येण –

**"दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् ।**
**मनुष्यत्वं मुमुक्षुत्वं महापुरषसंश्रयः ।।**[7]" इति

अतः छात्राः स्वजीवनस्य महत्त्वम् एतस्मात् ज्ञातुं शक्नुवन्ति । मनुष्यत्वं एव मनुष्यस्य परिमापकं भवति । अपि च कर्मद्वारा चित्तशुद्धिः एव भवति न वस्तुसिद्धिः । विचारेण एव वस्तुसिद्धिः भवति इति शंकराचार्यस्य मत् । उक्तं च –

**"संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये ।**
**यत्यतां पण्डितैर्धीरैरात्माभ्यास उपस्थितैः ।।**
**चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।**
**वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः ।।**[8]"

शंकराचार्यः स्वप्रयत्नेन एव सर्वं करणीयमिति उपदेशं प्रदयामास । स्वप्रयत्नं विना न किमपि सिध्यति । अतः स्वप्रयत्नः नितान्तः करणीयः एव । अतः उक्तं च विवेकचूडामणौ –

**"ऋणमोचनकर्तारः पितुः सन्ति सुतादयः ।**
**बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन ।।**
**मस्तकन्यस्तभारादेर्दुखमन्यैर्निवार्यते ।**

**क्षुदादिकृतदुःखं तु विना स्वेन न केनचित् ।।**[9]"

एवं च आन्तरिकगुणविकासाय श्रद्धा, स्वप्रयत्नः, आत्मविश्वासः, आत्मदायित्वबोधः इत्यादीनाम् नितराम् अपेक्षा वर्तते । शङ्कराचार्येण अपि एतत् सर्वं तत्तत्स्थाने एतत् सर्वं प्रतिपादितं वर्तते । वस्तुतः पारम्परिकच्छात्राणाम् एतत् सर्वं स्वाभाविकमासीत् पुरा काले । किन्तु गते काले सामर्थ्यमपि गतम् । अतः इदानीं तत्पुनः अस्माभिरेव साधनीयः भवति । एवं च पारम्परिकछात्राणाम् आन्तरिकगुणविकास्य शाङ्करदर्शनस्य महत्त्वं स्वमत्या प्रतिपादितम् । इति शम् ।

**<u>सहायकग्रन्थसूची</u>**


1. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, सं. 2068,ISBN 81-293-0096-6.
2. दानमहिमा-अंक, संख्या-1, वर्ष 85, गीताप्रेस, गोरखपुर, 2011.
3. रामायणम्, तिलक-शिरोमणि-भूषणेति टीकात्रयेणोपस्कृतम्, श्रीनिवास शास्त्री, परिमल पब्लिकेसन, दिल्ली, 2020, ISBN – 978-81-7110-020-0.
4. सिन्हा सुनीता, पालि साहित्य में दान पारमिता : एक अनुशीलन, vol-19, Issue- July, page No. 43-48, Bodhi-path, 2020.
5. पासवान डां. चन्द्रशेखर, बौद्ध धर्म में दान : समीक्षात्मक अवलोकन, vol-19, Issue- July, Page No.79-90, Bodhi-path, 2020.
6. उपाध्याय आचार्य बलदेव, पुराण विमर्श, चौखम्बा विद्याभवन, वाराणासी, 1978.


❀❀❀

 ISBN: 978-81-930770-3-0

# शिक्षाया आन्तरिकगुणवत्तापरिशोधनाय व्याकरणशास्त्रे त्रिमुनिचिन्तनम्

**डॉ राहुलपोखरियालः***

व्याकरणं विना कस्मिन्नपि शास्त्रे सुगतिः नैव भवितुमर्हति। भगवतः वेदपुरुषस्य षडङ्गानि सन्ति। यथा-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**[1]

तेषु षडङ्गेष्वपि व्याकरणशास्त्रं प्रमुखं स्थानं प्रभजते। प्रमुखं व्याकरणं स्मृतं यथा मानवस्य आशरीरे मुखं प्रमुखं भवति, तद्वद्व्याकरणमपि। इतिहासविषये-

**श्रूयते यद् एषा परम्परा अनादिकालाद् आगच्छन्ती वर्तते। सर्वप्रथमं ब्रह्मा इमां शब्दमयीं विद्यां बृहस्पतये अदात्, बृहस्पतिरपि इन्द्राय अयच्छत्, इन्द्रश्च ऋषिभ्यः।**

इत्थं प्रकारेण विद्येयं प्रसृता जाता। अस्यां धरायामपि बहवः मनीषिणः व्याकरणशास्त्राणि अलेखिषुः। तेषां कानिचन नामानि-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनः।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥**

व्याकरणान्यपि बहुविधानि जातानि, ऐन्द्रव्याकरणं चान्द्रव्याकरणं पाणिनीयव्याकरणं शाकटायनव्याकरणं चेत्यादीनि। परं च एतेषु पाणिनीयव्याकरणमेव समाजे आद्रियते, वैज्ञानिकत्वात् सूक्ष्मचिन्तनत्वाच्च। अतः श्रूयते यत् पाणिनीयः काल एव उत्कर्षकाल आसीत्। कालोयं संस्कृतव्याकरणस्य सर्जनात्मकः कालः, इदानीमेव महर्षिपाणिनिना अष्टाध्यायी नामकः अद्वितीयः ग्रन्थः प्रणीतः। महर्षिकात्यायनेनापि वार्तिकानि विरचितानि, भगवता पतञ्जलिना महाभाष्यं व्यलेखि। प्रत्युत अस्यैव युगस्य लक्षश्लोकात्मकः विशालकायः संग्रहः नामको ग्रन्थः लुप्तोजायत। कियता परिश्रमेण आचार्यव्याडिना ग्रन्थोयं व्यरचि, अस्योल्लेखः व्याकरणग्रन्थेषु उद्धरणेष्वेव लभ्यते। संस्कृतभाषायाः व्याकरणनिर्माणस्य कालोयं स्वर्णकालः। संस्कृतभाषा अस्य कालस्य लोकभाषा आसीत्। परं च शनैः शनैः अस्यैव युगान्ते भाषायां विकृतयः अजायन्त। अतः भाषेयं चिरं जीवेत्, एतदर्थं पाणिनिना सूत्राणि लिखितानि तथापि भाषायाः विस्तृतक्षेत्रबाहुल्यात् कुत्रचित् सूत्राणां प्रवेशः नाभवत्। तदर्थं कात्यायनमुनिना वार्तिकानि निवेशितानि पुनश्च भगवता पतञ्जलिना वार्तिकानां सूत्राणां चोपरि महाभाष्यं विरचितम्। इत्थं प्रकारेण विपुलव्याकरणस्य स्वरूपं निर्मितम्। अस्य सकलव्याकरणग्रन्थस्य मूलाधाराणि चतुर्दशसूत्राण्येव, यानि च भगवता पाणिनिना अखण्डतपसा भगवता शिवेन प्राप्तानि , अतः

*पी.जी.टी. संस्कृतम्, ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

 ISBN: 978-81-930770-3-0

माहेश्वरसूत्राणि इत्यपि कथ्यन्ते। अतः पाणिनेः वैदुष्यस्य तुलनेतरैः सार्धं कर्तुमेव न शक्यते। तस्य स्वकीयविषये गाम्भीर्यचिन्तनस्य भाषातत्त्वान्वेषणस्य च प्रतिभायां सर्वतोभावेन समे मुग्धाः सन्ति। अस्याः प्रतिभायाः विचारणाय पाणिनेः एकं सूत्रं नूनमेव अवलोकनीयम्। **उदक् च विपाशः**[२] अनेन सूत्रेण विपाशशब्दात् अण् अञ्, च प्रत्ययौ भवतः। विपाश्शब्दस्यार्थः कूपः, औत्तरेयः कूपः भवति चेत् अञ् प्रत्ययः दाक्षिणात्यः भवति चेत् अण् प्रत्ययः। अर्थस्तु विपाश्शब्दस्य एक एव परं च स्वरे भेदः, औत्तरेयः विपाश्शब्द आद्युदात्तः दाक्षिणात्यः विपाशशब्दश्च अन्तोदात्तः। सूक्ष्मस्वरस्यैव परीक्षणं पाणिनेः गाम्भीर्यनिरीक्षणस्य परिणामो वर्तते। अत एव काशिकाकारेण स्वकीया भावना प्रकटिता **(महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य)**[३]। आचार्यपाणिनिः संस्कृतभाषायाः शब्दानां नियमनमकार्षीत्। तथापि वाणीयं विस्तृता व्यापिका च। महाभारतस्य टीकाकारः देवबोधः कथयति, यत् माहेन्द्रव्याकरणम् अर्णवं विद्यते यस्य तुलनायां पाणिनीयव्याकरणं गोष्पदमात्रम्। यथा-

**यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्।**
**पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे॥**

अस्मादेव ज्ञायते यत्, गोष्पदभूतं पाणिनीयव्याकरणम् अतुलशब्दानां सिद्ध्यर्थं समर्थमस्ति तर्हि महेन्द्रव्याकरणं कियच्छब्दानां विश्लेषणाय परीक्षणाय च समर्थं न स्यात्? अस्य प्रश्नस्योत्तरं नैव प्रदातुमर्हति कश्चित्। फलतः देववाण्याः शब्दकोषः व्याख्यातपाणिनिशब्दपुञ्जैः अधिकविस्तृतं विद्यते। तथापि पाणिनिना अखिलशब्दानां ज्ञानाय वैज्ञानिकमद्वितीयं च शास्त्रं प्रतिपादितम्। इतः परम् सूत्रणामुपरि विशेषतया अभिधानं वार्तिककारस्य कात्यायनस्य गतम्। वार्तिककाराः नैका आविर्भुवन्। वार्तिकानां परिज्ञानाय पतञ्जलिकृतं महाभाष्यमन्वेक्षणीयम् उत महाभाष्ये सूत्राणां व्याख्यानं तथा नास्ति यथा वार्तिकानाम्। महाभाष्यकारस्य पुरस्तात् पाणिनिसूत्रणामुपरि लघुबृहद्वार्तिकानि आसन्। पतञ्जलिना एतेषां वार्तिकानां सूत्रैः सार्धं संगतिविसंगती च वीक्ष्य स्वकीयं लाघवपूर्णमतमुपस्थापितम्। अतः पतञ्जलेः व्याकरणं तुलनात्मकं व्याकरणमपि उच्यते। तस्य युगस्य वार्तिककाराणां मतानां तुलनां विधाय समालोचनात्मकमध्ययनमपि विहितम्। एतेषु कात्यायनस्य नाम प्रमुखं विद्यते। अतः नागेशभट्टेनापि वार्तिकस्य लक्षणं कृतम्। यथोक्तम्-

**सूत्रेऽनुक्त-दुरूक्त-चिन्ताकरत्वं वार्तिकत्वम्।**
**उक्तानुक्त-दुरूक्त चिन्ताकरत्वं हि वार्तिकत्वम्॥**

द्वयोः लक्षणयोः तात्पर्यमेकमेव। सूत्रेषु यत् उक्तं, यत् नोक्तं (अनुक्तम्), यत् अनुचितम् (दुरूक्तम्) सर्वेषां विषयाणां चिन्तनं यत्र भवति तदेव वार्तिकम्। मुनित्रयस्य व्याकरणविषये परस्परं सम्बन्धः कीदृशः आसीत् तदर्थं श्लोकोयं स्मर्तव्यः।

**यत् विस्मृतमदृष्टं वा सूत्रकारेण तत् स्फुटम्।**

 ISBN: 978-81-930770-3-0

**वाक्यकारो ब्रवीत्येवं तेनादृष्टं च भाष्यकृत् ।।**

सूत्रकारस्य विस्मृतस्य अदृष्टस्य वा विषयस्यैव स्पष्टतया प्रतिपादनं वार्तिककारः विदधाति। तथा च एतयोः पाणिनिकात्यायनयो अदृष्टस्यैव विवेचनं भाष्यकारेणापि अवोचि-

**इह किञ्चित् क्रियमाणं चोद्यते किञ्चिच्च क्रियमाणं प्रत्याख्यायते ।**[४]

कात्यायनात् पूर्वं व्याडि-आचार्येण संग्रहः नामको ग्रन्थः प्रणीतः । यत्र च पाणिनीयव्याकरणस्य दार्शनिकपक्षस्य विवेचनं विहितम् । **सिद्धे शब्दार्थसम्बन्धे**[५] महाभाष्ये अस्य वार्तिकस्य व्याख्यानसन्दर्भे पतञ्जलिना सिद्धशब्दस्य यत् विवेचनं सुस्पष्टं, तस्मादेव अवबुध्यते, कात्यायनस्योपरि व्याडेः प्रभावः कीदृशः । सिद्धशब्दस्य नित्यार्थः इति प्रयोगः कात्यायनेन संग्रहनामकाद् ग्रन्थादेव स्वीकृतः । कात्यायनस्य देशः कालश्च निश्चेतुं न शक्यते, कथासरित्सागरे ग्रन्थे पाणिनिकात्यायनयो एकत्र निवासस्य या चर्चा विधीयते, सा काल्पनिकैव । कात्यायनस्य देशविषये महाभाष्यस्योक्तिः मन्तव्या- **तद्धितप्रिया हि दाक्षिणात्याः**[६] पाणिनीय-व्याकरणस्योदयकालस्यान्तिमः ग्रन्थः पतञ्जलिविरचितं महाभाष्यं विद्यते । ग्रन्थोयं व्याकरण-विषयकप्रौढपाण्डित्यार्थं, गम्भीरार्थविवेचनार्थं च बुधैः सर्वदाश्रितः । शैक्षणिकगुणवत्तासन्दर्भे संस्कृतव्याकरणं व्याकरणे एतादृशानि बहून्युदाहरणानि लभ्यन्ते, यैः पाणिनीयसमुचितोदाहरणैः कृतबहुप्रयोगैः शिक्षणसंस्थासु परिवर्तयितुं शक्येते । यथा सम्प्रति बह्व्यः समस्याः शिक्षणसंस्थासु विलोक्यन्ते । यथा छात्राणां बहुविधसमस्याः, शिक्षकाणामान्तरिकसमस्याः, विद्यालयस्य भौतिकीसमस्या, एवंविधानां समस्यानां समाधानं कथन्न व्याकरणेन भवितुं शक्नुनात् । यथा वयं जानीमहे शिक्षणाय सर्वादौ किमपेक्षते, छात्राः विद्यालयः शिक्षकाश्च । एतत् त्रितयमेव शिक्षणसंस्थानत्वेन स्वीक्रियते । अहं चिन्तये यत् पाणिनिनापि स्वकीये अष्टाध्यायीनामके ग्रन्थे सर्वादौ यत्सूत्रं प्रणीतं तत्रापि त्रितयत्त्वेन मनोवैज्ञानिकं चिन्तनं विहितम् । यथा **वृद्धिरादैच्**[७] इति प्रसिद्धतमं सूत्रं प्रायः सर्वैः जनैः पठ्यते श्रूयते च वा । सूत्रार्थस्तु आदैच् वृद्धिः संज्ञा स्यादिति । आ ऐ औ च वृद्धिसंज्ञकाः भवन्तीति तात्पर्यम् । मनोवैज्ञानिकं गवेषणात्मकं चिन्तनेनार्थः इतोपि प्रतिभाति । यतोहि ऋषिभिः यल्लिख्यते तत्रानेकार्थत्वं समाजोपकारकं चातः वृद्धिरादैच् इत्यस्य सूत्रस्यार्थं विलोडयामश्चेत् समाजे वृद्धिपदेन वर्धनं समभिवर्धनं वा स्वीक्रियते । जिज्ञासते कस्य वर्धनं तदा त्रितयमाभिमुख्ये समायाति आ ऐ औ च। एतैः वर्णैः किमाक्षेपणीयम् । तर्हि आ-पदं आचार्यपदवाच्यम्, ऐ-पदं शैक्षणिकसंस्थापदत्वेन स्वीकर्तव्यम्, औ-पदं छात्रपदवाच्यम् । एवंजातीयकेन नवमर्थान्तरं स्वीकर्तुं शक्यते यत् आचार्याणां शैक्षणिकसंस्थानां छात्राणां च सततं संवर्धनं स्यादिति वृद्धिरादैच् सूत्रार्थः । एतावता पाणिनिना सर्वादौ एव तद्विषये व्यापकं चिन्तनमकारि । एवमेव बहुषु सूत्रेषु शैक्षणिक-गुणवत्तासन्दर्भे व्यापकानि चर्चापदानि सामान्यतः पाठनकाले अनुभवितुं शक्यन्त एव । यथा साम्प्रतिकसमये छात्राः कथं पठेयुः, विद्यालये गत्वा किं च दायित्वं तेषाम्, आचार्याणां कक्षासु गत्वा पाठश्रवणमेव किं छात्रगुणवत्तोपवर्धनमिति । द्वितीयं च छात्रास्तु कक्षासु प्रत्यहं समायान्ति किन्तु तेषां पाठयितॄणामपि दायित्वं किं केवलं छात्रेभ्यः

 ISBN: 978-81-930770-3-0

पाठप्रबोधनमेव। इत्यादिप्रमुखविषयेषु पाणिनिना सङ्केतितमेव। तथाहि **आख्यातोपयोगे**[८] इति कारकोपदिष्टं सूत्रं मनसिकृत्वा छात्राध्यापकयोः कथं भाव्यमिति ज्ञातुं पारयामः। सूत्रार्थस्तु नियमपूर्वकविद्यास्वीकारे वक्तुः अपादानसंज्ञा भवति। उपाध्यायात् अधीते इत्युदाहरणं तत्रोपात्तम्। अनेन किं ज्ञायते यत् नियमपूर्वकं विद्याप्रदानं यदा अध्यापकेन क्रियते यथा च छात्रैः तथैवोच्चारितमनुगृह्यते, तदा यो वक्ता भवति, अध्यापको भवति तस्यापादनसंज्ञा करणीया। एवं प्रकारणेन आचार्यपाणिनिना छात्राध्यापकयोः मध्ये पठनपाठनवेलायां कीदृशः समर्पणभावो भूयादिति वृत्तिमाध्यमेन व्याख्यातम्।

एवमेव भाष्यकारेणापि पतञ्जलिना विरचिते महाभाष्यग्रन्थे कतिपयेषु स्थानेषु शैक्षणिकगुणवत्ताविषये व्यगादि। यथा चतुर्धा विद्योपयुक्ता भवति-

**आगमकालेन, व्यवहारकालेन, स्वाध्यायकालेन, प्रवचनकालेन च।**[९]

अत्र शिक्षां प्राप्तुं के के उपाया व्यवस्थिताः सन्तीति युक्तियुक्तरूपेण ज्ञातुं शक्यते। यदि कश्चन छात्रः विद्यालयं महाविद्यालयं प्रति याति तदा तेन किं चिन्तनीयम्। किं वा सर्वं ज्ञानं गुरुभिरेवावाप्यते वा, समग्रं पुस्तकं पठित्वापि किं तत्क्षणमेव पुस्तकस्थं ज्ञानं बुद्धौ तिष्ठति न वा। एतद्विषये भाष्यकारेण वैज्ञानिकपद्धत्या यद्यत् प्रकाशितं तत्तदिदानीं विद्यालयेषु महाविद्यालयेषु ये अधीयानाः छात्राः सन्ति तैः नूनमेव पठनीयम्। सर्वादौ कापि विद्या आगमकालेनाधिगम्यते, अर्थात् विद्यालयं गत्वा गुरुभिरध्येतव्यम्, गुरुमुखाद् यन्निस्सरति तद्ध्यानेनावगम्य बुद्धावधारणीयमिति सर्वादौ कर्तव्यमेतच्छात्राणाम्। ततः परं व्यवहारकालेन विद्यावगन्तव्या परिश्रमेण, पाठं प्रपठ्य स्वमित्रेण साकमधिगतविषयस्य परिचर्चा विधेया। तस्माल्लब्धबुद्धि-विषयज्ञानं परिपुष्यति। तथा च तद्विषयस्य अन्येऽपि केचन पक्षा दृढीभवन्ति। तृतीयस्तु स्वाध्यायकालेनापि विद्या फलवती भवति। प्राप्तावकाशे मनोभावेन जनेन यथास्वसामर्थ्यादि यथामनीषं तत्तद्विषयाः प्रकाशनीयाः। तस्मादपि ज्ञानमितोपि परिवर्धमानं विलक्ष्यते। तुरीयस्तु प्रवचनकालेनान्तिमेन कारकेण विद्योपयुक्ता भवति। कालेन गम्यमानेन स्वस्थचर्चया च सह स्वयमेव ज्ञानं संजायते। अतः एवंजातीयकेन भाष्यकृतवैज्ञानिकपद्धतिनिर्धारणेन छात्रावस्थात आरभ्य जीवनान्तकालपर्यन्तं कश्चन जनोऽधीते। विद्यालयेषु महाविद्यालयेषु च भाष्यनिर्णीताया विद्यावगमनदक्षतायाः समावेशः क्रियते चेन्निश्चितमेव छात्रेषु ज्ञानप्राप्तिजिज्ञासायाः दिशानिर्देशो विशिष्टरूपेण प्राप्यते।

**पादटिप्पणी**

1. पा.शि. - 41,42
2. अष्टा.सू.सं - 4/2/74
3. काशिका

 ISBN: 978-81-930770-3-0

4. महा-भा. 3
5. महा-भा. 9
6. महा-भा. 1
7. अष्टा.सू.सं -1/1/1
8. अष्टा.सू.सं – 1/4/29
9. महा-भा. 1

## सहायकग्रन्थसूची


1. अष्टाध्यायी – डॉ. नरेशझा, चौखम्बा सुरभारती प्रकाशन।
2. महाभाष्यम् - चारूदेवशास्त्री, मोतीलालबनारसीदास।
3. वैयाकरणसिद्धान्तकौमुदी - श्रीपालकृष्णपंचोली, चौखम्बासंकृतसीरीजऑफिस, वाराणसी।
4. काशिकाप्रकाशिका - अजयकुमारझा, चौखम्बा सुरभारती प्रकाशन।


❀❀❀

 ISBN: 978-81-930770-3-0

# शिक्षार्थिनामभिवृद्धये विवेकविलासस्य योगदानम्

**डॉ. जयदेवदिण्डा***

**०. उपोद्घातः**

जिनदत्तसूरिणाविवेकविलासेप्रायः सर्वमपि जनोपकारकं विषयजातं प्रतिपादयति । गहनानि शास्त्रतत्त्वानि सामान्यजनानामपि यथा अवगतिर्भवेत्तथा सरलतया ग्रन्थेऽस्मिन् निरूपितानि। आचार्येणानेन न केवलं श्रवकान् अपि तु सामान्यजनान् उद्दिश्य ग्रन्थोऽयं व्यरचि। मनुजैः जन्मनः मृत्युपर्यन्तं कथं व्यवहर्तव्यम् इत्यस्मिन् विषये ग्रन्थेऽस्मिन् उपदिदेश। दैनिकजीवने उपयुक्तानि सर्वाण्यपि तत्त्वान्यत्र निरूपितानि विद्यन्ते। ग्रन्थस्यास्य प्रारम्भे एवोक्तं ग्रन्थकृता, यदयं ग्रन्थः सर्वशास्त्रेभ्यः साममुद्धृत्य निर्मितोऽस्तीति। तद्यथा-

**ब्रवीमि सर्वशास्त्रेभ्यः सारमुद्धृत्य किञ्चन ।**
**पुण्यप्रसवकृत्स्वर्गापवर्गफलपेशलम् ॥**[1] इति।

पुण्यप्राप्तिमुद्दिश्य ग्रन्थोऽयं निरमायि। तदुक्तम्- 'स्वस्यान्यस्य च पुण्याय कुप्रवृत्तिनिवृत्तये'[2] इति। पुण्यप्राप्तिश्च धर्माचरणेन भवतीति प्रसिद्धमेव।

**१. धर्मलक्षणम्**

ननु कोऽयं धर्मः यः लोके पुण्याय भवति। धरति लोकोऽनेन, धरति लोकं वा, धरति विश्वम् इति, धरति लोकान् ध्रियते वा जनैः इति धर्मः। 'धृञ् धारणे' इति भ्वादिगणीयधातोः 'अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्'[3] इति औणादिकमन्प्रत्यये धर्मशब्दो निष्पद्यते। धर्मस्वरूपविषये बहुत्र शास्त्रेषु बहुधा प्रतिपादितमस्ति। महाभारते उक्तमस्ति-

**धारणाद्धर्म इत्याहुर्धर्मेण विधृताः प्रजाः ।**
**यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥**[4] इति।

धर्मस्यास्य मूलं वेदाः। तदुक्तम्- 'वेदोऽखिलो धर्ममूलम्'[5] इति 'धर्मं जिज्ञासमानानां परमं श्रुतिः'[6] इति च। उपनिषत्सु सत्यस्य पर्यायवाचकत्वेन धर्मशब्दः प्रयुक्तो दृश्यते। तद्यथा बृहदारण्यकोपनिषदि- "धर्मात्परं नास्त्यथो अबलीयान्बलीयाम् समाशंसते धर्मेण यथा राज्ञैवं यो वै स धर्मः। सत्यं वै तत्तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीत्येतद्ध्वैतदुभयं भवति"[7] इति। तैत्तिरीयोपनिषदि धर्मप्रवृत्तीनां कृते धर्मशब्दस्य प्रयोगो दृश्यते। तद्यथा- "सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यं, धर्मान्न प्रमदितव्यम्"[8] इति। धर्मः नेन्द्रियवेद्यः। अतीन्द्रियवेद्यत्वं त्वस्य प्रसिद्धम्। अत एव धर्मोऽनुमेयः। धर्मस्य गाम्भीर्यं पुराणेषु बहुधा प्रकीर्तितं वर्तते। 'धर्मस्य त्वरिता गतिः', 'धर्मस्य तत्त्वं निहितं गुहायाम्'[9] इत्यादिवचनानि प्रसिद्धान्येव। विविधशास्त्रेषु धर्मः विविधप्रकारैः व्याख्यातोऽस्ति।

'चोदनालक्षणोऽर्थो धर्म'[10] इति द्वादशलक्षण्यां महर्षिजैमिनिः। 'चोदना' लक्षणं यस्य सः चोदनालक्षणः। अत्र लक्षणं नाम प्रमाणम् इति। तथा चोदना प्रमाणं यस्य सः इति फलति। 'चोदना' नाम विधिवाक्यम्। स च धर्मः यागादिरेव। तस्मादेव भाट्टानां मते यागक्रियासूचकं पदं

* सहायकाचार्यः, व्याकरणविभागः, ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

 ISBN: 978-81-930770-3-0

धर्मः । प्राभाकरैः तावत् 'वेदप्रतिपाद्यः प्रयोजनवदर्थः धर्मः' इति प्रत्यपादि। वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थः धर्मः इत्यर्थः । 'अर्थत्वे सति चोदनागम्योऽर्थः धर्मः'[11] इत्यादिप्रयोगाः जैमिनीयन्यायविस्तरे दृश्यन्ते ।

'यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः'[12] इति कणादेन सूत्रितम् । अभ्युदयो नाम ऐहिकामुष्मिकफलम् । निःश्रेयसस्तु अपवर्गः मोक्षः इति यावत् । एतयोर्निष्पत्तिः यस्माद् भवति स एव धर्मपदेन उच्यते । अभ्युदयनिःश्रेयसान्यतरसाध्यत्वं धर्मत्वमिति फलितम् ।

महाभारतेऽपि धर्मः विस्तरेण प्रतिपादितः । धर्मस्य दशभार्याः आसन् इत्यपि महाभारते वर्ण्यते । तद्यथा-

**कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा ।**
**बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य वा दश ॥**[13] इति ।

महाभारते वर्णाश्रमव्यवस्थापि धर्मशब्देन उपस्थाप्यते । ब्राह्मणानां ब्रह्मचर्यधर्मः, गृहस्थधर्मः, वानप्रस्थधर्मः, सन्यासधर्मश्च महाभारते वर्णिताः सन्ति । आपद्धर्मः, नारीधर्मः, राक्षसधर्मः, मानवधर्मः इति धर्माः नैके कथिताः । परं सर्ववर्णसाधारणाः नवधर्माः महाभारते कथिताः । तद्यथा-

**अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।**
**प्रजानः स्वेषु दारेषु शौचमद्रोह एव च ॥**
**आर्जवं भृत्यभरणं त एते सर्ववर्णिकाः ।**[14] इति ।

तद्वदेव आत्मज्ञानं तितिक्षा चेति द्वौ साधारणौ धर्मौ महाभारते कथितौ । तद्यथा-

**स्वेषु दारेषु संतोषः शौचं नित्याऽनसूयता ।**
**आत्मज्ञानं तितिक्षा च धर्मः साधारणा नृपः ॥**[15] इति ।

अपि च गृहस्थानां प्रवृत्तिलक्षणो धर्मः, निवृत्तिलक्षणो मोक्षाख्यो धर्मश्च सर्वेषां कृते विहितः । यथोक्तं सारसमुच्चये-

**श्रुत्युक्तः परमो धर्मस्तथा स्मृतिगतोऽपरः ।**
**शिष्टाचारः परः प्रोक्तस्त्रयो धर्माः सनातनाः ॥**[16] इति ।

'अहिंसा परमो धर्मः'[17] इति वचनं प्रसिद्धं वर्तते । महाभारते वर्णितम्-

**अहिंसा सत्यमक्रोधो दानमेतच्चतुष्टयम् ।**
**अजातशत्रो सेवस्य धर्म एष सनातनः ॥**[18] इति ।
**अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।**
**अनुग्रहञ्च दानञ्च सतां धर्मः सनातनः ॥**[19] इति ।

मनुस्मृतिप्रभृतिषु धर्मशास्त्रग्रन्थेषु धर्मस्य दशकं लक्षणमवलोक्यते । तद्यथा-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥**[20] इति ।

अपि च मनुस्मृतौ धर्मस्य लक्षणं प्रोक्तम्-

 ISBN: 978-81-930770-3-0

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥**[21] इति ।

धर्मः कर्तव्यरूपेणापि व्यपदिश्यते । यथा वर्णधर्मः इति कथनेन ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां धर्मः कर्तव्यं वेति आवगम्यते । आश्रमधर्मः इत्युक्ते ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्न्यासाः इति चतुराश्रमाणां धर्मः कर्तव्यं वेति ज्ञायते । श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः अर्जुनाय क्षत्रियस्य धर्मविषये सूचयितुमवोचत्-

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥**[22] इति ।

धर्मशास्त्रस्य सामान्येन त्रिधा विभागः स्मृतिषु दृश्यते । आचारः व्यवहारः प्रायश्चित्तश्चेति । 'आचार: परमो धर्मः'[23] इति प्रसिद्ध एव । याज्ञवल्क्येन उच्यते-

**श्रुतिस्मृतिसदाचाराः स्वस्य च प्रियमात्मनः ।**
**सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥**[24] इति ।

**२. विवेकविलासे धर्मतत्त्वानि**

*"विवेकविलासः"* श्रावकान् श्रमणान् च उद्दिश्य लिखितो वर्तते । तेन चात्र श्रावकाणां नाम सद्गृहस्थानाम् एवं श्रमणानां नाम सन्न्यासिनां च उपयोगी धर्मः आचारो वा प्रत्यपादि। मुख्यतया जैनदर्शनाधारेणैव अत्र धर्मः प्रतिपादितः । श्रावकाणामणुव्रताः मुखतया तथा श्रमणानां महाव्रताः सामान्यतया अत्र वर्णिताः सन्ति । ग्रन्थेऽस्मिन् तत्र तत्र प्रतिपादितानि धर्मशास्त्रतत्त्वानि प्रकीर्णानि सन्ति ।

विवेकविलासस्य प्रारम्भे एव दिनचर्याध्याये प्रभाते उत्थानविधिरुद्दिश्य कथयति-

**धर्मार्थकाममोक्षाणां सिद्ध्यै ध्वात्वेष्टदेवताम् ।**
**भागेऽष्टमे त्रियामाया उत्तिष्ठेदुद्यतः पुमान् ॥**[25] इति ।

अनेन सर्वेषां जीवनस्य प्रयोजनमेव पुरुषार्थसिद्धिरस्तीति व्यवस्थाप्यते । तत्रैव प्रथमोल्लासे- **मौनी वस्त्रावृतः कुर्याद्दिने सन्ध्याद्वयेऽपि च ।**
**उदङ्मुखः शकृन्मुत्रे रात्रौ याम्याननः पुनः ॥**[26] इति ।

शौचाशौचविचारोऽयं धर्मशास्त्रानुकूलः एव । मनुस्मृतावपि एतदुक्तं भवति-

**मुत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः ।**
**दक्षिणाभिमुखो रात्रौ संध्ययोश्च तथा दिवा ॥**[27] इति ।

मलमूत्रविसर्जने धर्मशास्त्रानुसारी एव नियमः अनेनोक्तः ।[28] दन्तधावनाद्याः दिनचर्या अपि स्मृतिनिरूपितया दिशैवात्रापि निरूप्यन्ते । पित्रोः नमस्कारफलं विवेकविलासे उक्तम्-

**मातृप्रभृतिवृद्धानां नमस्कारं करोति यः ।**
**तीर्थयात्राफलं तस्य तत्कार्योऽसौ दिने दिने ॥**[29] इति ।

एतत्तु मनुस्मृतिमतमुसरन्नेव भवति । तद्यथा-

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**

 ISBN: 978-81-930770-3-0

**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥**[30] इति ।

विवेकविलासवचः वस्तुतः धर्मशास्त्रमेव स्मारयति । स्नानोपरान्तपूजादीनां यो विधिरत्रोच्यते तत्तु जैनाचारमवलम्ब्यैव भवति । पूजाऽपि जिनेश्वरस्यैव विहिता वर्तते । तदुक्तम् विवेकविलासे- **पद्मासनसमासीनो नासाग्रन्थस्तलोचनः ।**

**मौनी वस्त्रावृतास्योऽयं पूजां कुर्याज्जिनेशितुः ॥**[31] इति ।

जैनाचारः एव ग्रन्थेऽस्मिन् प्रधानतः वर्ण्यते । तथापि जैनाचारः नान्याचारैः विरुद्धः इति तस्य सर्वग्राह्यता अस्त्येव । दिनचर्याप्रस्तावे गुरूणां पूजा प्रशस्ता भवतीति धर्मशास्त्रानुरोधेन कथ्यते । तद्यथा- **आचार्याणां यतीनां च पण्डितानां कलाभृताम् ।**

**समुत्पाद्यः सदानन्दः कुलीनेन यथायथम् ॥**

**नित्यं देवगुरुस्थाने गन्तव्यं पूर्णपाणिभिः।**

**विधेयं तत्र चापूर्वज्ञानाभ्यासो विवेकिभिः ॥**[32] इति ।

विवेकविलासे दिनचर्याध्याये कथिताः चर्याः आयुर्वेदानुसारं सन्ति । परमेताः चर्याः धर्मशास्त्रस्य आचाराध्यायेऽपि प्रतिपादिताः सन्तीति धर्मशास्त्रे आचार्योऽसौ विद्वानासीद् इत्यवगन्तुं शक्यते । व्यापारव्यवहारेऽपि धर्मशास्त्रस्य परामर्शोऽनेन क्रियते । यत् धर्मबाधाकरमयशस्करं पण्यं भूरिलाभमपि पुण्यार्थिभिः न ग्राह्यम् । कूटमानतुलादिभिः धनम् अर्ज्यते तत् तप्तपात्रे अम्बुबिन्दुवत् नश्यति । वणिक्पुत्रः गर्वं न्यासापहारं च परित्यजेत् । सः सर्वदा क्षमाम् अङ्गीकुर्यात् । एवञ्च स्वच्छस्वभावाः विश्वस्ताः गुरुनायकबालकाः देवाः वृद्धाश्च कदापि न वञ्चनीयाः। केनापि प्रतिभुवा दाक्षिण्येन च साक्षिणा न भाव्यम् । साध्वर्थे जीवरक्षायै गुरुदेवगृहादिषु मिथ्याकृतैरपि शपथैः पातकं नास्ति । अन्यायिनः देवस्य पाखण्डिनां च धनेन यः वृद्धिमिच्छति असौ जिजीविषुः विषमत्ति । राजसेवा सर्वथा कर्तव्यैव भवति। विद्वान् प्रभुरपि यदि मूर्खैः परिवृत्तः तर्ह्यसौ निश्चयेन त्याज्यः भवति । तदुक्तं जिनदत्तसूरिणा-

**विद्वानपि परित्याज्यो नेता मूर्खजनावृतः ।**

**मूर्खोऽपि सेव्य एवासौ बहुश्रुतपरिच्छदः ॥**[33] इति ।

कीदृशः स्वामी सर्वदा सेव्यो भवतीत्यपि अत्र वर्ण्यते । यस्मिन् पुरुषे स्वामिनः समस्तगुणाः विद्यन्ते, यश्च सम्भावितैश्वर्यः भवति तस्य सेवा अवश्यं कार्या । कालान्तरेऽपि एषा सेवा निष्फला न भवति ।

ग्रन्थेऽस्मिन् मन्त्रिलक्षणमपि धर्मशस्त्रानुसारेण एव असौ विधत्ते । तद्यथा-

**स्वामिभक्तो महोत्साहः कृतज्ञो धार्मिकः शुचिः ।**

**अकर्कशः कुलीनश्च स्मृतिज्ञः सत्यभाषकः ॥**

**विनीतः स्थूललक्षश्चाव्यसनो वृद्धसेवकः ।**

**अतन्द्रः सत्त्वसम्पन्नः प्राज्ञः शूरोऽचिरक्रियः ॥**

**राज्ञा परीक्षितः सर्वोपधासु निजदेशजः ।**

**राजार्थस्वार्थलोकार्थकारको निःस्पृहः शमी ॥**

 ISBN: 978-81-930770-3-0

**अमोघवचनः कल्पः पालिताशेषदर्शनः ।**
**पात्रौचित्येन सर्वत्र नियोजितपदक्रमः ॥**
**आन्वीक्षिकी त्रयीवार्तादण्डनीतिकृतश्रमः ।**
**क्रमागतो वणिक्पुत्रः सेव्यो मन्त्री न चापरः ॥**[34] इति।

मन्त्रिणो लक्षणं धर्मशास्त्रग्रन्थेषु यथोदितं तथैवाऽत्रापि कथितं वर्तते । ततः परं सेनापतिलक्षणमपि धर्मशास्त्रानुसारेणैव कथितमस्ति ।[35] शास्त्रे शस्त्रे वाहने च अभ्यासी, रणे विजयी, स्वामिभक्तः, जितायासः, सेनाश्रिये सेनापतिः सेव्यः । सेनापतिलक्षणमुक्त्वा स्वामि-लक्षणमपि विस्तरेणोच्यते । विवेकविलासे षोडशकारिकाभिः सेवकलक्षणं प्रतिपादितम् ।[36] तथाहि- आत्मनः कामाय सेवकः किमपि न करोति। असौ अवञ्चकः, स्थिरः, प्राज्ञः, प्रियवाक्, विक्रमी, शुचिः, अलुब्धः, सोद्यमः स्यात्। अयं सुगुणः नम्रः, सदा स्वामिनः आह्वाने उपस्थितो भवेत्। स्वोचितेन मार्गेण स्वामिसमक्षं गत्वा उचिते स्थाने उपविशेत्। स्वामिसमीपमुपविश्य तन्मुखे अक्षिणी कृत्वा, कृताञ्जलिः सन् स्वामिनः हृदयं विज्ञाय तदनुसारेण कार्यं कुर्यात्। अयं च स्वामिनः न अत्यासन्नः, न वा अतिदूरस्थः, न समोच्चासनस्थितः, प्रभोः पुरस्थः पृष्ठस्थः वा न तिष्ठेत्। स्वामिना प्रीत्या दत्तं वस्त्राभरणादिकं प्रीत्या धार्यं, तत्पुरतः अन्यस्मै न देयम्। स्वामिनः समानं वा ततोऽपि विशिष्टं वा वस्त्रादिकं न धारयेत्। पुनश्चासौ सभासु उचितेन प्रकारेण उपविशेत्। कदापि सभास्थितः सन् विजृम्भणादिकं तथा नासाशोधनं हस्तमोचनं वा न कुर्यात्। सभायां कुचेष्टाः सर्वथा वर्जनीयाः भवन्ति। सभायां पादप्रसारणं वा न कुर्यात्। स्वामिवाग् न जल्पेत्। एकवचनादिभिः नोत्तरयेत्। यस्मिन् स्वामिनि आज्ञालाभादयः सर्वे लोकोत्तरा गुणाः वर्तन्ते तादृशं स्वामिनः नावजानीयात्। एकान्ते मधुरैः वाक्यैः सान्त्वयन् सेवकः प्रभुमहितात् वारयेत्। अन्यथा एष स्वयमुपेक्षितः स्यात्। यदा स्वामी युक्तमपि सेवकस्य वचनम् अनुमन्यते तदा मौनं कुर्यात्। प्रभोरग्रे कदापि वैरिणः गुणकीर्तनं न कुर्यात्। प्रभुः सेवके अत्यधिकं प्रसन्नेऽपि सेवकः प्रकृतीः न प्रकोपयेत् । कार्येषु व्यापारितः सेवकः सम्पूर्णं पौरुषम् आश्रित्य तत्कार्यं कुर्यात् । प्रभोः मनः कोपप्रसादजैः चिह्नैः उक्तिभि अथवा संज्ञया अनुरक्तं विरक्तं वा जानीयात्। एवं सेवकस्य विस्तरेण यल्लक्षणमुक्तं तत्सर्वं धर्मशास्त्राभिमतमेव। सेवकलक्षणमुक्त्वा द्वयोः श्लोकयोः विरक्तानुरक्तस्वामिलक्षणमाह-

**हर्षो दृष्टे धृतिः पार्श्वे स्थिते वासनदापनम्।**
**स्निग्धोक्तिरुक्तकारित्वं प्रसन्नप्रभुलक्षणम्॥**
**आपद्युपेक्षानालापो मानहानिरदर्शनम्।**
**दोषोक्तिरप्रदानञ्च विरक्तप्रभुलक्षणम्॥**[37] इति।

उद्यमस्य वैशिष्ट्यमपि जिनदत्तसूरिणा विवेकविलासे विस्तरेण प्रतिपादितम् । उद्यमेन धनप्राप्तिर्भवति । अर्जितेन धनेन योग्यानां सेवकानां नियुक्तिः शक्यते । योग्यानां जनानां बलेन तमुद्यमिनं कोऽपि किमपि कर्तुं न प्रभवति। सर्वथा व्यवसायः श्रियोमुखं भवति। व्यवसायेन श्रीः

 ISBN: 978-81-930770-3-0

अर्जनीया। सा च श्रीः उत्तमा, या दानभोगकरे भवति। लाभानुसारेण भोगादीनां भागोऽप्युच्यते। तद्यथा- **व्यवसाये निधौ धर्मभोगयोः पोष्यपोषणे।**

**चतुरश्चतुरो भागानायस्यैवं नियोजयेत्॥**[38] इति।

उद्योगेन धनार्जनं धर्मपूर्वकं भवेत्। अर्जितस्य धनस्य नियोगोऽपि धर्मपूर्वकं भवेदिति धर्मशास्त्रेषु उक्तम्। अनेन धर्मशास्त्रोक्तविधिना यः लक्ष्मीं न लालयति सः पुरुषार्थैरवश्यं वञ्चितो भविष्यति। तदुच्यते-

**न लालयति यो लक्ष्मीं शास्त्रीयविधिनामुना।**

**सर्वथैव स निःशेषपुरुषार्थबहिष्कृतः॥**[39] इति।

एषा लक्ष्मीः व्यवसायतः सञ्जायते। अत एव एषा सर्वथा रक्षणीया। इयञ्च लक्ष्मीः पूर्वजन्मपुण्येन पुरुषार्थेन च सहकृता पुरुषं प्राप्नोति। केचन पुरुषाः लक्ष्मीप्राप्तये पुण्यपुरुषाणां सविधं भूयो गच्छन्ति। एतत्तु न समीचीनम्। केवलं पुण्यार्जनेन केवलं पुरुषार्थेन श्रीः नासाद्यते। उभयमपि अत्र अपेक्षते। तदुक्तम्-

**तदयुक्तं यतः पुण्यमपि निर्व्यवसायकम्।**

**सर्वथा फलवन्नात्र कदाचिदवलोक्यते॥**

**द्वावप्येतौ ततो लक्ष्म्या हेतू न तु पृथक्पृथक्।**

**तेन कार्यो गृहस्थेन व्यवसायोऽनुवासरम्॥**[40] इति।

जिनदत्तसूरिः जैनाचार्यः आसीत्। जैनाः प्रायः बणिजः। अत एव ग्रन्थेऽस्मिन् व्यवसायस्य प्रशंसा बहुधा दृश्यते। उद्यमवृक्षस्य फलं किमित्युच्यते-

**कालेऽन्नमुचितं वस्त्रममलं सदनं निजम्।**

**अर्थोऽर्थाप्यायकश्चैतद्व्यवसायतरोः फलम्॥**[41] इति।

विवेकविलासे तृतीयोल्लासे प्रायः धर्मशास्त्रानुसारिणां विषयाणामेव प्रतिपादनं विद्यते। धर्मस्य दशलक्षणमत्र उच्यते। तद्यथा-

**दया दानं दमो देवपूजा भक्तिर्गुरौ क्षमा।**

**सत्यं शौचं तपोऽस्तेयं धर्मोऽयं गृहमेधिनाम्॥**[42] इति।

धर्मज्ञानान्तात् हृदये सज्जनताधारणं, मधुरया गिरा भाषणं, सारः परोपकारश्च क्रमः प्रशस्तः वर्तते। तदुक्तम्-

**अनन्यजन्यं सौजन्यं निर्माया मधुरा गिरः।**

**सारः परोपकारश्च क्रमो धर्मविदामयम्॥**[43] इति।

पापनाशोपायोऽप्यत्र धर्मशास्त्रानुसारेण निरूपितः। तथाहि- दीनानामसहायानाञ्च उद्धारः, निर्मात्सर्यं, विनयः, इन्द्रियसंयमः, न्यायमार्गेण गमनं, प्रवृत्तौ स्वभावे च कोमलत्वं पापनाशोपायाः सन्ति। तद्वदेव अतिथिसत्कारेऽपि धर्मविहितोऽस्ति। अनाहूतम् अविज्ञातं, दानकाले समागतं पुरुषमतिथिं जानीयात्। महात्मनाम् अतिथीनाञ्च भक्तिपूर्वकं भोजनदानेन, याचकानाम् अनुकम्पैः भोजनं दत्त्वा, अर्थिभ्यो यथोचितं दानं दत्त्वा धर्मी पुरुषः भोजनं कुर्यादिति नियमः। पण्डितो वा

 ISBN: 978-81-930770-3-0

मूर्खः, मित्रं वा शत्रुः यदि भोजनावसरे बुभुक्षुः सन् गृहमागच्छति सः आतिथेयानां स्वर्गद्वारं उद्घाटयितुम् आगतोऽस्ति। अतः तं पूजयेत्। गृहमागतमतिथिं जातिगोत्राचारान् न पृच्छेत्। यस्य मन्दिरात् अतिथिपुङ्गवः विमुखः प्रतिनिवर्तते तस्य मनस्विनः निश्चयेन पुण्यहानिर्भविष्यति। यस्य गृहात् अतिथिः भग्नाशः प्रतिनिवर्तते सः तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति। तदुक्तम्-

**अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।**
**स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति॥**[44] इति।

श्लोकोऽयं वैष्णवधर्मशास्त्रे एवं दृश्यते-

**अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।**
**तस्मात् सुकृतमादाय दुष्कृतं तु प्रयच्छति॥**[45] इति।

दानस्य माहात्म्यमत्र उपवर्णितम्। देवेन्द्रादारभ्य कृमिकीटा अपि भक्षणं वाञ्छन्ति। अतः अन्नदानं महादानम्। क्षुधापीडितं पुरुषं सर्वत्र विफलम् अवजानीयात्। पितुः, शिशूनां, गर्भिणी-वृद्धरोगिणां प्रथमं भोजनं दत्वा पुनः स्वयं भुज्यते। याज्ञवाल्क्यस्मृतौ अपि एतदुक्तं भवति। तद्यथा-

**बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः।**
**सम्भोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्॥**[46] इति।

एवं विवेकविलासस्य तृतीयोल्लासे धर्मशास्त्रतत्त्वानि प्रतिपादितानि सन्ति। चतुर्थोल्लासेऽपि धर्मशास्त्रं सम्यक् परामृष्टमस्ति। प्राणिभिः भोजनं कदा कर्तव्यम् इति विषयोऽपि जिनदत्तसूरिणा पर्यालोचितः। सूर्योदयात् सूर्यास्तं यावदेव भोजनं कार्यम्। रात्रिभोजनेन वस्तूनि विषमयाणि भवन्ति। अतः दिवसे एव भोजनं प्रशस्तं, रात्रिभोजनं तु निषिद्धम्। जैनसम्प्रदाये रात्रिभोजनं निषिद्धमस्ति। जैनाचार्येणामुना अत एवोच्यते-

**भानोः करैरसंस्पृष्टमुच्छिष्टं प्रेतसञ्चरात्।**
**सूक्ष्मजीवाकुलं चापि निशि भोज्यं न युज्यते॥**[47] इति।

सायं सन्ध्यायां निद्रा, मैथुनम्, अध्ययनं, भोजनं च वर्जनीयम्। एतत्तु ब्रह्मवैवर्तपुराणेऽपि कथितं वर्तते। तद्यथा-

**दिवसे सन्ध्ययोर्निद्रां स्त्रीसम्भोगं करोति यः।**
**सप्तजन्मभवेद्रोगी दरिद्रः सप्तजन्मसु॥**[48] इति।

पञ्चमोल्लासे धर्मशास्त्रतत्त्वानि जैनाचारानुसारेणैव प्रतिपादितानि सन्ति। यथा जैनधर्मानुसारेण रात्रौ पुण्यकर्माणि निषिद्धानि सन्ति। तदुच्यते-

**रात्रौ न देवतापूजा स्नानदानाशनानि च।**
**न वा खदिरताम्बूलं कुर्यान्मत्रं च नो सुधीः॥**[49] इति।

मातापितरौ अथवा ज्येष्ठभ्राता कन्यां विधिवत् यस्मै ददाति सः गतसर्वगुणोऽपि तया देवतेव पूज्यः। अयञ्च धर्मशास्त्रेषु प्रसिद्धो वर्तते। तदुक्तं मनुस्मृतौ-

**यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः।**
**तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत्॥**[50] इति।

 ISBN: 978-81-930770-3-0

स्त्रीणां जीवनं सर्वदा पुरुषैः रक्षणीयमिति प्रायः सर्वेष्वपि धर्मशास्त्रेषु प्रतिपाद्यते । विवेकविलासेऽपि एतत्कथनं वर्तते । तद्यथा-

**पितृभर्तुसुतैर्नार्या बालयौवनवार्धके ।**
**रक्षणीया प्रयत्नेन कलहः स्यात् कुलेऽन्यथा ।।**[51] इति ।

मनुस्मृतौ तावदेव अर्थः अन्यथा कथितः । तद्यथा-

**बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ।**
**पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ।।**[52] इति ।

विवेकविलासस्य सप्तमोल्लासे वर्षचर्या प्रतिपादिता । तत्रापि बहवः विषयाः धर्मशास्त्रानुरोधेन वर्णिताः । तत्र गुरूणां ज्येष्ठानाम् आदरः सर्वदा कार्यः इति धर्मशास्त्रेषु सर्वत्र गीयते । एतद्विषये जिनदत्तसूरिणा उच्यते-

**गोत्रबृद्धा यथाशक्ति सम्मान्या बहुमानतः ।**
**विधेया तीर्थयात्रा च प्रतिवर्षं विवेकिना ।।**[53] इति ।

एवमेव उत्तमगुरोः उत्तमशिष्याणां च लक्षणं धर्मशास्त्रेषु कथ्यते । तद्वदत्रापि विस्तरेण तद्वर्णितमस्ति । गुरुश्च अक्रुद्धः, शास्त्रमर्मज्ञः, अनालस्यः, व्यसनोज्झितः, हस्तसिद्धः, वाग्मी च भवेत् । आचार्याः मधुरैः वाक्यैः शिष्यान् शिक्षेरन्। बन्धताडनैः शिष्यान् निर्लज्जान् न कुर्युः । शरीरे कुत्र शिष्याणां ताडनम् अनुमतमित्यपि वदति । तद्यथा-

**मस्तके हृदये वापि प्राज्ञश्छात्रं न ताडयेत् ।**
**अधोभागे शरीरस्य पुनः किञ्चन शिक्षयेत् ।।**[54] इति ।

सुशिष्याणां लक्षणमपि कथितमस्ति । तद्यथा-

**कृतज्ञाः शुचयः प्राज्ञाः कल्पाः द्रोहविवर्जिताः ।**
**गुरुभिस्त्यक्तशाठ्याश्च पाठ्याः शिष्याः विवेकिभिः ।।**
**मधुराहारिणी प्रायो ब्रह्मव्रतविधायिना ।**
**दयादानादिशीलेन कौतुकालोकवर्जिना ।।**
**कपर्दप्रभुणक्रीडाविनोदपरिहारिणा ।**
**विनीतेन च शिष्येण पठता भाव्यमन्वहम् ।।**[55] इति ।

अपि च शिष्यः कदापि गुरोर्नाम नोच्चरेत्। कारणं हि नामोच्चारणे गुरोः आयुक्षयः भवति। उक्तं च-

**आत्मनश्च गुरोश्चैव भार्यायाः कृपणस्य च ।**
**क्षीयते वित्तमायुश्च मूलनामानुकीर्तनात् ।।**[56] इति ।

भविष्यपुराणेऽपि एतदुक्तं भवति-

**नोदाहरेदस्य नाम परोक्षमपि केवलम् ।**
**न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ।।**[57] इति ।

 ISBN: 978-81-930770-3-0

अथ धर्मशास्त्रप्रशंसापि विवेकविलासे कृता दृश्यते । धर्मशास्त्रज्ञानेन वस्तुतः परमार्थज्ञानमेव जायते इति जिनदत्तसूरिणां मतम्। तदुक्तमनेन-

**धर्मशास्त्रश्रुतौ शश्वल्लालसं यस्य मानसम्।**

**परमार्थं स एवेह सम्यग्जानाति नापरः ॥**[58] इति।

बुद्धिमता मनुष्येण गजात् करसहस्रेण, शकटात् पञ्चभिः करैः, शृङ्गिणो अश्वाच्च दशभिः करैः दूरं गन्तव्यम्। अपि च जलदुर्गम् अथवा स्थलदुर्गं विकटामटवीं, न चागाधानितोयानि, उपायं विना न लङ्घयेत्। अत्र चाणक्यमतमेवमस्ति-

**शकटं पञ्चहस्तेन दशहस्तेन वाजिनाम्।**

**हस्ती च शतहस्तेन देशत्यागेन दुर्जनम् ॥**[59] इति।

शिक्षा कस्मै दातव्या इत्यस्मिन् विषयेऽपि जिनदत्तसूरिः धर्मशास्त्रानुसारेण कथयति यत्, यत्नवान् यो भवति तस्मै एव विद्या प्रदातव्या नेतरस्मै। तद्यथा-

**शिक्षा तस्मै प्रदातव्या यो भवेत्तत्र यत्नवान्।**

**गुरुः साहसमेतद्धि कथ्यते यदपृच्छतः ॥**[60] इति।

यः पुरुषः कलहप्रियः नास्ति, तस्यैव जीवने प्रगतिर्भवति। कोऽपि जीवने कारणे सत्यपि एतेभ्यः कलहं न कुर्यात्। तद्यथा-

**मातृपित्रातुराचार्यातिथिभर्तृतपोधनैः।**

**वृद्धबालाबलावेद्यापत्यदायादिकिङ्करैः ॥**

**श्वशुराश्रितसम्बन्धिवयस्यैस्सार्धमन्वहम्।**

**वाग्विग्रहमकुर्वाणो विजयेत जगत्रयम् ॥**[61] इति।

धर्मशास्त्रानुसारेण मन्त्रणोचितं स्थानं कुत्र भवतीति विस्तरेण जिनदत्तसूरिणा प्रतिपादितम्। यस्य स्थानस्य उपरिभागः विवृतः न स्यात् तथा गमननिर्गमनद्वारम् एकमेव भवति, द्वारपालः दूरे च तिष्ठति शङ्कास्पदं च नास्ति, तस्मिन् स्थाने स्थित्वा मन्त्रणकार्यं कर्तव्यम्। यदि मन्त्रस्थानं बहुस्तम्भयुतं स्यात् तर्हि कुत्रचित् कोऽपि शत्रुः चरो वा निलीयेत। अतः तादृशं स्थानं मन्त्रणाय वर्ज्यं भवति। एवमेव राजा पञ्चभिः त्रिभिर्वा मन्त्रिभिः शून्यार्धभूमिके स्थाने काननान्तरे वा गत्वा सम्मुखः मन्त्रयेत्। मन्त्रणा कैः सह निषिद्धा इत्यप्युच्यते जिनदत्तसूरिणा-

**सालस्यैर्लिङ्गिभिर्दीर्घसूत्रिभिः स्वल्पबुद्धिभिः।**

**समं न मन्त्रयेन्नैव मन्त्रं कृत्वा विलम्ब्यते ॥**[62] इति।

महात्मानः यत्र निवसन्ति तत्र विद्यमानैः सामान्यजनैरपि सङ्गतिः करणीया एव। यतोहि चन्दनवृक्षस्य साहचर्येण मलयाचले विद्यमानानां वृक्षान्तराणामपि चन्दनस्वभावः भवत्येव। तत्र शुभोपदेशदातारः ये वदन्ति तैः सः सम्बन्धः प्रशस्तः। तदुच्यते-

**शुभोपदेशदातारो वयोवृद्धाः बहुश्रुताः।**

**कुशला धर्मशास्त्रेषु पर्युपास्या मुहुर्मुहः ॥**[63] इति।

 ISBN: 978-81-930770-3-0

धर्मशास्त्रनिपुणा एव शुभोपदेशदाने समर्थाः । यतो हि धर्मशास्त्रे एव आचारः व्यवहारः प्रायश्चित्तश्च विस्तरेण निरूपितोऽस्ति । विवेकविलासस्य दशमोल्लासस्य नामैव धर्मोत्पत्तिप्रकरणमिति । उल्लासेऽस्मिन् धर्मः विस्तरेण प्रतिपादितः । उल्लासप्रारम्भे एव धर्मप्राशस्त्यं विद्यते । पापपुण्ययोरन्तरं प्रत्यक्षं दृष्ट्वा सर्वदा धर्म एव कर्तुं युज्यते इति । तद्यथा-

**प्रत्यक्षमन्तरं दृष्ट्वा श्रुत्वा वा पापपुण्ययोः ।**
**सदैव युज्यते कर्तुं धर्म एव विपश्चिता ॥**[64] इति ।

ये मूढाः धर्माचरणेन विना मनुष्यजन्म वृथा गमयन्ति ते सुप्ताः निशीथिनीमिव व्यर्थाः । नृपचित्तधनस्नेहदेहदुष्टजनायुषां विघटनमानानां विघ्नो न स्यात् अतः धर्ममाचरेत् । परलोकः अस्तीति निश्चितम् । देवोऽप्यस्ति । कुगुरोः कुक्रियातः, प्रत्यूहात्, कालदोषतः, आप्तवाचः, न सिद्ध्यन्ति चेत्तत्र आप्तवचनस्य को दोषः? लोकेऽस्मिन् धर्म एव महत्त्वपूर्णं तत्त्वं विद्यते । तस्य प्रशंसा करणीया एव । अयञ्च प्रशस्ततमो धर्मः चतुर्विधः । धर्मशास्त्रस्य जिनदत्तसूरिणा चतुर्धा विभागः विहितः । स च विभागः अन्येषामाचार्याणां विभागेभ्यः भिन्नः । दानं, शीलः, तपः, भावना चेति धर्मः चतुर्धा विभक्तः । लोके सर्वेऽपि मे धर्मः श्रेष्ठः इति उच्चैः वदन्ति । वस्तुतः ते अविवेकिनः । यथा दूरस्थैः आम्रनिम्बयोः भेदः न ज्ञायते तथैव एषामपि । सर्वेषु धर्मेषु दानं श्रेष्ठो धर्मः । परन्तु मायाहङ्कारलज्जाभिः प्रत्युपकारक्रियया वा यत्किञ्चित् दीयते तद्दानं धर्मस्य साधकं नास्ति । असज्जनेभ्यो यद्दानं तदपि श्रेयस्करं नास्ति। लोके धर्मादेव प्रसिद्धिर्जायते न तु दानात् । अतः धर्मपूर्वकस्य दानस्यैव महत्त्वं विद्यते । केचन केवलं प्रसिद्धिम् अवाप्तुं दानं कुर्वन्ति। तत् व्यसनमेवेति विद्वद्भिः ज्ञेयम् । श्रेयस्करं दानं किं भवति इत्यस्मिन् विषये जिनदत्तसूरिणा प्रोक्तम्-

**यज्ज्ञानाभय्योर्थच्च धर्मोपदष्टम्भवस्तुनः ।**
**यच्चानुकम्पया दानं तदेव श्रेयसे भवेत् ॥**[65] इति ।

दानस्य महत्त्वमुक्त्वा शीलमपि निरूपयति आचार्यः । विवेकी जन: सर्वदा विषयविरक्तो भवेत् । विषयस्य निस्सारत्वं सम्यगवगम्य यो जनः विषयान् भुङ्क्ते सः एव विवेकी । सर्वस्वत्यागी महामुनिस्तु विषयविरक्तः इति श्रूयते एव। परं गृहिणोऽपि सर्वस्वं परित्यज्य ब्रह्मव्रतं प्रशस्तं भवति। गृहस्थानां वैराग्यं मुनेः वैराग्यात् अन्यदेव भवति । गृहस्थेन तिर्यग्देवासुरस्त्री परस्त्री च त्यज्येत । यदि गृहस्थः प्रमादात् परस्त्रीणां शरीरं पश्यति तदा निश्चयेन असौ शरीरमिदं मलमूत्रादिस्थानमिति विचिन्त्य तस्मिन् शरीरे विरक्तः स्यात् । यो जनः अलौकिकपरमानन्दं न जानाति स एव विषयोन्मुखः दृश्यते। यथा अदृष्टनगरो जनः ग्रामं प्रशंसते तथैवेति दृष्टान्तः जिनदत्तसूरिणा प्रदत्तः। तद्यथा-

**आज्ञातपरमानन्दो लोकोऽयं विषयोन्मुखः ।**
**अदृष्टनगरैर्ग्रामः पामरैरुपसर्प्यते ॥**[66] इति ।

अलौकिकः ब्रह्मास्वादः परमानन्दस्वरूपः । स च विषयैः नानुभूयते । तच्च परमपदं प्राप्तुं नैके उपायाः विद्यन्ते । तत्र प्रधानतया बाह्यतपः षड्विधमुच्यते । तानि च- रसत्यागः, कायक्लेशः, अल्पाहारत्वम्, उपवासः, लीनता, वृत्तिसंक्षेपश्चेति । तपसां एते प्रकाराः जैनेषु प्रसिद्धाः । तथा च प्रायश्चित्तं, शुभध्यानं, स्वाध्यायः, विनयः, वैय्यावृत्त्यम्, उत्सर्ग इति आन्तरं तपः षड्विधं कथितम्।

 ISBN: 978-81-930770-3-0

एतत्सर्वमाचारदिनकरे विस्तरेण प्रत्यपादि। विवेकेन विना तप्तं तपः अनुतापं जनयति। इदं च अज्ञानकष्टं भूरिफलदायकं न भवति। एवं तपसः स्वरूपमुक्त्वा जीवनस्य लक्ष्यं किं भवेदिति ग्रन्थकारः प्रकाशयति। तद्यथा-

**शरीरं यौवनं वित्तं संयोगञ्च स्वभावतः।**
**इदं नित्यानित्यत्वात् घ्रातं जानीहि सर्वतः॥**[67] इति।

प्रपञ्चेऽस्मिन् सर्वेषां मृत्युरवश्यं भवति। मरणागमं कश्चित् कमपि परित्रातुं न शक्नोति। तस्मात् जीवितम् अनित्यं मन्तव्यम्। संसारनाटकेऽस्मिन् जन्तुः उत्तमः मध्यमः अधमश्चेति त्रिविधः वर्तते। लोके जन्तुः जायते म्रियते च। जीवः एक एव सुखं दुःखं च भुङ्क्ते। अन्यः कोऽपि तस्य जीवस्य मित्रं न भवति। अतः विवेकिपुरुषः देहार्थबन्धुमित्रादिसर्वं स्वस्मात् अन्यत् इति चिन्तयति। अतः विवेकिपुरुषेण कुत्रापि शोकः न क्रियते। लोकेऽस्मिन् शुचिना कर्मणा शुचिफलं भवति। अशुचिना कर्मणा अशुचिफलं भवति। तस्मात् नूतनस्य कर्मणः निरोधकं संवराख्यं तत्त्वं सर्वथा नमस्क्रियते। यतोहि संवररूपेण शास्त्रेण शुभाशुभकर्मणां छेदः भवति।

श्रीमद्भगवद्गीतायामपि संसाररूपं वृक्षं छेत्तुं विरक्तरूपं शास्त्रं प्रयोजकमिति उच्यते। तदुक्तं यथा-

**न रूपस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।**
**अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा॥**
**ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः।**
**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी॥**[68] इति।

लोकेऽस्मिन् एतानि दशवस्तूनि यत्र विद्यन्ते स श्रेष्ठः धर्मः उच्यते। तद्यथा-

**श्रेष्टोः धर्मस्तपः शान्तिः मार्दवार्जसूनृतैः।**
**शौचाऽकिञ्चन्यकिरणाब्रह्मत्यागैश्च सम्मतः॥**[69] इति।

एष च धर्मः जैनदर्शनानुरूपं ग्रन्थेऽस्मिन् कथितः। अयमेव धर्मः ग्रन्थकारस्य सम्मतः। धर्मस्यैतस्य अन्येषां धर्माणाञ्च फलेन भेदः कल्प्यते। गोदुग्धस्य अर्कदुग्धस्य यथा महत्स्वादन्तरं वर्तते तथा धर्मस्यापि अन्तरं भवतीति दृष्टान्तः। एवं विधं कर्म येन आचर्यते तस्य मोक्षप्राप्तिरवश्यं भवति। एवं प्रकारेण ग्रन्थेऽस्मिन् मनुस्मृत्यादिषु ग्रन्थेषु प्रतिपादितः धर्मः तथा जैनशास्त्रसम्मतः धर्मः च सुविस्तरेण प्रतिपादितः। ग्रन्थस्य एकादशोल्लासे जैनदर्शनाभिमतं ध्यानस्वरूपं विस्तरेण वर्णितं समुपलभ्यते। द्वादशोल्लासे च परमपदनिरूपणं वर्ण्यते। अन्ते धर्माचरणानन्तरं कायत्यागः प्रशस्तः इति जैनाभिमतं तत्त्वमुक्त्वा जिनदत्तसूरिः ग्रन्थममुपसरति। तद्यथा-

**आबाल्यात् सुकृतैः सुजन्म सकलं कृत्वा कृतार्थं चिरम्।**
**धर्मध्यानविधानलीनमनसो मोहव्यपोहाद्यताः॥**[70] इति।

**३. उपसंहृतिः**

ग्रन्थेऽस्मिन् धर्मशास्त्रस्य साङ्गोपाङ्गनिरूपणं जिनदत्तसूरिणा कृतम्। प्रथमं तावत् वेद-सम्मतस्य धर्मशास्त्रस्य विचारः अनेन विहितः। ततश्च क्रमेण जैनदर्शनानुसारं एतत् निरूपितम्। सर्वे पदाः हस्तिपदं विशन्ति इति नियमानुसारेणैव सर्वे विचाराः विहिताः। यद्यपि ग्रन्थेऽस्मिन्

 ISBN: 978-81-930770-3-0

जैनमतानुसारं सर्वं प्रतिपादितं तथापि सर्वेषां जनानाम् उपयुक्तं धर्मशास्त्रतत्त्वं ग्रन्थेऽस्मिन् प्रतिपादितम् इति ग्रन्थस्यास्य महत् वैशिष्ट्यं वर्तते । ग्रन्थेऽस्मिन् लोकहितानां बहूनां सुभाषितानामपि विचारः दृश्यते । एवं समासेन 'शिक्षार्थिनामभिवृद्धये विवेकविलासस्य योगदानम्' इति अल्पीयसा वचसा यथामति प्रतिपादितम् इति शम्।

**पादटिप्पणी**

1. विवेकविलासः,१.८।
2. तत्रैव,१.९।
3. उणादिसूत्रम्, १३७।
4. महाभारतम्,शान्तिपर्व, ११०.११।
5. मनुस्मृतिः, २.६।
6. तत्रैव,२.१३।
7. बृहदारण्यकोपनिषत्,१.४.१४।
8. तैत्तिरियोपनिषत्,१.११.१।
9. महाभारतम्,वनपर्व, ३१३.११७।
10. द्वादशलक्षणी,१.१.२।
11. जैमिनिन्यायविस्तर,१.१.१।
12. वैशेषिकसूत्रम्,१.१.२।
13. महाभारतम्,आदिपर्व, ६६.१५-१६।
14. तत्रैव,शान्तिपर्व, ६०.७-८।
15. तत्रैव, ३०२.२४।
16. सारसमुच्चयः,४०।
17. महाभारतम्,आदिपर्व, ११.१३।
18. तत्रैव,अनुशासनपर्व, २६७.२३।
19. तत्रैव,शान्तिपर्व, १६१.२१।
20. मनुस्मृतिः,६.९२।
21. तत्रैव,२.१२।
22. श्रीमद्भगवद्गीता,३.३५।
23. मनुस्मृतिः,१.१०८।
24. याज्ञवल्क्यस्मृतिः,१.७।
25. विवेकविलासः,१.१३।
26. तत्रैव,१.४८।
27. मनुस्मृतिः,४.५०।
28. विवेकविलासः,१.५३।

 ISBN: 978-81-930770-3-0

29. तत्रैव,१.७७।
30. मनुस्मृतिः,२.१२१।
31. विवेकविलासः,१.९७।
32. तत्रैव,१.११८,१२४।
33. तत्रैव,,२.७८।
34. तत्रैव,२.८०-८४।
35. तत्रैव,२.८५-८७।
36. तत्रैव,२.८८-१०१।
37. तत्रैव,२.१०२-१०३।
38. तत्रैव,२.१०७।
39. तत्रैव,२.१०८।
40. तत्रैव,२.११२-११३।
41. तत्रैव,२.११४।
42. तत्रैव,३.५।
43. तत्रैव,३.६।
44. तत्रैव,३.१६।
45. विष्णुस्मृतिः,६.३३।
46. याज्ञवल्क्यस्मृतिः,१.१०५।
47. विवेकविलासः,४.४।
48. ब्रह्मवैवर्तपुराणम्,श्रीकृष्णजन्मकाण्डः, ७५।
49. विवेकविलासः,५.५।
50. मनुस्मृतिः,५.१५१।
51. विवेकविलासः,५.१६४।
52. मनुस्मृतिः,५.१४८।
53. विवेकविलासः,७.७।
54. तत्रैव,८.११६।
55. तत्रैव,८.११७-११९।
56. तत्रैव,८.१२४।
57. भविष्यपुराणम्,ब्रह्मपर्व, ४.१७०।
58. विवेकविलासः,८.१३४।
59. चाणक्यनीतिः,७.७।
60. विवेकविलासः,८.३३०।
61. तत्रैव,८.३३१-३३२।

ISBN: 978-81-930770-3-0

62. तत्रैव,८.३८१।
63. तत्रैव,८.३९८।
64. तत्रैव,१०.१।
65. तत्रैव,१०.१८।
66. तत्रैव,१६.२३।
67. तत्रैव,१०.३२।
68. श्रीमद्भगवद्गीता,१५.३-४।
69. विवेकविलासः,१२.१२।
70. तत्रैव,११.१२।

**परिशीलितग्रन्थसूची**


ईशादि नौ उपनिषद्। 2072 सम्बत्सरः (2015 ईशवीयाब्दः)। गोरखपुरम्, गीताप्रेस्।

कणादः । 2017 । वैशेषिकदर्शनम् (अभिनवरीतिपरिष्कृतविद्योभाष्यसहितम्) । शास्त्री, उपदवीरः (भाष्यकारः)। दिल्ली, आर्य-साहित्य-भवनम्।

गौतमः । 2017 । न्यायदर्शनम् (अभिनवरीतिपरिष्कृतविद्योभाष्यसहितम्) । शास्त्री, उपदवीरः (भाष्यकारः)। दिल्ली, आर्य-साहित्य-भवनम्।

चाणक्यः। 2013। चाणक्यनीतिः। शास्त्री, सत्यव्रतः (अनुवादकः)। कोलकता, भारतीयविद्यामन्दिरम्।

जिनदत्तसूरि । 2014 । विवेकविलासः (मोहनबोधिनीटीकासहितः) । डा. श्रीकृष्णजुगुनू (सम्पा.) । दिल्ली, आर्यावर्त-संस्कृति-संस्थानम्।

भट्टोजिदीक्षितः । 20154 । वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) । श्रीगोविन्दाचार्यः (सम्पा.) । वारणसी, चौखम्बा-सुरभारती-प्राकाशनम्।

महर्षिकृष्णद्वैपायनवेदव्यासः। 1340 (वङ्गाब्दः)। महाभारतम्। कलिकाता, विश्ववाणी प्रकाशनी।

महर्षिजैमिनिः। 2008। जैमिनिसूत्रम्। झा, पं श्री लषणलालः (व्याख्याकारः)। वाराणसी, चौखम्बा-अमरभारती-प्रकाशनम्।

महर्षिमनुः । 2016। मनुसंहिता। बन्द्योपाध्यायः, मानवेन्दुः (सम्पा.)। कलिकाता, संस्कृत-पुस्तक-भण्डारः।

महर्षियाज्ञवल्क्यः । 1903 । याज्ञवल्क्यसंहिता (आचाराध्यायरूपः प्रथामोऽध्यायः) । पुणा, आनन्दाश्रममुद्रणालयः।

श्रीमद्भगवद्गीता (वङ्गानुवादसहिता)। 2010। गोरखपुरम्, गीताप्रेस्।

श्रीमद्भगवद्गीता। 2013। स्वामिभावघनानन्दः (अनुवादकः)। कलकता, उद्बोधन-कार्यालयः।

श्रीमद्वैशम्पायणः । 1935 । ब्रह्मवैवर्तपुराणम् । आप्टे, विनायकः गणेशः (संशोधितः) । पुणा, आनन्दाश्रम-मुद्रणालयः।

सिंहः, अमरः। 2013। अमरकोषः (सुधाव्याख्यासहितः)। वाराणसी, चोखम्बा-संस्कृत-प्रतिष्ठानम्।

# वास्तुशास्त्रस्य लोकोपयोगिता महत्ता च

**डॉ. किसलयकुमारझा***

**वास्तुशास्त्रस्य परिचयः -**

विश्वस्य सर्वप्राचीनग्रन्थेषु वेदानामुल्लेखः प्राप्यते। वेदाश्चत्वारः सर्वविदिताः। चतुर्णां वेदानां चत्वारोपवेदा अपि सन्ति। यथा ऋग्वेदस्य आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः अथर्ववेदस्य च स्थापत्यवेदः। स्थापत्यवेदस्याभिप्राय निवासयोग्यस्थापनैव। वास्तुशास्त्रं वास्तु स्थापत्यं वेति विषयस्य महत्त्वमधुना समाजे निरन्तरं प्रवहवायोरिव परिवर्द्धमानं दृश्यते। वास्तुपदं वस्तुशब्देन वस् निवासे धातोः तुण्[1] प्रत्ययेन निष्पद्यते। वास्तोः पतिः 'वास्तोष्पतिः'। आवास सम्बन्धिनं यज्ज्ञानं तदेव वास्तुः। विश्वस्य प्राचीनतमग्रन्थे ऋग्वेदेऽपि वास्तोष्पतेः प्रार्थनायां मन्त्राः प्राप्यन्ते[2]। अथर्ववेदे विधिसम्मतं वास्तुनिर्माणं सौभाग्यश्रीरैश्वर्य-समृद्धिवंशवृद्धिकरञ्च प्रतिपादितम्।

**"इहैव ध्रुवां प्रतितिष्ठ शालेऽश्वावती गोमती सूनृतावती।**
**ऊर्जस्वती घृतवती पयंस्वत्युच्छ्रायस्व महते सौभगाय॥**
**सर्वसमृद्धिदो वास्तुः वंशवृद्धिकरः पालकः पोषकश्च भवति"[3]।**

उपर्युक्तफलं तदैव लभ्यते यदि गृहनिर्माणं वास्तुशास्त्रसम्मतं भवेत्। वास्तुशास्त्रमिदं वेदाङ्गभूतं ज्योतिषशास्त्रस्य संहिताभागान्तर्गतञ्च वर्तते[5]। ज्योतिषशास्त्रं स्कन्धत्रयात्मकम्[4], सिद्धान्तहोरासंहितास्कन्धरूपश्चेति। सिद्धान्तस्कन्धे[6] गणितीयसिद्धान्तानां सोपपत्तिकं विवेचनं भवति। तदाधारेण होरास्कन्धे[7] मानवजीवने घटितघटनानां व्यष्टिरूपेण विचारः क्रियते। संहितास्कन्धे[8] च समष्टिगतरूपेण भूगर्भविज्ञान-वनस्पतिविज्ञान-भूशोधन-दिक्शोधन-शल्योद्धार-आयाद्यानयन-इष्टिकाद्वार-गृहोपकरण-मेलापक-गृहारम्भ-गृहप्रवेश-वापी-कूप-तडागादिनिर्माण-सम्बद्धशुभवास्तुकार्याणां भूकम्पलक्षण-ग्रहयुद्धविचार-उल्कापात-वृष्टिविज्ञान-मुहूर्तविज्ञान-वास्तुविज्ञानादिविषयाणाञ्च विस्तृतरूपेण वर्णनं क्रियते[9]। वर्तमानकालिकसंहिताग्रन्थेषु जगत्प्रसिद्धवराहमिहिराचार्यकृतबृहत्संहितायान्तु आचार्येण स्थापितः। वास्तुविद्याध्याय-नाम्नैकोऽध्यायः वास्तुशास्त्रं वैदिकज्योतिषस्य समृद्धशाखा वर्तते, उभयोर्मध्ये अङ्गाङ्गि-भावसम्बन्धः वर्तते, यथा शरीरस्यान्यशरीरावयवैरभिन्नसम्बन्धः सर्वैः ज्ञायते, तथैव ज्योतिष-शास्त्रस्य स्वेतरशाखाभिः सामुद्रिकशास्त्र-प्रश्नशास्त्र-अङ्कशास्त्र-मुहूर्तशास्त्र-स्वरशास्त्र-वास्तु-शास्त्रादिभिरभिन्नसम्बन्धो वर्तते। उभयोः शास्त्रयोरुद्भवः वैदिकज्ञानस्य परम्परागतपृष्ठभूमितः जातः, मनुष्यजात्याः कृते सुविधासुरक्षयोः दानमिति समानलक्ष्यम्, मानवजीवनस्य घटनाचक्रस्य चाध्ययनमिति समानविचारक्षेत्रत्वात्परस्परमन्योन्यस्य पूरकत्वं भजते[10]। अस्याः शाखायाः पूर्णतायै ज्योतिषशास्त्रस्यावश्यकता बहुषु स्थानेषु भवति। यथा गृहारम्भविधौ वृषचक्रानुसारेण नक्षत्रशुद्धिः, लग्नादिविचारः, राशिभेदात् ग्रामवासः, भूशोधनार्थं खातविधौ राहुमुखविचारः, अहिबलचक्रनिर्माणविधिः, दिक्साधनम्, ग्रहनक्षत्रविचारः, एवमेवानेकवास्तुसम्बद्धविषयेषु

*सहायकाचार्यः, ज्योतिष (अतिथि), ल.दे.श.आ.सं. महाविद्यालयः, देवघरः, झारखण्डः

 ISBN: 978-81-930770-3-0

ज्योतिषशास्त्रस्याधारः स्वीक्रियते । एवं वास्तुशास्त्रं ज्योतिषशास्त्रस्याङ्गभूतमिति ज्ञायते । वस्तुशब्देन सत्तास्वरूपम् आकारविशेषो वा ज्ञायते । वस्तुसम्बन्धिज्ञानोपार्जनं येन भवति तद्वास्तुशास्त्रम् । यद्यपि व्यवहारे भूमि-भवन-वाहनाद्युपयोगसामग्रीणां वस्तुशब्देन बोधो जायते, तथापि विशेषतया भवननिर्माणकौशलस्य ज्ञानं वास्तुशास्त्रेण एव भवति । यतोहि ज्योतिष-शास्त्रस्यानेकेषु ग्रन्थेषु वास्तुसिद्धान्ताः समुपलभ्यन्ते । सूत्रधारमल्लानुसारेण गृहनिर्माणस्य शुभारम्भः ज्योतिषशास्त्रोक्तमुहूर्तेणैव क्रियते यथोक्तम्- "ज्योतिः शास्त्रोदिते लग्ने मुहूर्ते सुकरणे सद्गुणान्विते" इति । वास्तुशब्दस्यानेकेऽर्थाः भवन्ति, तेषु गृहार्थं भूमिः इत्येकोऽर्थः प्राप्यते । गृहनिर्माणार्थं या भूमिः सा वास्तुभूमिः । सामान्येन 'वास्तु' इति पदं गृहस्य वाचकम्[11] । वैदिक-पौराणिक-वास्तुशास्त्रसम्बद्धग्रन्थानामध्ययनेन ज्ञायते, यत् वास्तुशब्दस्यार्थः भवनार्थमेव, नापित्वनेकानेकनिर्माणसन्दर्भेषु प्रयुज्यते । मत्स्यपुराणे ऋषयः सूतमहोदयेभ्यः प्रश्नं कुर्वन्ति यत् वास्तुः कः ?[12] शब्दकल्पद्रुमग्रन्थेऽपि वास्तुशब्दस्योपरि प्रकाशः कृतः[13]। व्याकरणदृष्टौ वसन्त्यत्रेति वास्तुः । निवासार्थकात् वस् धातोः 'वसेस्तुन्नगारे णिच्च' इति तुन्प्रत्यये तस्य णिच्वद्भावे उपधावृद्धौ च वास्तुशब्दस्य सिद्धिः । वस् धातोः बहवोऽर्थाः भ्वादिगणे निवासार्थे, अदादिगणे आच्छादनार्थ चुरादौ च स्नेहेच्छापहरणेष्वर्थेषु वर्तते । वस्तुतः आरम्भकाले वास्तुशब्दस्यार्थः आवासीयभवनमासीत्, किन्तु कालक्रमेणास्यार्थः व्यापकः जातः, आवासीयभवनैः सह पशुशाला, भवननिर्माणसामग्री अपि वास्तुपदे सम्मिलिता[14]। मयमतानुसारं यत्र मनुष्याः देवताश्च निवसन्ति, सः वास्तु उच्यते, अस्याश्रयश्च भूमि-भवन-यान-शयनभेदेन चर्तुविध इति[15] ।

**वास्तुशास्त्रस्योपयोगिता महत्त्वञ्च -**

मानवजीवने वेदवेदाङ्गोपाङ्गानां महत्त्वपूर्णं स्थानमस्ति । यथा हि वेदाङ्गस्वरूप-ज्योतिश्शास्त्रस्य मानवजीवनस्य सम्पूर्णघटनानां विचारणे महत्त्वपूर्णं स्थानमस्ति तथैव वास्तुशास्त्रस्यापि महदुपयोगित्वं वर्तते । अथर्ववेदादारभ्य ब्राह्मणारण्यकोपनिषदादिग्रन्थेषु संहितायां तथा सूत्रग्रन्थेषु शिल्पशास्त्ररूपेण वास्तुशास्त्रस्य पर्याप्तनिदर्शनमस्ति[16] । शिल्पादि-दैवतम् इत्युक्ते शिल्पशास्त्रज्ञानाम् ऋषीणामेकं मण्डलम् । विश्वकर्माणं ते सप्तऋषि वन्तुमृच्छन्तु[17]। ते अथर्वणः दैवशिल्प-प्रासादशिल्प-नगरशिल्प-दुर्गशिल्प-धातु-करण-शिल्प-लेखशिल्पादि-विषये निपुणाः भवन्ति । इदं स्पष्टमेव यत् तस्मिन कालेऽपि केचन शिल्पकाराः जन्मना केचन कर्मणा च जायन्ते । वस्तुतः तस्मिन्समये स्थपतीनां कृते शिल्पज्ञानं रेखाज्ञानमावश्यकमासीत् । उच्यते- **वृत्तज्ञानं रेखाज्ञानं च यो जानाति स स्थापकः[18] ।** षोडशतापिनीविद्यायां वास्तुविद्यायाः महत्त्वपूर्णं स्थानं विद्यते । गृह्यसूत्रे च अथर्ववेदे सप्तमकाण्डे नवमनुवाके तृतीये सूत्रे उक्तम् **'वास्तु हि तद् यज्ञस्य यद् घृतेषु हविषु'** इति ।[19] यः वास्तुविद्यां शिल्पज्ञानं जानाति सः प्रतिमानिर्माणं कर्तुं शक्नोति । **"शिल्पात् प्रतिमा जायन्ते"**[20] अनेन ज्ञायते यत् तस्मिन् काले शिल्पविद्यायां प्रतिमानिर्माणमावश्यकमासीत् । यस्य कृते प्रतिमायाः ज्ञानं नास्ति, प्रतिमा निर्माणं च कर्तुं न जानाति सः शिल्पज्ञानमपि न जानाति । प्रतिमायाः निर्माणात् श्रद्धा सञ्चरतिः । श्रद्धातः

 ISBN: 978-81-930770-3-0

निष्ठा जायते, ततश्च ज्ञानमपि जायते, ज्ञानात् मोक्षो भवतीति[21]। आथर्वणीयानां मते य इदं पञ्चस्थानं जानाति स एव शिल्पशास्त्रस्याधिप्लुता वर्तते[22]। शतपतब्राह्मणग्रंथे वास्तुशास्त्र-विषयकं विस्तृतं विवेचनं द्रष्टुं शक्यते। तैत्तिरीयसंहितायां शांखायनगृह्यसूत्रे[23] आश्वलायनगृह्यसूत्रे[24] च वास्तुशास्त्रस्य व्यापकत्वं वर्णितं दृश्यते। वास्तुदेवतायाः वास्तुपुरुषः, वास्तोष्पतिः, गृहपतिः इत्येतानि नामान्तराणि'[25] वेदेषु सूत्रग्रंथेषु ब्राह्माणादिषु च प्राप्यन्ते। यदि वयं वास्तुमण्डलं पश्यामश्चेत् तत्र एते सर्वे देवाः प्रजापति-सोम-अग्नि-धाता-इन्द्र-रुद्रादयः गृहपतिरूपेण प्रतिष्ठापिताः सन्ति। यत्र वास्तोष्पतिः भवनस्य स्वामीरूपेणास्ति तत्र हि पृथ्वी स्वामिनीरूपेण वर्णितास्ति। वैदिकयुगादेव वेदिकानिर्माणम्, यज्ञकुण्डनिर्माणतोऽऽरभ्य अद्यावधिः भव्यप्रासादनिर्माणपर्यन्तम् इयं परम्परा अक्षुण्णा दृश्यते। वेदिकायाः निर्माणे द्विशतमिष्टिकाया आवश्यकता भवति। इष्टिकाकर्म वैदिककाले कथं विकसितमासीदिति द्रष्टुं शक्यते। मोहनजोदड़ोत्खनने तथा हड़प्पोत्खनने सभाभवनानाम्, मण्डपभवनानाम्, स्नानागारादीनाञ्च यावत्सुन्दरं निर्माणमासीत् तावदधुनापि न लभ्यते। ऋग्वेदे विभिन्नासु ऋचासु सहस्रस्तम्भसभाभवनादीनां वर्णनं दरीदृश्यते। केषाञ्चिन्जनानां मते प्रतिमापूजायाः प्रारम्भः पुराणमहाभारतकालतः प्रारम्भोऽभवत् परन्तु एपा भ्रान्तधारणा अस्ति। सिन्धुसभ्यताया उत्खनने विभिन्नानां पूजाप्रतीकानामाविर्भावः सञ्जातः। तेषामवलोकनेन वास्तुपुरुषस्य स्पष्टता प्राप्यते (यथा यौनिमुद्रायाः, शाकम्भरीदेव्याश्च प्रतिमाऽवलोकनेन)। वेदानामध्यनेन आरण्यको-पनिषत्ब्राह्मणादिग्रन्थनामवलोकनेनेदं सिद्ध्यति यत् वास्तोष्पतिः तथा विश्वकर्मा आर्यवास्तु-कलायाः सर्वप्राचीनः स्थपतिः, अनार्याणां मयः, प्रथमो स्थपतिश्चासीत्। देवकुले विश्वकर्मा तथा दानवकुले दनुपुत्रोऽयं मयः उत्पन्नोऽभवत्। उभयोर्मध्ये महती स्पर्धा आसीत्। "सा विद्या श्रेष्ठा प्रजापतेश्चाग्रा। प्रजापतेर्नारदः नारदान्मयः, मयाद् वैश्रवणः, वैश्रवणाद् पिप्पलादः" इति गृह्यसूत्रेषु वास्तुकलायाः महत्त्वपूर्णं स्थानं परिलक्ष्यते। वास्तुविद्याया अध्ययने गृह्यसूत्राणि प्रधानप्रमाणं भजन्ते। देवलस्मृतौ गृहस्थानां विभागद्वयं वर्णितं दृश्यते, यायावरः शालीनश्च। प्रायः यायावरीयः प्रवसनशीलः न एकस्थाने स्थिरः अध्ययन-यजन-दानवृत्तिशीलश्च वर्तते। परन्तु शालीनः प्रेष्यचतुष्पादनधनधान्ययुतशालायां स्थापकाः भवन्ति। अनेनेदं सिद्ध्यति यत् प्राचीनकाले बहुधां जनूशालां निर्माय एकस्थाने स्थिराः भवन्ति स्म। तस्माद् कारणादेव गृह्यसूत्रेषु शालाकर्मगृहनिर्माणविषयाणां विचारः संप्राप्यते। एतस्मादेव ज्ञायते यत् गृह्यसूत्रे विविधानां संस्काराणाम्, गृहसाध्यानाम्, विधीनाञ्च निदर्शनमस्ति। आश्वलायन-गोभिलादिगृह्यसूत्रेषु भूमिपरीक्षणम्, भूमेः प्रकाराश्च सविस्तृतं द्रष्टुं शक्यते। बौधायनजैमिनीयादिषु गृह्यसूत्रेषु केवलं वास्तुशमनं वास्तुशान्तिविषयकविवरणं प्राप्यते। कौषीतकि-हिरण्यकेशीयसूत्रयोर्भूमिपरीक्षणं विहाय आगारकरणं शालाकर्म वा वर्णितं दृश्यते। पारस्करगृह्यसूत्रे केवलं शालां कारयेत् इत्युक्तं वर्तते। भारद्वाजगृह्यसूत्रे शालाकर्मव्याख्यास्याम इत्याद्युक्तम्।

गृह्यसूत्रकालस्य मुख्यविशेषता एवमस्ति यत् तस्मिन्काले प्राचीनाचार्यैः प्रवसनशीलत्वं परित्यज्य शालीनत्वमङ्गीकृतम्। द्वितीयं वैशिष्ट्यमस्ति यत् वास्तुनिर्माणविषयकानां मूलस्वरू-

 ISBN: 978-81-930770-3-0

पाणां तथा सिद्धान्तानां प्रतिपादनम्। एभिराचार्यैः तत्र स्तम्भ-वंशाधान-प्राग्वंश-उत्खातद्वारादि-दिङ्निर्णय-पाकशाला-शयनीय-सभागृहादीनां वर्णनं कृतम् । तत्सर्वं सूत्रोक्तदिशा संक्षिप्तः स्वल्पकालीनः तान्त्रिकपौराणिकतत्वविरहितो विशुद्धश्च दरीदृश्यते । आश्वालायनगृह्यसूत्रे विवादरहितभूमेर्ग्रहणं विहितम् । आधुनिककालेऽपि अस्माभिः भूमिसंपादनं विचार्यते । गृह्यसूत्रकाले भूमिसंपादने कोऽपि क्रयविक्रयरूपव्यवहारो न दृश्यते। सूत्रग्रन्थेषु ब्राह्मणक्षत्रिय-वैश्यादीनां कृते कीदृशी भूमिः आवश्यकी तद् वर्णितं दृश्यते, परन्तु शुद्रस्य कृते कीदृशी भूमिरावश्यकी एतस्य विवरणं नास्ति । सभास्थानम्, पाकशाला शयनीयमित्यादीनां वर्णनेन गृहनिर्माणक्षेत्रे समीचीना प्रगत्तिरनुमीयते। अथर्ववेदे गृहनिर्माणस्योपमितां परिमितामिति शब्दस्य प्रयोगः वर्णितः दृश्यते। यथोक्तम् –

**"उपमिता प्रतिमितमथो परिमितामुत।**
**षापलाया विश्ववाराया नद्धानि वि चृतामसि" ।।**[26]

उपमायोग्यं गृहस्य निर्माणं कुर्यात्। सर्वथा उत्तमोपमायुक्तं गृहं निर्मातव्यम्। येन जनाः प्रशंसां कुर्युः। प्रतिमितामित्युक्ते एकस्मिन् द्वारसमक्षे द्वितीयस्य द्वारस्य निर्माणम्। कोणः कक्षस्य सम्मुखे भवितव्यम्। परिमिताम् इत्युक्ते चतुष्कोणं समानरूपेण विभज्य गृहस्य निर्माणमिति। येन विश्ववाराया अर्थात् गृहस्य सर्वेषु चतुष्कोणेषु द्वारस्य अथवा वातायनस्य निर्माणम् । अनेन चतुष्कोणेषु वायुः गृहे प्रसरेत्। चूतामसि इत्युक्ते शिल्पिनः वास्तुविदः यथा कथयन्ति तथैव गृहस्य निर्माणं करणीयम्, येन गृहस्थाः सुखिनो भवेयुः। अथर्ववेदस्य अन्यस्मिन् मन्त्रेऽग्नि-स्थापनार्थं गृहे हविर्धानम्, पत्नीनां सदनम्, स्त्रीणां सदनम्, अन्य सदस्यानां स्थानम्, पुरुषाणां तथा विदुषां स्थानम्, सभायाः स्थानम्, स्नानभोजनध्यानादिगृहाणां निर्माणं करणीयम्[27] इति वर्णनं लभ्यते । अनेनेदं ज्ञायते यत् गृहे सर्वदा अग्निस्थापनार्थं यज्ञशालायाः तथा स्त्रीणाम्, पुरुषाणाम्, विद्वन्जनानाञ्च निवासस्थानमवश्यं निर्मातव्यमिति। तथा सभास्थानम्, भोजन-स्थानम्, स्नानगृहम्, पृथक् पृथक् दिशि निर्मातव्यम् । एतेषां पृथक् पृथक् भवनानाम् आयः व्ययश्च चिन्तयित्वा निर्मातव्यम् । जीर्णगृहस्य आयं व्ययञ्च नैव चिन्तनीयम्। वास्तुशास्त्रे दिक्परत्वेन षोडशकक्षाणां विधानं वर्तते। ईशानकोणे देवतागृहम्, पूर्वदिशि स्नानगृहम्, आग्नेयपूर्वयोर्मध्ये दधिमन्थनगृहम्, आग्नेयदिशायां पाकगृहम्, अग्निप्रेतेशयोर्मध्ये आज्यगृहं दक्षिणदिशायां शयनगृहं प्रशस्यते। दक्षिणनैऋत्ययोर्मध्ये पुरीषत्यागगृहम्, नैऋत्यकोणे सूतिकागृहस्य निर्माणं करणीयम्।

नैऋत्यपश्चिमयोर्मध्ये पश्चिमदिशायां पाकशाला, विद्याभ्यासगृहम्, पश्चिमवायव्ययोर्मध्ये रोदनगृहम्, वायव्यां धनसंचयम्, उत्तरदिशि भण्डारगृहस्य च निर्माणं कर्त्तव्यम् । तथा वायव्योत्तरयोर्मध्ये रतिगृहम् उत्तरेशानयोर्मध्ये औषधगृहं समुचितं प्रशस्यते[28]। ध्रुवसंज्ञकं गृहं धनधान्ययुक्तं भवति । जयगृहं विजयप्रदसंज्ञकं भवति । नन्दगृहे स्वोहानिः, कान्तागृहं पुत्रपौत्र-वृद्धिकरञ्च भवति । खरसंज्ञकं गृहं सम्पत्तिविनाशकारकं तथा दुर्मुखगृहं विमुखताम्, क्रूरगृहं दुःखम्, विपुलनामकं गृहं भयं ददाति। क्षयसंज्ञकगृहं क्षयनामकरोगं ददाति। आऊंदनामकं गृहं शोकमुत्पादयति। गृहस्य पूर्वादिदिक्षुः षोडशालिन्दाः भवन्ति। यस्मिन् गृहे अलिन्दस्य शुभत्वं

 ISBN: 978-81-930770-3-0

नास्ति तद्गृहं कापालसंज्ञकं भवति। सृष्ट्यादित एव न केवलं मनुष्यैरेवापित्वन्यैरपिजीवजन्तुभिः नानाविधसुविधार्थमावासस्यावश्यकताऽनुभूता। अनेनैव हेतुना जलचराः समुद्रतडागादिषु, खगाः वृक्षकोटरेषु नीडेषु वा, वनेचराः गुहासु गहनवनेषु चात्मरक्षाऽनुरूपमावासमन्वेषयन्ति। यदा वन्यजीवाः स्वकीयरक्षार्थमावासीयव्यवस्थां कर्तुं शक्नुवन्ति, तदा मनुष्यः य एकः सभ्यः शिष्टश्च जीवो वर्तते स कथं स्वकीयरक्षार्थमभ्युदयार्थञ्चावासं नान्वेषयेत्। अत एव विश्वकर्मप्रभृतिभिः वास्तुविद्भिः शीतोष्णवर्षादिभिः मनुष्याणां रक्षणार्थं गृहनिर्माणं निर्दिष्टम्। यथोक्तम्–

**"स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।**
**वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः"[29]॥**

तृणनिर्मितगृहे कोटिघ्नम्, मृण्मये दशकोटिघ्नम्, ऐष्टिके शतकोटिघ्नं शैलनिर्मिते च गृहे कृतस्य धर्मानुष्ठानस्य अनन्तं फलं जायते। यथोक्तं बृहद्वास्तुमालायाम् –

**"कोटिघ्नं तृणजे पुण्यं मृण्मये दशसंगुणम्।**
**ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे"[30]॥**

अखिलं पुण्यं गेहादेव समुत्पद्यते। किन्तु ये जनाः परगृहेषु निवसन्ति, तैः यानि पुण्यकर्माणि क्रियन्ते तेषां फलं तेभ्यः निष्फलमेव। यतोहि तैः कृतपुण्यकर्मणां फलं भूस्वामिनमेव मिलति[31]। वेदेषु केवलं गृहनिर्माणविषयकमेव वर्णनं नास्ति, अपितु ग्रामवर्णनम्, नगरवर्णनम्, नगराणां स्वरूपम्, पुर-पुरीणां वर्णनं सविस्तृतं द्रष्टुं शक्यते।

**"अष्टा चक्र नव द्वारा देवानां पूः अयोध्या।**
**तस्यां हिरण्मयः कोशः स्वर्गो ज्योतिषावृतः॥**
**तस्मिन् हिरण्ये कोशे त्र्यरे विप्रतिष्ठिते।**
**तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः॥**
**प्रभ्राजमानां हरिणी यशसा संपरीवृताम्।**
**पुरं हिरण्यमयीं ब्रह्मा विवेशाऽपराजिताम्"[31]॥**

अर्थात् अयोध्यानगरी नवद्वारवती अस्ति। एषा वीराणां भूमिः। अत्र ऋषयः महर्षयः तपः आचरन्ति। अष्टाचक्रा इयं पुरी यशसा परिवृता अपराजिता च वर्तते। इयं पुरी दूरात् सुन्दरा दृश्यते। वास्तुशास्त्रानुसारेण निर्मितेयं पुरी कदापि पराजिता न भवति। भूविवरादीनां निर्माणं वास्तुविद्यायाः कौशलं निर्दिशति। सुवर्णमयी प्रभ्राजमाना इयं पुरी उत्तमसंरक्षणोपायै रक्षिता वर्तते। अस्यां हिरण्यमयः कोशः वर्तते। इयं पुरी स्वर्गादपि गरीयसी वर्तते। अनेनेदं ज्ञायते यत् वेदादिशास्त्रेषु वास्तुशास्त्रविषयकानां तत्त्वानां पर्याप्तं वर्णनमस्ति। वेदेषु वास्तुविद्यायाः पर्याप्तं निदर्शनं वर्तते। शाला-महाशालादीनां निर्माणम्, ग्रामपुरादीनां निर्माणं वेदेषु वर्णितं दृश्यत इति शम्।

 ISBN: 978-81-930770-3-0

## पादटिप्पणी

1) बामन शिवराम आप्टे, संस्कृत-हिन्दी कोशः, पृ. सं. 1333
2) वास्तोष्पते प्रतिजानीहास्मान्त्स्वावेशो अनमीवो भवा नः ।
यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ ऋ. सं. 7/54/1
वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरास्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ॥ ऋ. सं. 7/54/2
वास्तोष्पते शग्मया संसदा ते सक्षीमंदि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूबे पात स्वस्तिभिः सदा नः । ऋ से 7/54/3
3) अथर्ववेदे 3-22-7
4) "वास्तुकलासम्बन्धिज्ञानं भगवतोऽनादेः शिवस्य त्रिनेत्रस्वरूपं सिद्धान्त-होरा-संहितास्कन्धत्रयात्मकज्योतिःशास्त्रम् । यस्य संहिता भागान्तर्गतं कात्यायनचरणव्यूहोक्तविद्याऽथर्ववेदोपवेदप्रसूतस्थापत्योपनाम वास्तुविद्याविज्ञानं वेदाङ्गभूतमिति वा सम्बन्धः । "वा. सा. सं., श्रीकमलाकान्तशुक्लः, प्राक्कथनम् ।
5) ज्योतिः शास्त्रमनेकभेदविषयकं स्कन्धत्रयाधिष्ठितं तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते । संहितास्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥ बृ. सं. अ. 1. श्लोक 9
6) त्रुट्याद्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमाच्चारश्च द्युसदां द्विधां च गणितं प्रश्नास्तथा सोत्तयः। भूधिष्ण्यग्रह-संस्थितेश्च कथनं यन्त्रादि यत्रोच्यते । सिद्धान्त स उदाहृतोऽत्र गणितस्कन्धप्रबन्धै बुधैः ॥ सि.शि.प्र. म., श्लो.-6
7) होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापर्वर्णलोपात् ॥ बृ.जा,अ ।
'प्रतिष्ठयात्राविवाहादिनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चीयते सा होरा' । भट्टोत्पलः
8) तत् कार्त्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।' - बृ. सं. शास्त्रोपनयनाध्याय, श्लो. सं.-9
9) * भा. ज्यो., नेमिचन्द्र शास्त्री अ.1, 20
10) ' भा. वा., पुरोवाक्
11) 'ता वां बास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्ग अभ्यासः ।
अत्राह तदुरूगायस्य वृष्णः पदमवभाति भूरि ॥ ऋ1/54/06
12) * प्रासादभवनादीनां निवेशं विस्तरात् वद ।
कुर्यात् केन विधानेन कश्च वास्तुरुदाहृतः ।।म. पु. अ-252, श्लो. ।
13) वास्तु, क्ली, वास्तूकशाकम् । इति राजनिघण्टुः । वास्तु, क्ली. पुं. (वसन्ति प्राणिनो यत्र । वस निवासे "वसेरगारे णिच्च । " उणा. 1/70 । इति तुण । स च णित् गृहकरणयोग्यभूभिः तत् पर्यायः । वेश्मभूः 2 इत्यमरः ॥ पोतः 3 वाटी 4 इति जटाधारः ॥ वाटिका 5 गृहपोतकः शब्दारत्नावली ॥ - शब्द, दु. वाल्यूम 4. पू. 358. कालम-2.
14) * देवतानां नराणाञ्च गजगोवाजिनामपि ।
निवासभूभिश्शिल्पज्ञैर्वास्तुसंज्ञमितीर्यते ॥

 ISBN: 978-81-930770-3-0

इष्टिका च शिला दारुरयः कीलादयोऽप्यमी।
वास्तुकर्मणि चान्यत्र वास्तुसंज्ञमुदीरितम्॥
अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि।
तद् वास्त्विति मतं तज्ज्ञैस्तद्भेदं च वदाम्यहम्॥
भूमि-प्रासाद-यानानि-शयनं च चतुर्विधम्। - वि. क. वा., 9/1/61

15) भूरेव मुख्यवास्तु स्यात् तत्र जातानि यानि हि॥ मय. म., अ-2, श्लो.-1/2
16) काश्यपशिल्पम् भूमिका
17) वास्तुशास्त्रसूत्रोपनिषद् प्रथम प्रपाठक सूत्र-2
18) अथर्ववेदः 19/18/7
19) वास्तुशास्त्रोपनिषद्, पृ. 135, सूत्र 1
20) वास्तुशास्त्रोपनिषद्, पृ. 136, सूत्र 4
21) अथर्ववेदः 7/9/3
22) वास्तुशास्त्रोपनिषद्, पृ. 136, सूत्र 5
23) वास्तुशास्त्रोपनिषद्, पृ. 136
24) शतपथब्राह्मणः 1/7/3
25) शाडिल्यगृह्यसूत्रम् 2/14
26) अथर्ववेदः 1/3/1
27) हविर्धानमग्निशालं पत्नीनां सदनं सदः।
सदो देवानामसि देवि शाले॥ अथर्ववेद 1/3/7
28) पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेयां स्यान्महानसम्॥
शयनं दक्षिणस्यां च नैर्ऋत्यामायुधाश्रयम्।
भोजनं पश्चिमायां च वायव्यां धनसंचयम्॥
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम्।
इन्द्राग्न्योर्मथनं मध्ये यमाग्न्योघृतमन्दिरम्॥
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम्।
राक्षसजलयोर्मध्ये विद्याभ्यासस्य मन्दिरम्॥
तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम्।
कामोपभोगशमनं वायव्योत्तरयोः गृहम्॥
कौबेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा।
पुरन्दरेशयोर्मध्ये सर्ववस्तुषु संग्रहम्॥
सदनं कारयेदेवं क्रमादुक्तानि षोडश। बृहद्वास्तुमालायाम्, श्लो. 150-155
29) बृहद्वास्तुमाला, गृहारम्भविधिः - श्लोक 4
30) बृहद्वास्तुमाला, गृहारम्भविधिः - श्लोक 5
31) परगेहकृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः।
32) निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते॥ बृहद्वास्तुमाला गृहारम्भविधिःश्लोक 6

 ISBN: 978-81-930770-3-0

33) अथर्ववेदः 10/2/1

**सन्दर्भग्रन्थसूची**


1. बृहद्वास्तुमाला
2. अथर्ववेद
3. शान्डिल्यगृह्यसूत्र
4. शतपथब्राह्मण
5. वास्तुशास्त्रोपनिषद्,
6. काश्यप शिल्पम्
7. वास्तुशास्त्रसूत्रोपनिषद्
8. सिद्धान्त शिरोमणी
9. भारतीय ज्योतिष
10. मयमतम्
11. सूल्बसूत्र
12. मत्स्यपुराण
13. बृहत्संहिता


❀❀❀

 ISBN: 978-81-930770-3-0

# न्यायशास्त्रोक्तदृष्ट्या गुणवत्ताभिवर्धनोपायाः

**डॉ. पीताम्बरमिश्रः***

**वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ - र.वं.1.1**

यदा देशान्तराणि अज्ञानान्धकारगहनाच्छादितान्यासन् तदाऽस्य देशस्य ज्ञानसूर्यः मध्याह्ने स्वप्रखरमयूखे आलोकयन्निवासीत् लोकान्। मानवसमाजस्य कल्याणाय भगवता मनुना प्रोक्तं यथा - **एतद्देशप्रसूतस्य सकासादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ -** मनुस्मृति-2/201

नेयमुक्तिः भगवतः कल्पनैव अपि तु इतिहासनिकषे परीक्षमाणा यथार्थमित्युद्घोषिता प्राच्यावाच्यविपश्चिद्भूमिः। यतो हि अस्य देशस्य संस्कृतसाहित्यमतीवसमृद्धं विपुलतमं सार्वत्रिकं गौरवास्पदं वर्तते। आधुनिकैरपि भाषावैज्ञानिकैरिदं साहित्यं भारोपीयपरिवारस्य सर्वोत्कृष्टं साहित्यमिति बहुमानं स्वीकृतम्। येन तत्त्वेन यया च धारया मानवजीवनं प्रभावितं भवितुमर्हति तेषु सर्वेषु तत्त्वेषु सर्वासु च विचारधारासु संस्कृतज्ञानदृष्ट्यागताः तथा च स्वकीयोत्कृष्टप्रतिभा-प्रकाशेन तान् सर्वानपि क्षेत्रान् ते मनीषिणः प्रोद्भासितवन्तः। धर्मशास्त्र-नीतिशास्त्र-दर्शन-ज्योतिष-गणित-सामुद्रिकशास्त्र-कर्मकाण्ड-भक्ति-कामशास्त्र-वाणिज्यिक-काव्यशास्त्र-व्याकरण-संगीत-नाट्यशास्त्र-नाटक-कथासाहित्य-कलाशास्त्र-पशु-विज्ञानाद्युत्कृष्टानि साहित्यानि संस्कृत-साहित्ये विद्यन्ते।

संस्कृतं भाषाविचाराभिव्यक्तेः द्वारमस्ति। केवलं भाषाविचारयोः स्रोतमिति न अपितु समस्तविचाराणां अभिव्यक्ते साधनीभूता वैज्ञानिकी भाषा चास्ति। परन्तु प्राक्काले एवम्भूतां परिस्कृतां संस्कृतभाषां विहाय न काऽपि भाषा आसीत्। तेनैव क्रमेण संस्कृतसाहित्ये न्याय-शास्त्रस्य सर्वोत्कृष्टं स्थानं वर्तते। न्यायशास्त्रस्यादिमो ग्रन्थो न्यायसूत्रमस्ति। तस्य प्रणेता गौतम-मुनिर्विद्यते। न्यायशास्त्रस्य द्वौ विभागौ अवलोक्येते प्रमेयप्रधानः प्रमाणप्रधानश्चेति। येषु ग्रन्थेषु प्रमेयविचाराणां प्राधान्यं वर्तते ते प्रमेयप्रधानग्रन्थाः भवन्ति। यथा- न्यायसूत्रम्, वात्स्यायन-भाष्यम्, न्यायवार्त्तिकतात्पर्यटीकादयः ग्रन्थाः। येषु ग्रन्थेषु प्रमाणविचाराणां प्राधान्यं वर्तते ते ग्रन्थाः प्रमाणप्रधानाः भवन्ति। यथा- तत्त्वचिन्तामणिः, तत्त्वचिन्तामणिदीधिति इत्यादयः।

अत्र प्रमाणपदार्थानां निरूपणमस्ति। न्यायदर्शनस्वीकृतप्रमाणातिरिक्तपञ्चदशपदार्थाना-मन्तर्भावः प्रमाणेष्वेव विद्यते। पुनश्चात्र षोडशपदार्थानामुद्देशलक्षणपरीक्षाः सन्ति। आन्तरिक-गुणवत्ताप्रत्यायनप्रकोष्ठमध्येऽपि एतादृशानि लक्षण-परीक्षा-उद्देश्यानि अवलोक्यन्ते। गुणवता-निमित्तं प्रत्येकमपि निरीक्षणस्य आवश्यकताऽस्ति। एतदर्थं न्यायशास्त्रे वर्णितोऽस्ति यत्-

**"प्रदीपः सर्वविद्यानामुपायाः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मतेति"॥** (न्यायभाष्ये)

*सहायकाचार्यः, न्यायविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी

 ISBN: 978-81-930770-3-0

न्यायवाक्यस्वरूपनिरूपणावसरे दशावयववादाः नैयायिकैः प्रदर्शितः । परन्तु तत्र भाष्यकारसूत्रकृत्सम्मतः पञ्चावयववादः प्रमुखस्थानमधिकरोति। प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनादि प्रसिद्धाः पञ्च अवयवाः न्यायस्य भवन्ति यत्र चतुर्णां न्यायशास्त्रसिद्धप्रमाणानामेकार्थप्रतिपत्तौ समावेशः परिलक्ष्यते । यत्र प्रतिज्ञामाध्यमेन आगमस्य, हेतुमाध्यमेन अनुमानस्य, उदाहरणमाध्यमेन प्रत्यक्षस्य, उपनयमाध्यमेन उपमानस्य समावेशश्च भवति । लौहशलाकाकल्पानां परस्परं विशिष्टानां चतुर्णामेकत्र निगमने नियोजनमिति सिद्धान्तं वर्तते। किञ्च जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनं, व्युदासश्चेति पञ्चानां योगेन प्रसिद्ध्यति दशावयववादः । एषामर्थोपकारकत्वेऽपि अर्थसाधकत्वं नास्तीति न प्रयत्नप्रतिपादनीयमिति भाष्यकारः विवेचयति । जिज्ञासा परस्यावबोधाय नैव ज्ञायते । विरुद्धयोः धर्मयोः एक एव धर्मः भवति । अतः विरुद्धकोटिद्वयावगाहिसंशयः नार्थस्य भवितुमर्हति साधकः । प्रमाणेषु प्रमेयजननशक्तिः शक्यप्राप्तिः सा च प्रमातुः प्रमेयबोधाय प्रमाणं सफलयति न तु परप्रतिपादिका भवति।

प्रयोजनम् अर्थसाधकवाक्यस्य फलं न तु साधकवाक्यस्यैकदेशः। संशयव्युदासः प्रतिपक्षे हेतोरभावं निश्चिनोति, स च प्रमाणस्य प्रामाण्यसाधने समुपकरोति न तु परप्रतिपादको भवति । तस्मात् सावयववाक्यैकदेशता साक्षादर्थसाधकता च परप्रतिपादकवाक्यात्मके न्याये दशावयववादनिराकृतेः हेतुः भवति।

अनेन क्रमेण महाविद्यालयस्य, विश्वविद्यालयस्य चान्तरिकगुणवत्तापरिक्षणेऽपि प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनादयः पञ्चावयवाः स्वीकर्तव्याः । अनेन पञ्चावयवानां माध्यमेन तत्तत् शिक्षानुष्ठानस्य गुणवता निरूपणीया। यथा गुणाश्रयत्त्वं कर्माश्रयत्त्वं वा द्रव्यस्य सामान्यं लक्षणम् भवति तथैव शिक्षानुष्ठानानामपि भवन्ति। यत्र गुणस्याश्रयो नास्ति तत्र गुणवत्ताऽपि न स्यात् । एतदर्थं गुणाश्रयत्त्वं कर्माश्रयत्त्वं वाधारीकृत्य सर्वापि शिक्षासंस्थाः गुणवत्ताऽभिवर्द्धने प्रयत्नशीलाः जागरुकाश्च भवेयुः। येन शिक्षासंस्थानामभिवृद्धिः भवेत्।

मुमुक्षूणां मोक्षप्राप्तये भ्रमप्रमादरहितं यथार्थज्ञानमावश्यकम्। इदमेव तत्त्वाज्ञामिति नाम्ना व्यपदिश्यते। एतस्मादेव तत्त्वज्ञानान्मुमुक्षवो मोक्षं विन्दन्ति, नान्यथा, इदं तत्त्वज्ञानं न्यायदर्शने प्रमुखरूपेण प्रतिपादितमस्ति। न्यायशास्त्रस्यास्मिन् प्रकरणे प्रमाणश्चतुष्टयस्य वर्णनमवलोक्यते। अतः यावत्पर्यन्तं एतेषां प्रमाणानां विशदरूपेण वर्णनं नैव भवति तावत्पर्यन्तं सर्वेषां पदपदार्थानां विस्तृतरूपेण अवधारणा नैव भविष्यति। तत्र प्रत्यक्षप्रमाणस्य लक्षणं भवति यथा - "इन्द्रियार्थसन्निकर्षजन्यज्ञानम्" प्रत्यक्षम् इति । अनेन ज्ञानेन शिक्षासंस्थाया आन्तरिकगुणवत्तानिरीक्षणसमये NAAC सदस्याः समागत्य विविधविचारविमर्शं कृत्वा गुणवत्तायाः मानकनिर्धारणं कुर्वन्ति।

पुनश्च आन्तरिकगुणवत्ताविषये अस्माकं न्यायदर्शने वहवः दृष्टान्ताः समुपपलभ्यन्ते । न्यायदर्शने षोडशतत्त्वानि निश्रेयसप्राप्तये हेतुभूतानीति उक्तानि सन्ति। तद्द्वारैव मनुष्यः मोक्षं प्राप्तुं शक्नोति । तानि यथा- प्रमाणम्-प्रमेयम-संशयः-प्रयोजनम्-दृष्टान्तः-सिद्धान्तः-अवयवः-तर्कः-निर्णयः-वादः-जल्पः-वितण्डा-हेत्वाभासः-छलम्-जातिः-निग्रहस्थानं चेति। तत्र द्वयोः प्राधान्यमस्ति प्रमाणप्रमेययोः। प्रमाणं ज्ञानप्राप्तेः साधनमस्ति। "यथार्थानुभवः प्रमा तत्साधनं च प्रमाणम्"

ISBN: 978-81-930770-3-0

इति लक्षणानुसारेण यथार्थानुभवस्य साधनं प्रमाणम् उच्यते। प्रमीयत अनेन इति प्रमाणम्। प्रमाणं चतुर्विधं भवति- प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दप्रमाणञ्चेति। इन्द्रियार्थ-सन्निकर्षयोगेन यस्य ज्ञानस्य प्राप्तिः भवति तत् प्रत्यक्षमुच्यते। प्रत्यक्षं सामान्यतया द्विविधम्- निर्विकल्पक-सविकल्पकभेदात्। प्रत्यक्षप्रमाणस्य अन्यौ द्वौ भेदावपि भवतः लौकिक-अलौकिकभेदात्। लौकिकप्रत्यक्षम् अपि द्विधा भवति बाह्यम् आन्तरम् चेति। बाह्यं प्रत्यक्षम् एकमेव भवति। एवं रूपेण लौकिकं प्रत्यक्षं षड्विधं भवति। लैकिकप्रत्यक्षस्य कृते इन्द्रियार्थसन्निकर्षः षड्विधो भवति। यथा- संयोग, संयुक्तसमवाय, संयुक्तसमवेतसमवाय, समवाय, समवेतसमवाय, विशेषणविशेष्यभावभेदात्।

कस्यचन लिङ्गस्य हेतोः ज्ञानेन तत् लिङ्गधारकस्य वस्तुनो ज्ञानस्य प्राप्तिः अनुमानम् इत्युच्यते। अनुमानं त्रिविधं भवति। पूर्ववत्-शेषवत्-सामान्यतोदृष्टं चेति। अनुमानस्य कृते पञ्चवाक्यानि भवन्ति, प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः निगमनं चेति। यथा- पर्वतो वह्निमान् धूमात् यथा महानसम् तथा चाऽयं तस्मात् तथा इति। पुनश्च अनुमानस्य तृतीयोऽन्यो भेदो प्रकारो भवतिः। तदनुसारेण अनुमानं त्रिविधं भवति। केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकि-भेदात्।

पुनश्च अन्यद् विवेच्यं तत्त्वमस्ति प्रमेयम्। प्रमेयस्य ज्ञानं मुक्तेः साधकं भवति। अत्र प्रमेयं द्वादशविधं भवति- आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः (पुनर्जन्म) , फलम्, दुःखम्, अपवर्गश्चेति। तृतीय पदार्थः भवति संशयः - वस्तुविशेषस्य ज्ञानस्य प्राप्तिविषये सन्देहः। कस्यचन फलस्य प्राप्तये क्रियमाणं कार्यं प्रयोजनं भवति। विवादरहितं वादिप्रतिवादिमध्ये निर्णीतोऽर्थः सिद्धान्तो भवति। स सिद्धान्तः चतुर्विधो भवति- सर्वतन्त्र, प्रतितन्त्र, अधिकरण, अभ्युपगमभेदात्।

अवयवः ज्ञानस्य अङ्गानि। तानि पञ्चविधानि भवन्ति। प्रतिज्ञा-हेतु-दृष्टान्त-उपनय-निगमन भेदात्। संशयस्य परमो तर्कः भवति सन्देहतर्कानन्तरं जायमानानां निश्चयानां निर्णयः। वादिप्रतिवादिनोर्मध्ये जायमानं प्रश्नोत्तरं वादः। हेत्वाभासे हेतोः आभासमात्रमेव भवति।

न्यायदर्शनस्य दृष्टिः अतिसंवलितयथार्थवादस्य वर्तते। तदनुसारेण अस्य विश्वस्य मूले परमाणु-आत्मा-ईश्वरादयः नित्यपदार्थाः वर्त्तन्ते। येन जगत् स्थितमस्ति। इन्द्रियगोचरस्य जगतः वस्तुतः सदैव परमाणुः अस्य समवायिकारणत्त्वेन तिष्ठति। ईश्वरस्य निमित्तकारणं भवति। ईश्वरः अनुमानगम्यो वर्तते। ईश्वरस्यानुमानप्रकारश्च इत्यम् अस्ति- ईश्वरः अस्ति, कार्यात्, आयोजनात्, धृत्यादेः, पदात्, प्रत्ययतः, श्रुतेः, वाक्यात्, संख्याविशेषात्, अदृष्टतः च। तदुक्तम् उदयनाचार्येण-

**कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।**
**वाक्यात् संख्याविशेषाच्च साध्यो विश्ववदव्ययः॥**

सर्वेषु शास्त्रेषु प्रायेणात्मतत्त्वस्य विषये वर्णनमायात्येव परन्तु उपनिषत्सु अहं ब्रह्मास्मि, तत्त्वमसि, सत्यं ज्ञानमनन्तं ब्रह्म इति वर्तते। यथोक्तं कठोपनिषदि तस्य विषये–

**न जायते म्रियते च विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**

 ISBN: 978-81-930770-3-0

**अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥**

आन्तरिकगुणवत्ताऽभिवर्धनाय आदौ स्वस्थानस्योपरि आत्मचिन्तनमवश्यं कर्तव्यम्। तत्र अधीयानाः छात्राः बहुधा गुणसम्पन्नाः सन्ति । परन्तु तेषां गुणानां विकासाय अनुष्टानस्य आनुसङ्गिकि आवश्यकताऽस्ति। यथोक्तम् उपनिषदि– **"आत्मा वा अरे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः"** इत्यादि। एवं प्रकारेण वेदेषु, पुराणेषु, दर्शनेषु बहूनि तत्त्वानि सन्ति। तेषु तेषु तत्त्वेषु सर्वं संगृह्य स्वगुणानामार्विभावः कर्तुं शक्यते।

पुनश्च न्यायदर्शने आन्तरिकगुणवत्तापरिवर्धनार्थं हेत्वाभासस्योपरि अवश्यं दृष्टिः देया । हेत्वाभासपदमिदं न्यायसूत्रकारेण गौतमेन प्रथमतः प्रयुक्तम्, यथा- सव्यभिचारविरुद्धप्रकरण-समसाध्यसमकालातीताः हेत्वाभासा इति पञ्चविधान् हेत्वाभासान् निरूपयामास।

आदौ सव्यभिचारः - एकत्र नियमेन अनवस्थितिः व्यभिचार उच्यते। तया सह वर्तत इति सव्यभिचारः । अत एव गौतमेनापि सव्यभिचारः अनैकान्तिकतया अभिवर्णिता । उदाहरण-मिदमस्य- शब्दः नित्यः स्पर्शत्वात्। कुम्भश्च स्पर्शवान् अनित्यः दृश्यते। शब्दः न तथा, स्पर्शवान्। अतः अस्पर्शत्वात् नित्यः शब्द इति। अत्र स्पर्शवत्त्वम् अनित्यत्वे साध्यसाधनरूपे न भवतः। न केवलं पक्षे सपक्षे च किन्तु विपक्षे च वर्तमानः । सव्यभिचारोऽयं त्रिविधः - साधारणासाधारणानुपसंहारभेदेन। तत्र सपक्षविपक्षवृत्तिः साधारणः सव्यभिचारः। यथा- पर्वतो वह्निमान् सत्त्वात् इति । सपक्षविपक्षव्यावृत्तः असाधारणः यथा- पृथिवी नित्या गन्धवत्त्वात् । अन्वयव्यतिरेकि दृष्टान्तः रहितोऽनुपसंहारी। यथा सर्वं तुच्छं प्रमेयत्वादिति।

द्वितीयः हेत्वाभासः भवति विरुद्धः। स्वसिद्धान्तविरुद्धार्थसाधकः हेतुः विरुद्धः। अभ्यु-पगतं सिद्धान्तमेव विरुद्धादि अयमिति विरुद्धो नाम हेत्वाभासोऽयम् । वार्तिककारः अन्यदपि लक्षणं विरुद्धस्य अभिदधौ । प्रतिज्ञाविरोधी हेतुः विरुद्ध इति । साध्यः व्यापकीभूताभावप्रति-योगित्वं विरुद्धत्वमिति फलितोऽर्थः। यथा- शब्दो नित्यः कृतकत्वात् इति। अत्र कृतकत्वरूपो हेतुः नित्यत्वाभावेन अनित्यत्वेन व्याप्त इति । अयं विरुद्धः हेत्वाभासः तृतीयः हेतुः भवति । सत्प्रतिपक्षः- अयं गौतमेन प्रकरणसमपदेन व्यवहृतः। प्रकरणं नाम पक्षप्रतिपक्षौ विमर्शाधिष्ठानौ अनिर्णीतार्थौ। तेन प्रकरेण समः प्रकरणसमः। सत्प्रतिपक्षापरपर्यायः हेत्वाभासोऽयम्। यथा- शब्दो नित्यः श्रावणत्वात्, शब्दत्ववत्, शब्दोऽनित्यः कार्यत्वात्, घटवदिति । यस्य हेतोः साध्याभावसाधकः, अपरः हेतुः विद्यते सत्प्रतिपक्षः।

असिद्धः साध्यवत् यत्र हेतुरपि साधनीय भवति स साध्यसम इत्युच्यते । बाधः – साध्यशून्यपक्षत्वं बाध इत्युक्तम्। यस्य हेतोः साध्याभाव अन्येन प्रमाणेन निश्चितः स बाधितः। समस्तविद्यायाः प्रतिपाद्यं यत् अग्निहोत्रादारभ्य कृषिपर्यन्तं वर्तते तत्र आन्वीक्षिकी उपायभूता विद्या वर्तते। यथा- **"आदित्यो वै यूपः"** इति श्रुतिवाक्ये यूपस्यादित्यस्वरूपतां विद्वज्जनाः नैव स्वीकुर्वन्ति। तदर्थं संशयपरीक्षा, प्रमाणानां विनिवेशनं करणीयम्। तेन वास्तविकमर्थं ज्ञात्वा अनुष्ठाने परिहारकरणे श्रुतेः विनियोगो भवति। एवमेव दण्डनीतौ वार्तादिशास्त्रेऽपि प्रमाणानां विनियोगद्वारैव न्यायशास्त्रस्योपयोगः वर्तते।

**तत्रोपनिषदं तात ! परिशेषं तु पार्थिव ।**
**मथ्नामि मनसा तात ! दृष्ट्वा चान्वीक्षिकीं परम् ॥** (म.मो.पृ)

इत्युक्तं मोक्षधर्मप्रकरणे महाभारते व्यासेन। अर्थात् उपनिषदां रहस्योद्घाटनं न्यायशास्त्रस्य ज्ञानं विना सम्यक् रूपेण नैव कर्तुं शक्यते । नीतिसारे आचार्यकामन्दकेनापि चतसृषु विद्यासु प्राथम्यं तर्कविद्याया एव प्रदर्शितम् । उक्तं च नीतिसारे –

**"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।**
**विद्याश्चतस्त्र एवैता लोके संस्थितिहेतवः ॥** (का.नी)

न्यायशास्त्राध्ययनेनैव सम्यग्रूपेण वेदानां प्रामाण्यसाधनं भवितुमर्हति । आगमे प्रामाण्य-ज्ञानानन्तरमेव वेदोक्तविषये प्रवृत्तिर्भवति । श्रुतिस्मृतिपुराणेषु विद्यासु अन्यतमत्वं न्यायविद्याया वर्तत इति प्रतिपादितम् । मुण्डकोपनिषदि उक्तं प्रथममुण्डके- **"द्वे विद्ये वेदितव्ये, इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च"** (मु.उ.प्र.ऋग्वेदः) । यजुर्वेदो, सामवेदो, अथर्ववेदो, कल्पो, व्याकरणम्, निरुक्तम्, छन्दो, ज्योतिषमिति पराविद्याः भवन्ति । न्याय-इतिहास-पुराणं-मीमांसा-धर्मशास्त्राणि इति अपराविद्याः वर्तन्ते। न्यायशास्त्रमुद्दिश्य न्यायशब्दस्य प्रयोगः श्रुतौ बहुत्र दृश्यते। न्यायपदवाच्यं न्यायशास्त्रमेव भवति । यतो हि मीमांसाधर्मशास्त्रयोः न्यायपदवाच्यत्वेऽपि तयोः साक्षाद्रूपेण उल्लेखितम् ।

**कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ।**
**गौतमेन तथा न्यायः सांख्यं तु कपिलेन वै ॥** (प.पु. उ.अ-263)

इत्युक्तं पद्मपुराणे उतरखण्डे व्यासदेवेन । अपि च विष्णुपुराणेऽपि उक्तम् –

**अङ्गानि चतुरो वेदाः मीमांसा न्यायविस्तरः ।**
**पुराणं धर्मशास्त्रं च विद्या ह्येता चतुर्दश ॥** (वि.पु.अ. उ)

एवमुक्तप्रकारेण न्यायविद्यया सह सर्वेषां विद्यानां सम्बन्धः वर्तते । आन्तरिकगुणवत्ता-निमित्तं न्यायविद्यायाः महद्योगदानमस्ति। मानवसमाजस्याभ्यन्तरगुणानामभिवर्धनार्थं दर्शनशास्त्र-स्यातीव योगदानं वर्तते । अनया पद्धत्या समस्तशिक्षासंस्थानामान्तरिकगुणवत्ता अभिवर्द्धते ।

❀❀❀

 ISBN: 978-81-930770-3-0

# भारतजनकीयकाव्ये छात्राणामान्तरिकगुणवत्ताऽभिवर्द्धनोपायाः

कृष्णानन्दः*

**उपोद्घातः**

**वैदिकी संस्कृतिः पुण्या पुरुषार्थचतुष्टयम् ।**
**शिष्ट्वा लोकान्पुनात्येषा सत्याचारगुणप्रदा ।।**[1]

अनया रीत्या संस्कृतिः समस्तमानवजीवनस्य गुणवत्तां प्रकाशयति । चिन्तनम्, मननम्, अन्वेषणम्, विश्लेषणम्, दया, दाक्षिण्यम्, पवित्रता, दार्शनिकता, कर्तव्याकर्तव्यविवेचनम्, प्रकृतिपुरुषयोर्भेदाभेदविवेचनम्, जीवनस्योद्देश्यं लक्ष्यं च सर्वमेतत् संस्कृतिशब्देन स्वीक्रियते । सेयं महनीया पवित्रा च संस्कृतिः वेदादिषु शास्त्रेषु प्राप्यते । वेदादिशास्त्राणामध्ययनं तथा तदन्तर्निहिततत्त्वानामवबोधनं सर्वेषां कृते सुकरं न भवति । अतः वेदादिशास्त्रेषु विमुखाः सन्तः मानवाः तत्त्वज्ञानाय काव्यशास्त्राणामध्ययनं कुर्वन्ति । यतोहि काव्यशास्त्रं सरलया गिरा कोमलशब्दान् प्रयुज्य कान्ता इव उपदिशति । किञ्च मानवानां हृदि विद्यमानस्य अविद्यारूपकस्य रोगस्य निराकरणं करोति । यथोक्तम् –

**कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।**
**आह्लाद्यामृतवत्काव्यमविवेकगदापहम् ।।**[2]

तथा च काव्यशास्त्रं मानवजीवनस्य मुख्यसाधनोपायचतुष्टयस्य ज्ञानमपि प्रयच्छति। यथा-

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।**[3]

अनेन प्रकारेण अधीयानानां कोमलमतीनां छात्राणां कृते यज्ज्ञानं या च संस्कृतिरपेक्ष्यते तत्सर्वं भारतजनकीयकाव्ये दरीदृश्यते । तदहमालोचयामि यथा -

**भारतजनकीयकाव्यस्य परिचयः**

भारतजनकीयम् एकं श्रव्यकाव्यं वर्तते । यस्य काव्यस्य रचयिता श्रीवाचस्पतिकरशर्मा वर्तते । असौ उत्कलीयकविः जातीयपितुः महात्मगान्धिनः चरित्रमधिकृत्य सप्तसर्गविशिष्टं भारतजनकीयकाव्यमरचयत् । काव्यस्यास्य सप्तमसर्गः महात्मगान्धिनः बुद्धि-विवेक-क्रिया-चिन्तन-अध्ययन-अध्यापन-प्रेरण-अहिंसादीनां गुणानां वर्णनं करोति । येषां गुणानामवलोकनेन छात्राणामान्तरिकगुणवत्तायाः अभिवृद्धिः भविष्यति । तदत्र मया आलोच्यते किञ्चित् । यथोक्तं करशर्मणा-

**पूतं ततो भारतवर्षदेशं पुपोष राजा सुत निर्विशेषं ।**
**शशास धर्मेण समाः सहस्रं दानं सुपात्रेषु ददावजस्रम् ।।**
**वेदैः पुराणैः प्रतिपादिता या सनातनीसंस्कृतिरीतिनीतिः ।**
**वर्णाश्रमाचारविधिं प्रजासु प्रवर्त्तयामास दृढं स्वदेशे ।।**[4]
**सुधांशुतुल्यः सुखदो नरेशः शिष्टेषु दुष्टेषु खरांशुतुल्यः ।**

*अनुसन्धात्री, संस्कृतविभागः, महाराजाश्रीरामचन्द्रभञ्जदेवविश्वविद्यालयः
तकतपुरः, बारिपदा, ओडिशा

 ISBN: 978-81-930770-3-0

**समानवर्त्तीस्वजने च शत्रौ न्यायप्रदाने भरतो बभूव ।।**[5]

**भारतजनकीयकाव्ये महात्मगान्धिनः विचारधारा**

महात्मगान्धिनः विचारधारा अत्युन्नता वर्तते। सः सूत्रधार इव देशस्य समस्तनागरिकाणां कृते कार्यमकरोत् । दलित-निष्पेषित-पीडित-शोषितनागरिकाणां सर्वविधोन्नत्यै स्वात्मानं समर्पयत्। विशेषतः दलितनागरिकाणां समुत्थाने तथा अस्पृश्यनिवारणे सामाजिकस्थिति-सुदृढार्थं स्वकीयक्रान्तिसमन्वितान् विचारान् समुपस्थापयत् । गोरक्षा-स्त्रीशिक्षा-मौलिकशिक्षा-हस्तकलानादीनां सुरक्षायै महत्त्वपूर्णं योगदानं व्यदधात्। यथोक्तं कपिलेन –

**स्वातन्त्र्यहेतुं सुखशान्तिसेतुं सत्यस्य केतुं रिपुधूमकेतुम्।**
**देशोन्नतौ त्यक्तसमस्तवित्तं नमामि गान्धिं गुणगौरवाब्धिम्।।**[6]

किञ्च सः श्रीमद्भगवद्गीतायाः नीत्यपाठकः आसीत्। भगवद्गीतायाः सारतत्त्वं विज्ञाय कर्तव्यावबोधकमार्गे प्रव्यचलत्। संसारस्य कल्याणाय सः अहिंसानीतेः अनुसरणमकरोत्। तस्य सर्वश्रेष्ठा पद्धतिः अहिंसा आसीत्। अहिंसया एव पराधीनभारताय स्वाधीनतामददात्। अत उक्तं श्रीवाचस्पतिकरशर्मणा -

**स्वाधीनतामाप्तुमथ स्वदेशे निरस्त्रसंग्रामविधिं विचिन्त्य।**
**कंग्रेसनाम्नाऽखिलभारतीय मनस्विनां संघमतश्चकार ।।**
**यतस्त्विमं भारतवर्षदेशं वैदेशिकानां दृढपाशबन्धात्।**
**विमुच्य प्रादान्नवजन्म चास्य ख्यातस्ततश्चात्र स बापुजीति ।।**[7]

किञ्च - **सत्याहिंसागुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।**
**विश्वशान्तिसुखाधात्री भारतीया हि संस्कृतिः ।।**[8]

अतः श्रीमद्भगद्गीता छात्रैः नीत्यं पठनीया । गीतोक्तोपदेशमार्गेण प्रविचलन् यथा माहात्मगान्धिः प्रतिष्ठामवाप तथा तमेव मार्गमनुसृत्य अधीयानाः छात्राः यशः प्राप्नुयुः । किञ्च देशोन्नतिमूलककार्ये निमग्नाः सन्तः तेषां आन्तरिकगुणवत्तायाः विकासं कुर्युः ।

**महात्मगान्धिनः आध्यात्मिकी भावना**

मनुष्याणां जीवनं न केवलं भोगविलासार्थमेव, अपितु आत्मनः, बुद्धेः, चिन्तनस्य, आध्यत्मिकभावनायाश्चोन्नतेः प्रमुखं साधनम्। आध्यात्मिकभावनया जीवनस्य उन्नतिः भवति। एषा भावना चेतः प्रसादयति। आत्मानं मोक्षस्य मार्गं दर्शयति। अनया भावनया मनसि सहृदयता, औदार्यादिगुणाः प्रवर्तन्ते। इयमाध्यात्मिकभावना मानवं श्रेष्ठत्वं प्रापयति। सा भावना सर्वभूतेषु एकत्वं समीक्षते । अनया भावनया महात्मगान्धिः जगति प्रसिद्धः वर्तते । उपनिषत्सु श्रीमद्भगवद्गीतायाञ्च अस्याः भावनायाः विशेषमहत्वं वर्णितं दृश्यते। यथोक्तम् -

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपस्यति।**
**सर्वभूतेषु चात्मानं ततो न विजिगुप्सते ।।**
**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।**[9]

 ISBN: 978-81-930770-3-0

**महात्मगान्धिनः सदाचारपालनम्**

"**आचारो परमो धर्मः**" इति धर्मशास्त्रवचनमुररीकृत्य सदाचारपरिपालनं मानवस्य परमो धर्मः भवति। सदाचारः शारीरिकसमुन्नतेः, मानसिकोन्नतेः, बौद्धिकोन्नतेः, आध्यात्मिकोन्नतेश्च कारणं भवति । सदाचारस्याचरणेन चरित्र-शील-संयम-दम-वशीकरणादयो गुणाः प्राप्यन्ते । यथोक्तम् - **त्यागं दयां कष्टसहिष्णुतां च स्वयं प्रजग्राह दृढं मनस्वी।**
**उपासनीयं नहि किञ्चिदत्र शत्यात्परं नास्ति विनिश्चयश्च ।।**[10]

**सत्यपरिपालनम्** –

**बभूव बाल्यादपि सत्यसन्धः सौभ्रात्रभावैः प्रिययुक्तवाग्भिः ।**
**तुतोष पित्रादिसुहृज्जनान् सः सदा समन्ताद्दययाऽऽर्जवेन ।।**[11]
**गते नु तस्मिन् परिदर्शके गुरौ अतर्जयत् तमवनीतबालम्।**
**तदाऽब्रवीत् मोहनदास तत्र चौर्यं न कुर्यामिति मे प्रवृत्तिः ।।**[12]
**श्रीरामभक्ताधवधर्मजीवा सा पुत्तली सन्ततिवत्सला च।**
**दृष्वा सुतस्येदृश सत्यनिष्ठां प्रत्याह तं साश्रुलनेत्रपद्मा ।।**[13]

**अहिंसापरिपालनम्** –

**दृष्ट्वा पराधीनमथ स्वदेशं प्रजासु वैदेशिकशासकानाम्।**
**अन्यायवृत्तिं करभारमुग्रं तन्निग्रहार्थं समचिन्तयत्सः ।।**
**स्वाधीनतामाप्तुमथ स्वदेशे निरस्त्रसंग्रामविधिं विचिन्त्य।**
**कंग्रेसनाम्नाऽखिलभारतीय मनश्विनां सङ्घमतश्चकार ।।**
**स वै मनस्वी सहयोगिभिश्च सम्मिल्य वैदेशिकशासकानाम्।**
**बिरुद्धचर्य्यां भृसमाचचार अहिंस्रवृत्त्याऽनशनादियौगैः ।।**[14]

**देशभक्तिः -**

**कारादिदण्डं बहुशः प्रसह्य वाग्भिः सुतर्कैश्च विजित्य तान्सः ।**
**विसर्जयामास द्रुतं स्वदेशात् समानयज्जन्मभुवः स्वराज्यम्।।**[15]

**त्यागस्य महिमा** –

**अथैकदा नाटकदर्शनार्थं गत्वा वयस्यैः सह रङ्गमञ्चे।**
**भव्यं हरिश्चन्द्र नृपस्य तत्र सत्यप्रतिज्ञस्य दयापरस्य ।।**
**दृष्ट्वा हरिश्चन्द्रनृपस्य कीर्तिं मुमोदमानः क्रियया च सर्वम्।**
**तथा विधातुं किल भारतेऽस्मिन् दृढां प्रतिज्ञामकरोत्स बालः ।।**[16]

**मतृपितृगुरुदेशभक्तिः** –

**श्रीरामरामेति जपन्मनुष्यः सद्यः प्रमुच्येत समस्त पापात्।**
**भयाद्धि मुच्येत ततो नु वत्स श्रीरामनाम प्रयतो जप त्वम्।।**[17]
**एवं जनन्या प्रतिबोधितश्च पित्रा समालिङ्गितस्नेहसिक्तः ।**
**स रामनाम्नि दृढभक्तिनिष्ठां सत्ये च श्रद्धामचलां दधार।।**[18]

 ISBN: 978-81-930770-3-0

**राष्ट्रसेवा-**

भारतजनकीयकाव्यस्याध्ययनेन इदं ज्ञायते यत् महात्मगान्धिना समस्तजीवनकालः राष्ट्रसेवयै समर्पित आसीत्। राष्ट्रसेवा परमो धर्मः इति विचिन्त्य सः अखिलभारतीय-कंग्रेसनामकस्य कश्चित् सङ्घस्य निर्माणं कृत्वा तत्र सर्वान् भारतीयान् एकत्रीकृत्य, घोरां यातनां प्रसह्य, कठोरयन्त्रणां सोढ्वा, आधिव्याधिपीडामुपेक्ष्य सत्याहिंसादिपथे प्रव्यचलत्। सः देशस्य स्वाधीनतायै सत्याग्रह-असहयोगान्दोलनादिकार्यं कृत्वा वैदेशिकयवनानां विरोधमकरोत्। भारतस्वाधीनस्य गान्धिरेव मूलमन्त्र इति विज्ञाय भीताः सन्तः वैदेशिकाः स्वदेशं प्रतिजग्मुः। ततो महात्मगान्धिनः महनीयकार्यमवलोक्य तस्मै सुभाषचन्द्रबोसमहोदयेन राष्ट्रपिता इति उपाधिः प्रदत्ता। ततो समस्तजगति महात्मगान्धिः भारतस्य राष्ट्रपिता इति नाम्ना ख्यातः।

**उपसंहारः**

देशस्य निर्माणे संरक्षणे अभिवर्द्धने च छात्राणां महद्योगदानं वर्तते। छात्राः विकसितभारतस्य भविष्याः सन्ति। समग्रभारतभूखण्डः छात्राणां हस्ते न्यस्तो वर्तते। तदर्थं छात्राः स्वकीयजीवनशैलीं परिवर्तयेयुः। देशस्य सुरक्षायै अभिवृद्धये च स्वात्मानं समर्पयेयुः। श्रीमद्भगवद्गीतादीनामुपदेशग्रन्थोक्ततत्त्वानां सुतरामध्ययनं कुर्युः। तेनैव जीवन्मुक्तिः भविष्यति। यथोक्तम्-

**इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टः।**
**भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति॥**[19] इति।

**<u>पादटिप्पणी –</u>**

1. महर्षिकपिलः
2. वक्रो.जी.1.7,पृ.12
3. सा.द.1.2
4. भा.ज.6.1-2
5. भा.ज.6.5
6. महर्षिकपिलः
7. भा.ज.7.33-34
8. महर्षिकपिलः
9. ईशोप.6-7
10. भा.ज.7.30
11. भा.ज.7.11
12. भा.ज.7.16
13. भा.ज.7.23
14. भा.ज.7.33-35
15. भा.ज.7.36

**16.** भा.ज.7.28-29
**17.** भा.ज.7.25
**18.** भा.ज.7.27
**19.** केनोप.2.5

**सन्दर्भग्रन्थाः –**


1. वक्रोक्तिजीवितम्, आचार्यकुन्तकः, व्याख्याकारः पं परमेश्वरदीन पाण्डेयः, चौखम्बासुरभारती-प्रकाशनम्, वाराणसी-221001, 2010.
2. साहित्यदर्पणः, विश्वनाथकविराजः, व्याख्याकारः आचार्य शेषराजशर्मा रेग्मी, चौखम्बाकृष्ण-दासअकादमी, वाराणसी-221001, 1999
3. ईशोपनिषद्, श्रीशङ्कराचार्यः, गीताप्रेसः, गोरखपुरम्.
4. आधुनिकभारतम्, मणिव्याख्यायुक्तम्, रचयिता व्याख्याकर्ता च प्रो. सूर्यमणिरथः, प्रकाशिका - कवितारथः, मातामठलेन, चूडङ्गसाहि, पुरी, ओडिशा-752001, 2009.
5. संस्कृतनिबन्धशतकम्, डा. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, चौक, वाराणसी -221001, 2010
6. भारतजनकीयम्, श्रीवाचस्पतिकरशर्मा, अनुसन्धात्री – कृष्णानन्दः, संस्कृतविभागः, महाराजा-श्रीरामचन्द्रभञ्जदेवविश्वविद्यालयः, तकतपुरः, बारिपदा - 757003, (ओडिशा)


❀❀❀

 ISBN: 978-81-930770-3-0

# प्राचीन भारतीय इतिहास का भारतीय ज्ञानप्रणाली में योगदान

डॉ. शिव शङ्कर यादव*

## प्रस्तावना

भारतीय ज्ञान प्रणाली (IKS) भारत की समृद्ध सांस्कृतिक विरासत और प्राचीन सभ्यता का दर्पण है, जिसमें दर्शन, विज्ञान, कला, चिकित्सा, वास्तु, कृषि और सामाजिक संगठन जैसे विषयों की गहराई से व्याख्या मिलती है। यह प्रणाली हजारों वर्षों से भारतीय समाज के विकास की आधारशिला रही है। आधुनिक भारतीय इतिहास, विशेष रूप से 18 वीं शताब्दी के बाद से, IKS के पुनरुद्धार और संरक्षण की दिशा में निर्णायक रहा है।

ब्रिटिश शासन ने पारंपरिक शिक्षा प्रणालियों जैसे गुरुकुल और मदरसे को कमजोर कर दिया, और पश्चिमी मॉडल को प्राथमिकता दी। परिणामस्वरूप, आयुर्वेद, योग, ज्योतिष और वास्तुशास्त्र जैसे विषय हाशिए पर चले गए। हालांकि, स्वतंत्रता संग्राम के दौरान गांधीजी, टैगोर और विवेकानंद जैसे नेताओं ने भारतीय संस्कृति और ज्ञान की पुनर्प्राप्ति को अपने आंदोलन का केंद्र बनाया।

स्वतंत्रता के बाद भारत सरकार ने IGNCA, NCERT, और UGC जैसे संस्थानों के माध्यम से IKS को शिक्षा और शोध में पुनः स्थापित किया। राष्ट्रीय शिक्षा नीति 2020 में भी IKS को पाठ्यक्रम में शामिल करने पर जोर दिया गया। योग और आयुर्वेद को वैश्विक पहचान मिलने से भारत की पारंपरिक स्वास्थ्य प्रणाली को नया जीवन मिला।

आज, आधुनिक तकनीक और डिजिटल प्लेटफॉर्म IKS के प्रसार में मदद कर रहे हैं। भारत का आधुनिक इतिहास इस बात का गवाह है कि कैसे एक उपेक्षित प्रणाली को पुनर्जीवित कर राष्ट्रीय और वैश्विक पहचान दिलाई गई। यह प्रक्रिया न केवल सांस्कृतिक पुनर्जागरण की ओर संकेत करती है, बल्कि भविष्य के लिए ज्ञान आधारित भारत की नींव भी रखती है।

## औपनिवेशिक युग में IKS का पतन

ब्रिटिश शासन के दौरान भारत की पारंपरिक शिक्षा और ज्ञान प्रणालियों को योजनाबद्ध रूप से कमजोर किया गया। पहले जहाँ गुरुकूल और मदरसे भारतीय शिक्षा का मूल आधार थे- जहाँ वेद, आयुर्वेद, ज्योतिष, गणित, दर्शन आदि विषय पढ़ाए जाते थे- वहीं अंग्रेजों ने इन्हें व्यवस्थित रूप से समाप्त कर दिया। मैकाले की शिक्षा नीति (1835) ने अंग्रेजी भाषा और पश्चिमी विषयों को प्राथमिकता दी, जिससे भारतीय ज्ञान को "अवैज्ञानिक" और "पिछड़ा" घोषित कर दिया गया। इसने भारत की शैक्षणिक आत्मनिर्भरता को बुरी तरह प्रभावित किया।

आयुर्वेद, योग, वास्तु और ज्योतिष जैसे समृद्ध भारतीय विषयों को विज्ञान के स्तर से नीचे माना गया और इन्हें औपचारिक शिक्षा प्रणाली से बाहर कर दिया गया। परिणामस्वरूप, इन शास्त्रों का जनसंपर्क कम होता गया और नई पीढ़ियाँ इन्हें अंधविश्वास मानने लगीं।

*सहायक आचार्य, इतिहास विभाग, अयाची मिथिला महिला महाविद्यालय, बहेडा, बेनिपुर, दरभंगा, बिहार

 ISBN: 978-81-930770-3-0

संस्कृत और अन्य भारतीय भाषाओं की घोर उपेक्षा हुई, जिससे शास्त्रीय ग्रंथों के अध्ययन और अनुवाद में बाधा आई। संस्कृत में लिखा गया ज्ञान धीरे-धीरे सार्वजनिक पहुंच से दूर होता गया और भारत की बौद्धिक संपदा संकुचित होने लगी।

औपनिवेशिक मानसिकता ने भारतीय संस्कृति को हीन और पिछड़ा समझा, जिससे देशवासियों के भीतर आत्मगौरव और सांस्कृतिक पहचान की भावना क्षीण हुई। यह केवल शैक्षणिक पतन नहीं था, बल्कि सांस्कृतिक और मानसिक गुलामी की नींव भी थी।

इस ऐतिहासिक पृष्ठभूमि ने स्वतंत्रता संग्राम के दौरान IKS के पुनरुद्धार की आवश्यकता को जन्म दिया, जिससे आगे चलकर सांस्कृतिक पुनर्जागरण और आत्मनिर्भर भारत की ओर आंदोलन शुरू हुए।

**सांस्कृतिक पुनर्जागरण और प्रतिरोध**

औपनिवेशिक शासन के दौरान जब भारत की सांस्कृतिक पहचान को दबाने का प्रयास किया गया, तब देश में एक शक्तिशाली **सांस्कृतिक पुनर्जागरण और प्रतिरोध** की लहर उठी। यह आंदोलन केवल परंपराओं की रक्षा नहीं था, बल्कि एक बौद्धिक और आध्यात्मिक पुनरुत्थान भी था, जिसने भारतीय समाज को आत्मगौरव और आत्मनिर्भरता की ओर प्रेरित किया।

राजा राम मोहन राय ने वेदों और उपनिषदों के अध्ययन को पुनर्जीवित कर भारतीय दर्शन को आधुनिक संदर्भ में प्रस्तुत किया। उन्होंने ब्रह्म समाज की स्थापना कर मूर्तिपूजा, कर्मकांड और सामाजिक कुरीतियों का विरोध किया। उनके प्रयासों ने भारतीयों को अपने ज्ञान परंपरा की वैज्ञानिकता और नैतिकता को समझने का अवसर दिया।

स्वामी विवेकानंद ने भारतीय आध्यात्मिकता को वैश्विक मंच पर पहुंचाया। उन्होंने शिकागो धर्म संसद (1893) में भारत की सनातन संस्कृति, सहिष्णुता और मानवता की बात कर विश्व को भारतीय दर्शन की गहराई से परिचित कराया। उनके विचारों ने युवाओं को आत्मबल और सेवा की भावना से प्रेरित किया।

बंगाल पुनर्जागरण ने साहित्य, कला और दर्शन में भारतीय मूल्यों की वापसी की। रवींद्रनाथ टैगोर, बंकिम चंद्र चट्टोपाध्याय और ईश्वरचंद्र विद्यासागर जैसे विद्वानों ने भारतीय भाषाओं में लेखन को बढ़ावा दिया, जिससे सांस्कृतिक आत्मनिर्भरता का भाव जागा। परंपरागत कलाओं जैसे कथक, भरतनाट्यम, और लोक संगीत को पुनः सम्मान मिला और उन्हें आधुनिक मंचों पर प्रस्तुत किया गया।

यह पुनर्जागरण न केवल सांस्कृतिक पहचान की रक्षा थी, बल्कि एक **बौद्धिक प्रतिरोध** भी था, जिसने भारत को आधुनिकता के साथ अपनी परंपराओं को जोड़ने की शक्ति दी।

**स्वतंत्रता संग्राम और IKS का पुनरुत्थान**

 ISBN: 978-81-930770-3-0

भारतीय स्वतंत्रता संग्राम केवल राजनीतिक स्वतंत्रता की मांग तक सीमित नहीं था, बल्कि यह एक **सांस्कृतिक पुनर्जागरण** का भी प्रतीक था। इस आंदोलन ने भारत की पारंपरिक ज्ञान प्रणाली (IKS) को पुनर्जीवित करने की दिशा में महत्वपूर्ण भूमिका निभाई।

महात्मा गांधी ने **खादी**, **ग्राम उद्योग**, और **स्वदेशी ज्ञान** को आत्मनिर्भरता का प्रतीक बनाकर भारतीयों को अपनी जड़ों से जुड़ने की प्रेरणा दी। उनका मानना था कि भारत की आत्मा गांवों में बसती है, और वहां की पारंपरिक तकनीकें, औषधियाँ, और जीवन शैली ही भारत को सशक्त बना सकती हैं।

**रवींद्रनाथ टैगोर** ने शांतिनिकेतन की स्थापना कर शिक्षा को भारतीय दृष्टिकोण से जोड़ने का प्रयास किया। उन्होंने पाठ्यक्रम में संगीत, कला, योग और प्रकृति के साथ जुड़ाव को महत्व दिया, जिससे शिक्षा केवल ज्ञान अर्जन नहीं बल्कि आत्मिक विकास का माध्यम बनी।

**स्वदेशी आंदोलन** ने हस्तशिल्प, बुनाई, और पारंपरिक तकनीकों को पुनर्जीवित किया। विदेशी वस्त्रों और उत्पादों के बहिष्कार ने भारतीय कारीगरों को सम्मान और रोजगार दिलाया। इससे IKS की व्यावहारिक उपयोगिता को पुनः मान्यता मिली।

स्वतंत्रता सेनानियों जैसे **विवेकानंद**, **अरविंद घोष**, और **नेहरू** ने भारतीय दर्शन, योग, और सांस्कृतिक मूल्यों को अपने विचारों का आधार बनाया। उन्होंने भारत की आत्मा को पश्चिमी प्रभावों से बचाने और उसे वैश्विक मंच पर प्रस्तुत करने का प्रयास किया।

इस प्रकार, स्वतंत्रता संग्राम ने न केवल राजनीतिक आज़ादी दिलाई, बल्कि भारत की **ज्ञान परंपरा को पुनः जीवंत** कर एक सांस्कृतिक पुनर्जागरण की नींव रखी।

### स्वतंत्रता के बाद की नीतियाँ और संस्थान

स्वतंत्रता प्राप्ति के बाद भारत सरकार ने भारतीय ज्ञान प्रणाली (IKS) को पुनः स्थापित करने और उसे शिक्षा तथा संस्कृति के मुख्यधारा में लाने के लिए कई महत्वपूर्ण नीतियाँ और संस्थानिक पहलें कीं। यह प्रयास न केवल सांस्कृतिक पुनरुत्थान का प्रतीक थे, बल्कि भारत की आत्मा को फिर से जागृत करने की दिशा में एक ठोस कदम भी थे।

भारतीय संविधान के **अनुच्छेद 51A** में नागरिकों के लिए सांस्कृतिक विरासत के संरक्षण को एक मौलिक कर्तव्य के रूप में मान्यता दी गई। यह प्रावधान IKS को संरक्षित करने और आगे बढ़ाने के लिए नीति निर्माताओं को प्रेरित करता रहा।

**NCERT** (राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद) ने पाठ्यक्रमों में भारतीय दर्शन, योग, आयुर्वेद और पारंपरिक विज्ञानों को शामिल करना शुरू किया। **UGC** (विश्वविद्यालय अनुदान आयोग) ने उच्च शिक्षा संस्थानों को **IKS** पर शोध और अध्ययन के लिए प्रोत्साहित किया। वहीं, **IGNCA** (इंदिरा गांधी राष्ट्रीय कला केंद्र) ने भारतीय कलाओं, परंपराओं और शास्त्रों के संरक्षण और प्रचार-प्रसार में महत्वपूर्ण भूमिका निभाई।

 ISBN: 978-81-930770-3-0

संस्कृति के क्षेत्र में, **संगीत नाटक अकादमी**, **ललित कला अकादमी**, और **साहित्य अकादमी** जैसे संस्थानों ने शास्त्रीय संगीत, नृत्य, चित्रकला और साहित्य को संरक्षित करने के साथ-साथ नई पीढ़ी को इससे जोड़ने का कार्य किया।

विश्वविद्यालयों में भारतीय दर्शन, आयुर्वेद, योग और शास्त्रीय संगीत पर शोध कार्यों की शुरुआत हुई, जिससे IKS को वैज्ञानिक और अकादमिक मान्यता मिली। इन प्रयासों ने भारत की पारंपरिक ज्ञान प्रणाली को आधुनिक संदर्भ में पुनः जीवंत किया और उसे वैश्विक मंच पर प्रस्तुत करने की नींव रखी।

